राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला – ३५०

ISSN: 2231-0452

# महस्विनी

**विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका**

**कुसुमम् :** जनवरी – डिसेम्बर २०२०

**सम्पुटम् :** संयुक्तम् (१,२)

**प्रधानसम्पादकः**

**आचार्यः वि. मुरलीधरशर्मा**

**कुलपतिः**

**सम्पादकः**

**आचार्यः कोराड सूर्यनारायणः**

**राष्ट्रियसंस्कृतविश्वविद्यालयः**

(केन्द्रीयविश्वविद्यालयः)

तिरुपतिः - ५१७५०७

**महस्विनी**
(विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका)
**ISSN : 2231-0452**

कुसुमम् : जनवरी – डिसेम्बर २०२०
सम्पुटम् : संयुक्तम् (१,२)

प्रकाशनवर्षम् : २०२०
प्रतिकृतयः : १५०

© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः – ५१७५०७, आन्ध्रप्रदेशः।

प्रकाशकः
**कुलसचिवः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

संयोजकः
**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

जालपुटसङ्केतः : https://nsktu.ac.in

मूल्यम् : ₹ 558/-

मुद्रकः : मुद्रिका, विजयवाडा – ५२००१० (आ.प्र.)

N. S. University Publication Series No. - 350 **ISSN: 2231-0452**

# MAHASVINĪ

(Peer-reviewed and Refereed Research Journal)

**Volume :** January - December 2020 **Part :** Combined (1&2)

General Editor

**Prof. V. Muralidhara Sharma**

**Vice - Chancellor**

Editor

**Prof. Korada Suryanarayana**

**NATIONAL SANSKRIT UNIVERSITY**

**(Central University)**

**TIRUPATI - 517 507**

**MAHASVINĪ**
(Peer-reviewed and Refereed Research Journal)
**ISSN : 2231-0452**

Volume : January - December 2020
Part : Combined (1&2)

Year of Publication : 2020
Copies : 150

© National Sanskrit University, Tirupati-517507, A.P.

Publisher :

**REGISTRAR**
National Sanskrit University, Tirupati, Andhra Pradesh

Co-ordinator :

**Research and Publications Department**
National Sanskrit University, Tirupati

Website : https://nsktu.ac.in

Price : ₹ 558/-

Printed at : Mudrica, Vijayawada - 520010 (A.P.)

**Disclaimer:**

The views expressed in the Research papers are those of the authors and not of the editors.

आचार्य वि. मुरलीधरशर्मा
कुलपतिः
राष्ट्रियसंस्कृतविश्वविद्यालयः
केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमानुसारं (२०२०) स्थापितः
(प्राक्तनराष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)
तिरुपतिः - ५१७ ५०७ (आं.प्र)

Prof. V. MURALIDHARA SHARMA
Vice-Chancellor
NATIONAL SANSKRIT UNIVERSITY
A Central University, established under
Central Sanskrit Universities Act, 2020)
TIRUPATI - 517 507 (A.P.)
(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)
Re-Accredited by the NAAC at 'A' Grade - 3.71 CGPA out of 4 point scale
Ph : (Off.) 0877 - 2287680 ; (Res.) 2286686 ; E-mail : vc.vidyapeetha@gmail.com ; Website : nsktu.ac.in

# पुरोवाक्

महते प्रमोदायेदं यन्महनीयेनानेन तिरुपतिस्थेन राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रकाश्यमानायाः सुप्रथितायाः 'महस्विनी' इत्याख्यायाः शोधपत्रिकायाः कुसुममिदं शास्त्रीयचिन्तनपरायणपराणां जिज्ञासूनां विदुषां शोधार्थिनाञ्च कृते समर्प्यते।

वस्तुतः पूर्वं मानितविश्वविद्यालयत्वेन प्रसिद्धेनास्माकं विश्वविद्यालयेन अस्याः शोधपत्रिकायाः त्रयोदशकुसुमानि प्रकाशितान्यासन् । तत इदानीं केन्द्रीयविश्वविद्यालयत्वेन विपरिणामात्परं प्रकृतोऽङ्कः प्रकाश्यते।

सर्वकारेण उच्चशिक्षाक्षेत्रे क्रियमाणस्य करिष्यमाणस्य चानुसन्धानस्य गुणवत्तावर्धनाय विश्वविद्यालयानुदानायोग (UGC) द्वारा समकक्षव्यक्तिसमीक्षितसन्दर्भितानां गुणवत्तायुतानां शोधपत्रिकाणां प्रकाशनाय सर्वेऽपि विश्वविद्यालयाः सूच्यन्ते। तदनुसारेण तत्र-तत्र विश्वविद्यालयस्तरेषु गवेषणाक्षेत्रेऽधीयानानां छात्राणां समेषामध्यापकानाञ्च शोधपत्राणां लघुप्रबन्धानाञ्च प्रकाशनायानिवार्यता महती वर्तते इति । तादृशीमनीवार्यतां सम्पूरयितुमस्माकं विश्वविद्यालयस्य शोधप्रकाशनविभागेन समकक्षव्यक्तिसमीक्षिता पत्रिकेयं नित्यं प्रकाश्यमाना वर्तते। अत्रास्माभिर्ज्येष्ठानामाचार्याणामितरेषाञ्च प्राध्यापकानां शोधच्छात्राणाञ्च स्वस्वक्षेत्रे क्रियमाणानुसन्धानमाश्रित्य विरचितान् लघुप्रबन्धान् यथाशोधप्रविधि लिखितानि शोधपत्राणि सङ्कलय्य समीक्ष्य सञ्चित्य समीक्षकसमितेः संस्तुत्युत्तरं चितानां शोधलेखानां प्रकाशनं विधीयते। अनेन अनुसन्धानरतानां छात्राणां ज्ञानविज्ञानयोः मार्गः प्रशस्यतीति नास्त्यत्र मनागपि सन्देहः।

प्रकृतेऽस्मिन् कुसुमे अर्थशास्त्र–व्याकरण–हठयोग–धर्मशास्त्र–वेदान्तादि–विविधशास्त्राणि आधृत्य आरचिता वैदुष्यपूर्णाः चतुर्दशशोधलेखाः प्रकाशितास्सन्ति। एते लेखाः तत्तद्रचयितुः शोधकर्तुश्च स्वविषये गाम्भीर्यं पाण्डित्यप्रकर्षं परिश्रमं च सूचयन्ति। एतादृशपाण्डित्यपूर्णगभीरलेखैः महिमान्विता 'महस्विनी' सुरभारत्याः समुपासनायै कुसुममिदमर्पयति। येषां सुरभारतीसमुपासकानां विदुषां गवेषकानाञ्चामूल्यशोधलेखनिधिना अमूल्यरत्नमिव प्रकाशमाना 'महस्विनी' सुरभारतीसमुपासनायै सिद्धाभूत्, तेभ्यः सर्वेभ्यः तेषां योगदानाय कार्तज्ञ्यं बिभर्मि।

वस्तुतः कस्या अपि शोधपत्रिकायाः सुष्ठु प्रकाशनं (सामग्रीसङ्कलनादारभ्य गुणवत्तायुतनिर्दुष्टप्रकाशनपर्यन्तं कर्म) समय–समर्पण–श्रम–श्रद्धासापेक्षं भवति। एतच्च समूहकार्यं, न ह्येकेन जनेन सम्पादयितुमपि शक्यम् । अतः प्रस्तुतस्य निर्दुष्टप्रकाशनाय स्वीयामूल्यसमयं विनियुज्य ससमर्पणं सश्रमं सश्रद्धञ्च कार्यं विहितवत्यै प्रकाशन–समीक्षा–समित्यै शोधप्रकाशनविभागाय च मदीयान् साधुवादान् संसूचयामि।

सुरभारत्यङ्घ्रियुग्मे निवेदितेन प्रसादरूपेण सम्प्राप्तेन 'महस्विन्याः' अनेन कुसुमेन निखिलमपि विद्वज्जगत् सुरभितं भवतादित्याशास्य नमस्यामि वाग्देवीं श्रीवेङ्कटाचलपतिञ्च। वाग्देव्याः श्रीवेङ्कटाचलपतेश्च कृपाकटाक्षेणाग्रेऽपि अस्याः प्रकाशनं निराबाधं निरन्तरं च भूयादिति कामयमानः –

विदुषां वशंवदः

मुरलीधरः

**(विरिवेण्टि मुरलीधरशर्मा)**

कुलपतिः

## सम्पादकसमितिः


**प्रधानसम्पादकः**

**आचार्यः वि.मुरलीधरशर्मा**

कुलपतिः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सम्पादकः**

**आचार्यः कोराड सूर्यनारायणः**

अनुसन्धानप्रकाशनविभागाध्यक्षः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सदस्याः**

**आचार्यः पेन्ना मधुसूदनः**

दर्शनसङ्कायप्रमुखः, कालिदासंस्कृतविश्वविद्यालयः, रामटेक

**आचार्यः वीरनारायण पाण्डुरङ्गी**

वेदान्तसङ्कायप्रमुखः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलुरु

**डा. वेङ्कट राधेश्यामः**

उपनिदेशकः, शोधप्रकाशनविभागः, श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयः, तिरुपतिः

**आचार्यः राणी सदाशिवमूर्तिः**

शैक्षिकसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**आचार्यः जि.एस.आर्.कृष्णमूर्तिः**

साहित्यसंस्कृतिसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा.पङ्कजकुमारव्यासः**

सहाचार्यः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. शिवरामभट्टः**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. सोमनाथदाशः, डा.सीहेच्. नागराजुः**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. दिल्लीपकुमारमिश्रः,** शोधसहायकः

# महस्विनी

**(तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयशोधपत्रिका)**

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्या: प्रकाशनं प्रतिवर्षं जनवरी–जुलै एवम् अगस्त–डिसेम्बरमासेषु भवति।

३. अस्या: प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध–दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धा: प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन–भावानुवाद–टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. पत्रिकाया स एव अङ्क: लेखकाय नि:शुल्कं दीयते, यस्मिंस्तदीयो निबन्ध: प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे नि:शुल्कं दीयते, समालोचना–पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकशुल्कं रू.२५५/–, द्विवार्षिकशुल्कं रू.४२५/–, त्रिवार्षिकशुल्कं रू.६८०/– सन्ति, इदं शुल्कं **कुलसचिवः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः–५१७५०७** इति सङ्केतेन बैंकड्राप्ट द्वारा प्रेषणीयम्।

— **सम्पादकः**

**सू.** — शोधलेखप्रणेतार: यथाकालं स्वकीयान् संस्कृताङ्ग्लभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखाः प्रकाशयिष्यन्ते।

# सम्पादकीयम्

संस्कृतवाङ्मयं ज्ञानविज्ञानसागरपरिपूर्णं विशालं वर्वर्ति। प्राचीनैरस्मद्महर्षिभिः तपोबलेन लोकोपकारिकानैका विद्या निरमायिषत। गच्छता कालेन तेषामवगमनं तेषु अनुसन्धानं च अपेक्षितं समभूत्। अतः कालोचितं प्राचीनाधुनिकसमन्वयसाधकानि प्रासङ्गिकानि नैकानि कार्याणि समभूवन् सम्भवन्ति सम्भविष्यन्ति च। प्राचीनसंस्कृतवाङ्मये आधुनिकं प्रासङ्गिकं सन्दर्भमाश्रित्य नवीनतथ्यान्वेषणकार्याण्यपि जातानि जायमानान्यपि सन्ति। एवमेव आधुनिकपद्धत्या नूतनविषयाणामाविष्करणं क्रियते कृतमप्यनुसन्धातृभिः विद्वद्भिः।

स्वस्वबुद्धेः सामर्थ्यानुसारं विद्वांसः संस्कृतक्षेत्रे नानासंशोधनपरकाणि कार्याणि अकार्षुः कुर्वन्ति च। पुस्तकलेखनमाध्यमेन, शोधलेखमाध्यमेन, शोधपत्रप्रस्तुत्या, व्याख्यानमाध्यमेन, शोधग्रन्थलेखनमाध्यमेन वा स्वकीयनवीनचिन्तनस्य आविष्करणम् अनुसन्धातृभिः क्रियते। तेषु अनुसन्धातृभिः लिखितानां नवीनतथ्यानां प्रकाशनमाध्यमं शोधपत्रिकाख्यम् अन्यतमं वर्तते । प्रायः सर्वत्र शिक्षणसंस्थासु शोधपत्रिका प्रकाश्यते। एवमस्माकं विश्वविद्यालयेऽपि 'महस्विनी' नाम्नी शोधपत्रिका प्रकाश्यते।

इयं 'महस्विनी' शोधपत्रिका नानादशकैः समृद्धा विद्वद्वर्याणां सहकारेण समादरणेन च प्रारभत। नानाशास्त्रमयितानि अनुसन्धानात्मकानि पत्राणि अस्यां बाहुल्येन प्रकाश्यन्ते साधु च समाद्रियन्ते। सञ्चिकायामस्यामपि चतुर्दशशोधलेखाः प्रकाश्यन्ते, यत्र च सप्त व्याकरणशास्त्रसम्बद्धविशेषप्रकाशकाः। शिष्टाः अर्थशास्त्र–धर्मशास्त्र–योगशास्त्रादि– विषयान् उररीकृत्य निबद्धाः विलसन्ति।

विश्वविद्यालयत्वोपलब्ध्यनन्तरं प्रथमत्वेन सञ्चिकासम्पादकसमितिसदस्यानां सर्वेषां मनांसि उल्लासयतीति मोमुद्यते मे चेतः। अनुसन्धानप्रकाशनविभागं निरन्तरं चोदयतां

महस्विन्याः प्रकाशनेऽप्यानुकूल्यं वितन्वतां विश्वविद्यालयस्यास्य कुलपतित्वेन साफल्यास्वादपरिपूर्णानाम् आचार्य वि. मुरलीधरशर्मामहोदयानां, शैक्षिकसङ्कायप्रमुखाणाम् आचार्य राणि सदाशिवमूर्तिमहोदयानां तत्कृतसहकाराय कार्तज्ञं प्रकटयामि। एवं सम्पादकसमितिसदस्येभ्यः अनुसन्धानप्रकाशनविभागाध्यापकेभ्यश्च धन्यवादान् वितनोमि। प्रकाशनस्यास्यानुमतिप्रदातृभ्यः प्रकाशकेभ्यः कुलसचिवेभ्यः चल्ला वेङ्कटेश्वरमहोदयेभ्यश्चापि धन्यवादाः।



**(कोराड सूर्यनारायणः)**
सम्पादकः

# शोधलेखानुक्रमणी

**कुसुमम् :** जनवरी – डिसेम्बर २०२०   **सम्पुटम् :** संयुक्तम् (१,२)


| | | पुटसंख्या |
|---|---|---|
| १. | **कौटलीयेऽर्थशास्त्रे विद्यासमुद्देश:** <br> - प्रो. सत्यनारायण आचार्य: | 1 |
| २. | **महाभाष्यवाक्यपदीययोर्गुणपदार्थानुशीलनम्** <br> - डा. प्रमोद्कुमारशर्मा (शास्त्रकवि:) | 9 |
| ३. | **संस्कृतभाषायां वाचोयुक्ति: - काचित् वैयाकरणदृष्टि:** <br> - डा. गोपीकृष्णन् रघु: | 23 |
| ४. | **ध्रुवपदार्थविमर्श:** <br> - डा. सुधाकरमिश्र: | 31 |
| ५. | **सनादिप्रत्ययविमर्श:** <br> - डा. वि. श्रीनिवासनारायण: | 41 |
| ६. | **नित्यवीप्सयो: क्रियासमभिहारे द्वे वाच्ये, आभीक्ष्ण्ये द्वे वाच्ये, इत्यादि वार्तिकविषये किञ्चित्** <br> - कुप्पा बिल्वेश शर्मा | 53 |
| ७. | **हठयोगाभ्यासानुकूलदेशकालस्थानानि** <br> - डा. तपन कुमार घडेइ | 59 |
| ८. | **मानसिकक्लेशापनयने भगवद्गीताया: भूमिका** <br> - चक्रधरमेहेर: | 69 |

९. **शाङ्करभाष्यानुसारेण तैत्तिरीये ब्रह्मलक्षणविचार:** 87
- गणेशभट्ट:

१०. **श्रीमद्भक्तिविवेके पौराणिक: प्रभाव: - एकं विशिष्टमध्ययनम्** 97
- डा. भेषराजशर्मा

११. **अधिगीतं मोक्षस्वरूपविचार:** 111
- अवीरलाल गङ्गोपाध्याय:
- डा. जे.एस्.आर्.प्रसाद:

१२. **फक्किकाप्रकाशे लघुशब्देन्दुशेखरप्रभाव:** 123
- अनिलकुमारद्विवेदी

१३. **भारतीयसंस्कृतौ ब्रह्मचर्याश्रम:** 131
- सचिनद्विवेदी

१४. **प्रत्ययेषु इत्संज्ञाया: फलम्** 141
- हरिपदबेरा

१५. **Implementing and evaluation of Computer based speechification for Sanskrit Text Corpus** 149
- Dr. B. Chandrasekharam

१६. **अप्रकाशितनवमालिकानाटिकाया: मुख्यपात्राणां समीक्षणम्** 157
- रागि वेङ्कटाचारी

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२०  **सम्पुटम् :** संयुक्तम् (१,२)
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# कौटलीयेऽर्थशास्त्रे विद्यासमुद्देशः

**प्रो.सत्यनारायण आचार्यः***

**उपक्रमः**

भारतीयशास्त्रपरम्परायामर्थशास्त्रस्य महत्त्वपूर्णं स्थानं वर्तते इति विदन्त्येव विद्वांसः। अस्यैव शास्त्रस्य वेदमूलकत्वं प्रमाणयन्ति विचक्षणाः, अर्थशास्त्रप्रतिपादकानां शब्दानां वेदेषु प्राचुर्येण प्रयोगात्। दिङ्मात्रं यथा - 'सोमोऽस्माकं ब्राह्मणानां राजा'[१] इत्यत्र राजशब्दः, 'महते जानराज्याय'[२] इत्यत्र राज्यशब्दः, 'वरणः पस्त्यास्वा साम्राज्याय सुक्रतुः'[३] इत्यत्र साम्राज्यशब्दः, 'अग्निं यूतं हवामह'[४] इत्यत्र यूतशब्दः इत्यादि।

विद्यानां गणनाप्रसङ्गे अष्टादशविद्यासु अर्थशास्त्रमन्तर्भवतीति विष्णुपुराणे कथ्यते। यथा-

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश।।**
**आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।**
**अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादश स्मृताः।।**[५]

---

* पूर्वविभागाध्यक्षः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[१] शु.य.९/४०

[२] तत्रैव

[३] शु.य. १०/२७

[४] ऋ.१/१/१

[५] विष्णु.पु.३/६/२८,२९
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

तत्र आयुर्वेद-धनुर्वेद-गान्धर्वाणां त्रयाणामुपवेदानां साहचर्येण वर्णनात् अर्थशास्त्रस्यापि उपवेदत्वं स्वीक्रियते।

## किमिदमर्थशास्त्रम्?

तत्र अर्थो नाम येन मनुष्यः स्वकीयं जीविकानिर्वाहं करोति, येन च स्वकीयां स्थितिं साधयति, यैश्चोपायैस्तदीया जीवनसाधनप्रदायिनी वृत्तिः, स्थितिः, जीविका वा वर्तते इति ज्ञायते। एतादृशस्य अर्थस्याश्रयभूता भूमिरेवेति कौटल्यमते अर्थोनाम मनुष्यवती भूमिरुपलक्ष्यते। तच्च राज्यमित्युच्यते। अर्थस्य प्रतिपादकानि शास्त्राणि अर्थशास्त्राणि, पूर्वाचार्यैः प्राचेतस-मनु-शुक्र-बृहस्पतिप्रभृतिभिः प्रस्थापितानि। तानि सर्वाणि संगृह्य सकलाधारभूतमर्थशास्त्रं कौटल्येन कृतमिति ग्रन्थारम्भे सूचितं यथा-

'पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्।'[१] इति।

## अर्थशास्त्रस्योपादयता

अनेन शास्त्रेण राज्ञः, राजपुत्रस्य, राज्यस्य, राज्यवासिनां, मनुष्याणां, पशूनां, वृक्षलतादीनामपि सुरक्षा भवतीति सुमहदुपादेयमिदं शास्त्रम्। कौटल्यमते राज्ञः प्रजापालनकर्मणि अष्टादशतीर्थानि मन्त्रि-पुरोहित-सेनापतिप्रभृतीनि भवन्ति। राज्यरक्षणाय उपादेयानि तथ्यानि शास्त्रेऽस्मिन् वर्णितानि। तस्मादर्थशास्त्रमिदं राजशास्त्रमित्यपि कथ्यते। शास्त्रान्तरवदस्यापि अर्थशास्त्रस्य परम्परा विद्यते। तदुक्तं महाभारते शान्तिपर्वाणि १५तमेऽध्याये-

[१] कौ.पु.७

**न वै राज्यं न राजासीन्न च दण्डो न दाण्डिकः।**
**धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम्।।**
**नष्टे ब्रह्मणि धर्मे च देवांस्त्रासः समाविशत्।**
**ते त्रस्ता नरशार्दूल! ब्रह्माणं शरणं ययुः।।** इत्यादि।

एतदनुसारं ब्रह्मा, शिवः, इन्द्रः, बृहस्पतिः, शुक्रश्चेति पञ्च स्वर्गीया अर्थशास्त्रकाराः प्रसिद्धाः। मनुष्यलोके मनु-नारद-पाराशर-भरद्वाजप्रमुखा द्वादश भवन्ति। एतेषु द्वादशः कौटल्यः आत्मानं सर्वत्र कौटल्यशब्देन दर्शयति। यथा- चतस्र एव विद्याः इति कौटल्यः[१]।

अस्याः संज्ञायाः कौटल्य इति कौटिल्य इति च द्विधा व्यवहारो दृश्यते। अर्थशास्त्रप्रणेता कौटल्यः कुटलवंशजः विष्णुगुप्तः। ग्रन्थान्तश्लोके यथा-

**दृष्ट्वा विप्रतिपत्तिं सूत्रेषु भाष्यकाराणाम् ।**
**स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च।।** इति।

कौटल्यस्तु चन्द्रगुप्तस्य गुरुर्मन्त्री च। तदुक्तं तत्रार्थशास्त्रोपसंहारे-

**येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः।**
**अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।** इति।

**अर्थशास्त्रे विद्यासमुद्देशः**

सम्पूर्णेऽस्मिन् शास्त्रे पञ्चदश अधिकरणानि, सार्द्धैकशतमध्यायाः, अशीत्यधिकैकशतं प्रकरणानि तथा षट् सहस्रं श्लोकाश्च विद्यन्ते। तत्र विनयाधिकारिकं

[१] कौ.१.२.८

नाम प्रथमाधिकरणं प्रथते, यत्र अष्टादशप्रकरणानि विलसन्ति। तेषु प्रथमाधिकरणस्य प्रथमं प्रकरणं विद्यासमुद्देशः त्रिभिः अध्यायैः प्रदर्शितः। विद्यानां समुद्देशः विद्यासमुद्देशः। आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिश्चेति चतस्रः विद्याः भवन्ति। एतासां विद्यानां समुद्देशः नाम सम्यक् निर्देशः, संस्थापनं वा संक्षेपनिर्देशः इति केषाञ्चन मतम्[१]।

विद्याग्रहणे विनयस्य महत्त्वमुद्घोषितं कौटल्येन। अतः प्रथमाधिकरणस्य नाम विनयाधिकारिकमिति कृतम्। विनयः अर्थात् विद्यादिशिक्षणम्। तस्याधिकारः प्रस्तावो विनयाधिकारः, सोऽस्मिन् अस्ति इति। चतसृणां विद्यानां पण्डितैः सह संयोगः वृद्धसंयोगः कथ्यते। विद्याग्रहणे इन्द्रियजयः अपेक्ष्यते। सुशासननिमित्तं सचिवानां मन्त्रिणां, पुरोहितादीनां च नियोजनं कथं करणीयमिति ज्ञानमावश्यकम्। अमात्येषु राजविषये कः शुचिः, कश्च अशुचिरिति ज्ञातव्यम्। गुप्तचराणां तत्कार्ये नियोजनं, शत्रोः सकाशात् आत्मपक्षाणां सुहृदां रक्षणं, शत्रुराज्ये तेषां स्वपक्षे आनयनम्, समुचितविचारेण कार्यनिरूपणम्, दूतप्रयोगः, राजपुत्ररक्षणम्, बहिः स्थापिते राजपुत्रे राज्ञः कर्त्तव्यम्, राज्ञः दैनिकं कर्मनिधारणम्, निशान्ते राज्ञः गृहसुरक्षादिकार्यं तथा स्वस्य राज्ञश्च रक्षणार्थं कर्म सम्पादनं विनयाधिकारे सूचितमस्ति। अत्र अधिकरणान्तरेषु राजवृत्तिः चर्चिता।

## आन्वीक्षिकीस्थापना

कौटलीयार्थशास्त्रे द्वितीयेऽध्याये विद्यासमुद्देशः प्रतिपादितः। आदौ आन्वीक्षिकीस्थापना कृता। अर्थतत्त्वस्य हेतुभिः परीक्षणमन्वीक्षा, सा प्रयोजनमस्या इति आन्वीक्षिकी हेतुविद्या। ततः त्रयीस्थापना विहिता। ऋग्यजुःसामानि-त्रयी। तदनु वार्तादण्डनीतिस्थापना कृता। कृषिवाणिज्यपशुपालनानि वार्ता। दण्डनीतिः-राजनीतिः। एताभिः विद्याभिः धर्मार्थौ यद् विद्यात्, तद् विद्यानां विद्यात्वमित्यपि निगदितम्।

---

[१] द्र.कौटलीयमर्थशास्त्रम्, पं.कुलमणिमिश्रः, पृ.२

कौटल्यमते- 'साङ्ख्यं योगो लोकायतं चेत्यान्वीक्षिकी।' कपिलमुनिप्रोक्तं प्रकृतिपुरुषविवेचकं शास्त्रं भवति सांख्यम्। ध्यानधारणादिप्रतिपादकं पतञ्जलिप्रदर्शितं शास्त्रं भवति योगः। लोकायतं नाम न्यायशास्त्रम् एतत् सर्वम् आन्वीक्षिक्यामन्तर्भवति। तत्र त्रयीप्रतिपाद्यौ धर्माधर्मौ। वार्तायां नाम कृषिवाणिज्यादिषु अर्थः अनर्थश्च भवतः। कृष्यादिजन्यशस्यादिरूपं फलं भवति अर्थः। एतद् विपरीतः फलाभावः अनर्थः। दण्डनीत्यां नीतिशास्त्रपालनेन नयः, नीतिमार्गत्यागेन अनयः इति कथ्यते। एतासां त्रय्यादीनां परस्परसंबाधे सति बलाबले ग्राह्याग्राह्यत्वे हेतुभिः अन्वीक्षमाणां निरूपयन्ती सती आन्वीक्षिकी लोकोपकारिका कथ्यते। इयं विद्या विपदि अभ्युदये च अविकृतत्वेन बुद्धिं स्थापयति। किं च कर्त्तव्यनिरूपणात्मकं प्रकृष्टं ज्ञानम्, विषयोपन्यासाय उच्चार्यमाणं वाक्यम्, सन्धिविग्रहादिलक्षणां क्रियां चेति विषयेषु सर्वत्र पटुतां सम्पादयति। अस्याः विद्यायाः प्रशंसायां कथ्यते -

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।**[१]

**त्रयीस्थापना**

तत्र तृतीयेऽध्याये विद्यासमुद्देशप्रकरणे त्रयीस्थापना कृता। सामवेदः, ऋग्वेदः, यजुर्वेदश्चेति त्रयो वेदाः त्रयी। अथर्ववेदः, महाभारतादिरितिहासवेदाश्च सर्वे वेदाः कथ्यन्ते। शिक्षा-कल्प-व्याकरण-निरुक्त-च्छन्द-ज्योतिषशास्त्राणि त्रय्याः अङ्गानि। एतानि षडङ्गानि अङ्गवत् उपादेयानि भवन्ति। वेदप्रतिपादितः धर्मः ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां चतुर्णां वर्णानां ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-यतिव्रतानां चतुर्णामाश्रमाणां चोपकारकः। यजन-याजन-अध्ययन-अध्यापन-दान-प्रतिग्रहाणि ब्राह्मणधर्मत्वेन प्रतिपादितानि। क्षत्रियस्य अध्ययनं, यजनं, दानं, शस्त्रेण जीवनधारणं, भूतरक्षणं चेति

[१] कौटलीयमर्थशास्त्रम्, २/१५

धर्मः। वैश्यस्य अध्ययनं, यजनं, दानं, कृषिकार्यं, पशुपालनं वाणिज्यं च स्वधर्मः कथितः। शूद्रस्य द्विजातीनाम् उपकारकद्रव्यनिर्माणादिद्वारा परिचर्या, कृषिवाणिज्य-पशुपालनानि, शिल्पकर्म, गायनवादननर्त्तनादि च धर्मत्वेन वर्ण्यन्ते।

अस्मिन् सन्दर्भे गृहस्थधर्मोऽपि सूचितः। गृहस्थः स्ववर्णविहितकर्मानुसारं जीविकानिर्वाहं कुर्यात्। अपि च सजातीय-असमानगोत्रप्रवर-कन्यया सह विवाहं कुर्यात्। वंशरक्षार्थं ऋतुस्नानस्य दशमे द्वादशे वा दिने स्त्रीसंसर्गं कुर्यात्। देव-पितृ-अतिथि-भृत्यानां कृते भोजनादिकं प्रदाय अन्ते शिष्टं भोजनं कुर्यात्।

ब्रह्मचारिधर्मविषये कथितं यत् यः वेदाध्ययनार्थं दण्डादिधारणं कुर्वन् व्रतं पालयति सः ब्रह्मचारी। ब्रह्मचारी नियमितरूपेण वेदाध्ययनं कुर्यात्। यज्ञकार्यं, स्नानं, दिक्षाचरणं, ब्रह्मचर्यपालनं च कुर्यात्। आचार्यस्य निकटे आजीवनं वासः, आचार्यस्य अभावे तत्पुत्रस्य सहाध्यायिनः वा निकटे निवासः तेन करणीयः।

वने प्रकर्षेण तिष्ठति इति वनप्रस्थः। वनप्रस्थ एव वानप्रस्थ कथ्यते। वानप्रस्थः अपि ब्रह्मचर्यं पालयेत्। भूमौ शयनम्, जटाजिनधारणम्, स्नानम्, अग्निहोत्रम्, देव-पितृ-अतिथिपूजनं तथा वन्यभोजनं वानप्रस्थेन करणीयं भवति।

अत्र परिव्राजकधर्मोऽपि प्रतिपादितः। सर्वं परित्यज्य व्रजतीति परिव्राजकः अर्थात् सन्यासी। सः संयतेन्द्रियः भवति। सः स्वाश्रमधर्मं विहाय इतरकर्माणि वर्जयेत्, सर्वथा इतरेषां सङ्गं त्यज्येत्, अनेकत्र भैक्ष्यं च कुर्यात्। परिब्राजकः एकस्य गृहे निरन्तरं भोजनं न कुर्यात्। तस्य अरण्यवासः प्रशस्तः। सः मृत्-जलादिभिः शरीरस्य बाह्यशौचं तथा काम-क्रोधादिवर्जनेन आभ्यन्तरशौचं च विदध्यात्। तत्र अहिंसा, सत्यम्,शौचम्, अनसूया, अनष्ठिरत्वम्, क्षमा च सर्वेषां गृहस्थ-ब्रह्मचारि-वानप्रस्थ-परिव्राजकानां धर्मः भवति। स्वधर्माचरणं स्वर्गसुखाय तथा अपरिमितकालभोग्याय च कथ्यते। तदुक्तं-

**तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत्।**
**स्वधर्मं सन्दधानो हि प्रेत्य चेह च नन्दति।।**
**व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।**
**त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति।।**[1]

## वार्तास्थापना, दण्डनीतिस्थापना च

तत्र चतुर्थेऽध्याये वार्त्तादण्डनीत्योः विद्यात्वं प्रतिपाद्यते। पराशरादिप्रोक्तं क्षेत्रबीजवापादिप्रतिपादकं कृषिशास्त्रं गौतमशालिहोत्रादिप्रणीतं गवाश्वादिपशुपालनं शास्त्रम्, विदेहराजप्रणीतं क्रयविक्रयादिप्रतिपादकं वाणिज्यशास्त्रं च वार्त्तापदेन कथ्यन्ते। सा वार्त्ता धान्यादिप्रदानेनोपकरोति। तत्र वार्त्तया कोशदण्डाभ्यां स्वपक्षं परपक्षं च वशीकरोति। कोशः इति कथनेन धननिचयः, दण्डः इति कथनेन हस्त्यश्वरथपादातिकरूपः। ताभ्यां निजपक्षं शत्रुपक्षं च आत्मनः अधीने स्थापयति राजा।

आन्वीक्षिकी-त्रयी-वार्त्तानां योगक्षेमसाधनो दण्डः। योगः इति कथनेन अलब्धस्य लाभः, क्षेम इति कथनेन लब्धपरिपालनं च; एतयोः साधनोपायः दण्डः कथ्यते। तस्य दण्डस्य नीतिः दण्डनीतिः। दण्डनीतौ लोकयात्रा आयत्ता भवति। अतः जनपालनपरः राजा सर्वदा दण्डप्रणयनशीलः स्यात्। शुक्राचार्यप्रमुखाः अपि लोकवशीकरणाय दण्डस्य प्रशंसां कृतवन्तः। तीक्ष्णदण्डेन प्रजानां पराभवः जायते। युक्तदण्डेन राजा पूज्यते। यदि दण्डव्यवस्था न स्यात् तर्हि जनाः निर्भीकाः सन्तः बलवन्तः दुर्बलान् पीडयन्ति। तस्मात् दण्डधरः राजा सुशासनं विदधाति, प्रजाश्च स्वधर्मकर्माभिरताः सुखेन स्वगृहेषु वर्त्तन्ते। तदुक्तम्-

[1] कौटलीयमर्थशास्त्रम्, ३/१६,१७

**चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालित:।**
**स्वधर्मकर्माभिरतो वर्त्तते स्वेषु वेश्मषु।।**[१]

**उपसंहार:**

कौटलीयार्थशास्त्रे विद्यासमुद्देशप्रकरणे प्रतिपादितानां तत्त्वानामवलम्बनेन न केवलं व्यक्ते: समुज्वलव्यक्तित्वनिर्माणे सत्परामर्शा: प्राप्यन्ते, अपि तु राज्यशासनव्यवस्थायां किमपि मार्गदर्शनमपि सम्प्राप्यते। तत्र 'विद्ययाऽमृतमश्नुते' इत्युपनिषद्वचनेन मनुष्य: सद्विद्यया स्वजीवनं सफलयति। तत्र सर्वस्य मूलं विद्या। विद्यया विनयगुण: विकसति। अत: उच्यते- 'विद्या ददाति विनयम्' इत्यादि। तत्र विद्याया: प्रसादेन लोक: सुखी भवति। अत: साम्प्रतिकसमाजे विद्यासमुद्देशप्रकरणस्य प्रासङ्गिकता महत्त्वपूर्णा प्रतिभाति।

**सन्दर्भग्रन्था:**

१) Kautaliyam Arthasastram - Pt.Kulamani Mishra Sharma, S.K.S.V., Puri, 1986
२) कौटल्य-अर्थशास्त्रम् (पूर्वार्द्धम्) - पण्डित श्रीअनन्तरामकरशर्मा, ओडिशासाहित्यएकाडेमी, भुवनेश्वर-१
३) कौटिल्य-अर्थशास्त्र - आचार्य चाणक्य, राधापाकेटबुक्स, मेरठ, यू.पी

❑❑❑

[१] कौटलीयमर्थशास्त्रम्, ४/१७

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**

**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# महाभाष्यवाक्यपदीययोर्गुणपदार्थानुशीलनम्

**डॉ. प्रमोदकुमारशर्मा (शास्त्रकविः)***

भगवता पाणिनिना संस्कृतव्याकरणस्य सुव्यवस्थितं स्वरूपं यथा व्यवस्थापितं तथैव व्याकरणदर्शनस्य स्पष्टरूपेण समारम्भोऽपि कृतः। अष्टाध्याय्यामनेकशः परिभाषासूत्राणां संज्ञाशब्दानां तथा पारिभाषिकशब्दानामाविर्भावो महर्षिणा स्वयमेव विहितः, तत्परिणामस्वरूपे व्याकरणदर्शनस्य एका विस्तृतपृष्ठभूमिः पाणिनिना स्वयमेव सज्जीकृता।

पाणिनिदर्शिताः विभाषा-पदविधि-आदेश-विप्रतिषेध-उपमान-लिङ्ग-क्रियातिपत्ति-कालविभाग-वीप्सा-प्रत्ययलक्षण-भावलक्षणशब्दार्थप्रकृतिसदृशाः शतशः शब्दाः प्रतीकभूताः सन्ति यत् पाणिनिः तात्कालिकदार्शनिकप्रवादान् पूर्णरूपेण न केवलं जानातिस्म अपितु स्वयमेव अत्युच्चकोटिकः चिन्तकोऽप्यासीत्।

पाणिनेर्नैकानि सूत्राणि दर्शनभूतानि सन्ति। तथाहि – **सरूपाणामेकशेष एकविभक्तौ**[1], **जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्**[2], **वोतो गुणवचनात्**[3], **स्वतन्त्रः कर्ता**[4], **तदशिष्यं संज्ञाप्रमाणत्वात्**[5], **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**[6], **तस्य भावस्त्वतलौ**[7] इत्यादीनि।

---

* सहाचार्यः, संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

[1] पाणिनीयसूत्रम् 64-2-1

[2] तत्रैव, 1-2-58

[3] तत्रैव, 4-1-44

[4] तत्रैव, 1-4-54

[5] तत्रैव, 1-2-53

[6] तत्रैव, 1-2-45

[7] तत्रैव, 5-1-119
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके'** इति सूक्तिः व्याकरणदर्शनदृष्ट्यापि समुचिता प्रतिभाति। महर्षिपतञ्जलिप्रणीतमहाभाष्यमपि व्याकरणदर्शनस्य आकरग्रन्थोऽस्ति। अत्रैवोक्तं भाष्यकृता यत्- **सर्ववेदपारिषदं हीदं व्याकरणशास्त्रम्, तत्र नैकः पन्थाः शक्य आस्थातुम्**[1]। **न सत्तां पदार्थो व्यभिचरति**[2]। **प्रातिपदिकनिर्देशाश्चार्थतन्त्रताः भवन्ति**[3] इति। अत्र एकमेकं वाक्यं दर्शनस्य व्यापकभावभूमेः सङ्केतं करोति। एवमेव वाक्यपदीयग्रन्थोऽपि दार्शनिकग्रन्थोऽस्ति। अतोऽत्र गुणपदार्थस्वरूपविश्लेषणं व्याकरणदर्शनदिशा निरूप्यते –

**महाभाष्यानुसारगुणपदार्थानुशीलनम्**

वोतो गुणवचनादिति सूत्रभाष्ये[4] गुणपदार्थं परिभाषयता भगवता पतञ्जलिनोक्तं यत्–

**सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।**
**आधेयश्चाऽक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः।।**
**उपैत्यन्यज्जहात्यदृष्टो द्रव्यान्तरेष्वपि।**
**वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः।।**[5] इति।

गुणः पाकादिना द्रव्येषु पूर्वतनं रूपं रसं स्पर्शं वा परित्यजति तथा अपरं रूपं रसं स्पर्शं वा धारयति। यथा च बदराम्रामलकादिषु फलेषु परिदृश्यत एव। अतः बदराम्रादीनि (द्रव्याणि) हरितादिकं गुणं त्यक्त्वा पीतादिकं गुणं गृह्णन्ति। एवमाम्लादिरसगुणं परित्यज्य मधुरादिरसयुक्ताश्च आम्रादयो भवन्ति। एवमेव वह्निसंयोगे सति घटः श्यामरूपं त्यक्त्वा

---

1 महाभाष्यम् 2-1-58

2 तत्रैव, 5-2-94

3 तत्रैव, 1-1-1

4 अष्टाध्यायी 4-1-44

5 महाभाष्यम् 4-1-44

रक्तरूपमाधत्ते। एतेन रक्तो निविशते श्यामो निवर्तते इति काचित् प्रत्यक्षप्रतीतिर्जायते। एते च शुक्लादयो गुणाः एकत्रैव नोपलभ्यन्ते किन्तु गवाश्वादिषु विभिन्नजातीयद्रव्येषु दृश्यन्ते।

अत एव शुक्लोऽयं गौः, पीतमिदं वस्त्रम् इति व्यवहार उपपद्यते। अत एव उपर्युक्तभाष्यव्याख्यावसरे कैयटाचार्येणोक्तं **'यत् द्रव्यमाश्रयते तत एव च द्रव्यान्निवर्तते भिन्नजातीयेषु च दृश्यते यः सः गुणः'**[1] इति।

परन्तु इदमत्रावश्यमवधेयं यद् यथा गुणः द्रव्यमाश्रयति न तथा जातिः द्रव्यमाश्रयति। एतयोः गुणजात्योर्मध्ये द्रव्याश्रयणे अस्ति कश्चिद् भेदः। यतो हि जातिः उत्पत्तेरारभ्य द्रव्यनाशपर्यन्तं द्रव्यं न जहाति, यथा गोघटादिषु वर्तमानं गोत्वघटत्वादिसामान्यं गोघटादिद्रव्यमुत्पत्तेरारभ्य नाशपर्यन्तं न जहाति। अत एव गोत्वघटत्वसामान्यं गोघटादिष्वेव, न तु तेभ्यो भिन्नेषु द्रव्येषु उपलभ्यते। एतत् सर्वं महाभाष्यकृता स्वयमेवोक्तम्।[2] कैयटाचार्येणापि प्रदीपव्याख्यायां व्याख्यातमस्ति।[3]

गुणश्च पुनः नैतादृशः। रूपरसगन्धस्पर्शादिगुणास्तु विभिन्नद्रव्येषु निविशमाना निवर्तमानाश्च भवन्ति। अतो गुणो जातितः पृथगस्ति। अतः **पृथग्जातिमत्त्वेषु द्रव्येषु निविशमानत्वे सति निवर्तमानत्वं गुणत्वमिति** गुणलक्षणं स्वीक्रियते चेत् तर्हि लक्षणमिदं जातावसत्यामपि क्रियायां तु पुनः अतिव्याप्तिदोषग्रस्तं भविष्यति, यतो हि कर्म अपि कदाचित् कस्मिंश्चित् द्रव्ये निविशमानं ततो निवर्तमानं च दृश्यते। यथा चैत्रो गत्यात्मकं कर्म करोति तदा तत्र निविशते कर्म इति प्रतीयते, एवं तत्कर्मावस्थिते चैत्रे च पुनः गत्यात्मकं कर्म न दृश्यतेऽतस्ततो निवर्तते कर्म इति प्रतीयते। एवमेव विभिन्नगवाश्वप्रभृतिषु द्रव्येष्वपि कर्मदर्शनं

---

1 महाभाष्यप्रदीपः 4-1-44

2 'आविष्टलिङ्गा जातिः यल्लिङ्गमुपादाय प्रवर्तते उत्पत्तिप्रभृति-आविनाशान्न तल्लिङ्गं जहाति' इति महाभाष्यम् 1-2-52

3 'द्रव्ये निविशमाना द्रव्यं न कदाचिज्जहाति, न च भिन्नजातीयानि द्रव्याणि अभिनिविशते' इति महाभाष्यप्रदीपः 4-1-14

क्रियते। एतेन उपर्युक्तगुणलक्षणेन कर्मणः (क्रियायाः) अपि गुणत्वं स्यात् इति कैयटाचार्येण स्वयमेव प्रदीपे प्रदर्शितम्।[1]

अतो गुणलक्षणं परिष्कुर्वन् महाभाष्यकृता 'आधेयश्चाक्रियाजश्च' इति पदद्वयमपि निवेशितम्। अत्र आधेयः=उत्पाद्यः, यथा घटादीनां पाकजो रूपादिः। अक्रियाजः=अनुत्पाद्यः, यथा आकाशादेर्महत्त्वादिः। क्रिया तु सर्वदा उत्पाद्यैव भवति, नत्वनुत्पाद्या, अतः क्रियायां गुणलक्षणं न संघटते। अतो गुणलक्षणं **पृथग्जातिमत्त्वेषु द्रव्येषु निविशमानत्वे सति निवर्तमानत्वं तथा उत्पाद्यत्वे सत्यनुत्पाद्यत्वमिति** संजातम्। परन्तु लक्षणमिदं द्रव्ये पुनः अतिव्याप्तम्, यतः समवायिद्रव्यं समवायसम्बन्धेन स्वावयवे निविशमानं दृश्यते, यथा पटः स्वावयवतन्तुषु निविशते, घटश्च स्वावयवकपालयोः निविशते। एवमसमवायिकारणसंयोगस्य समवायि-कारणस्य च नाशान्नश्यति पटः घटश्च इति व्यवहारः, तेन निवर्तते पटो घटो वा इति गम्यते। एतच्च द्रव्यं गोकच्छपाश्वादिविभिन्नजातीयेष्वपि दृश्यते एव।

किञ्च उत्पाद्यत्वमनुत्पाद्यत्वं च द्रव्येऽपि स्तः। तत्रोत्पाद्यं कार्यद्रव्यम्, अनुत्पाद्यं च परमाणुद्रव्यम्, अतः द्रव्यस्यापि गुणत्वं प्रसज्यते। एतत्सर्वं कैयटाचार्येण प्रदीपव्याख्यायामुक्तमस्ति।[2] अतो द्रव्यस्यापि गुणत्वं यथा न स्यात् एतदर्थं महाभाष्यकारो गुणलक्षणे 'सोऽसत्त्वप्रकृतिर्गुणः'[3] इत्यपि निवेशितवान्। एवं कृते सति नास्ति कुत्रापि दोषः। अत्राऽसत्त्वप्रकृतिरित्यस्य अद्रव्यस्वभावः इत्यर्थः। अत एवोक्तं **'द्रव्यादन्यो गुणः स्मृतः'** इति।[4]

---

[1] 'क्रियायास्तु पूर्वोक्तलक्षणयोगात् गुणत्वं प्राप्नोति। साऽपि द्रव्ये निविशते, कदाचित् द्रव्यान्निवर्तते। निष्क्रियं च द्रव्यं कदाचिद् भवति, कदाचित् सक्रियम्, विभिन्नजातीयानि च द्रव्याणि आश्रयतीति। महाभाष्यप्रदीपः 4-1-44

[2] 'एवन्तु द्रव्यस्यापि गुणत्वं प्राप्नोति, अवयवि द्रव्यम् अवयवेषु द्रव्येषु निविशते असमवायिकारणसंयोगनिवृत्तौ च विनाशात् ततोऽपैति, भिन्नजातीयेषु हस्तपादादिषु दृश्यते। द्विविधं च तन्नित्याऽनित्यभेदेन। निरवयवस्य द्रव्यात्मपरमाण्वादेः नित्यत्वादवयविद्रव्यस्याऽनित्यत्वात् इति महाभाष्यप्रदीपः 4-1-44

[3] महाभाष्यम् 4-1-44

[4] तत्रैव, 4-1-44

किञ्च गुणः द्रव्यगतं यल्लिङ्गं वचनं च भवति तद् लिङ्गं वचनं च गृह्णाति, परन्तु यद् द्रव्यं भवति तद् द्रव्यान्तरस्य लिंङ्गं वचनं वा नादत्ते। एतेन सर्वलिङ्गानां वाचको यः शुक्लादिशब्दः सः यल्लिङ्गकं द्रव्यं भवति, तस्य लिङ्गं वचनं च गृह्णाति। अत एव शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लो गौः इति व्यवहारो भवति।[1] अत आह – 'वाचकः सर्वलिङ्गानाम्' इति।[2]

तदेवं महाभाष्यकारेण श्लोकद्वयेन परिभाषितो गुणः सर्वलिङ्गवाचकः असत्त्वप्रकृतिकः, आधेयः, अक्रियाजः, द्रव्ये निविशमानः, निवर्तमानश्चेति वर्तते। अर्थात् – **'जाति-क्रिया-द्रव्यभिन्नत्वे सति समवेतत्वम्'** इति गुणलक्षणं वक्तुं शक्यते। लक्षणेऽस्मिन् समवेतपदनिवेशाद् अभावस्य स्वतो निरसः भवति। तथा तार्किकाभिमतविशेषनिरासायात्र तद्भिन्नमपि निवेशनीयम्। अतो **'द्रव्य-जाति-क्रिया-विशेषभिन्नत्वे सति समवेतत्वमिति गुणलक्षणस्वरूपमागतम्।'**

परन्तु एतल्लक्षणस्वीकारेऽपि पुनरत्र शङ्केयं जायते यत् यथा रूपरसगन्धस्पर्शाः गुणाः आम्रादिद्रव्ये निविशमानाः निवर्तमानाश्च लक्ष्यन्ते न तथा कठोरमृदुपटुप्रभृतयो गुणाः कस्मिंश्चिद् द्रव्ये निविशन्ते न च ततो निवर्तन्ते अतः 'सत्त्वे निविशतेऽपैति' इत्यादिलक्षणेन कठोरमृदुपटुप्रभृतीनां संग्रहाभावादत्र पारतन्त्र्यलक्षणो गुणः अङ्गीकर्तव्यः। उपर्युक्तलक्षणे च पारतन्त्र्यलक्षणगुणस्य चर्चा भाष्यकृता कण्ठतो न कृता। किन्तु अन्यत्र 'तस्य भावास्त्वतलौ'[3] इति सूत्रभाष्ये इदमाशङ्कितं यत् 'किं पुनर्द्रव्यम् ? के गुणाः ? इति। तथा समाहितमपि यत् 'शब्दस्पर्शरूपरसगन्धाः गुणाः ततोऽन्यद्द्रव्यम्' इति।[4] महाभाष्यकारस्य शङ्कासमाधानमेतत् द्रव्येषु परतन्त्रतया स्थितानां शब्दस्पर्शरूपरसगन्धानामपि गुणत्वं साध्नोति। अनेन प्रकारेण

---

[1] यदसौ द्रव्यं श्रितो भवति गुणः, तस्य यल्लिङ्गं वचनञ्च तद्गुणस्यापि भवति। इति महाभाष्यम्। अनेकमन्यपदार्थे 2-2-24

[2] महाभाष्यम् 4-1-44

[3] अष्टाध्यायी 5-1-119

[4] महाभाष्यम् 5-1-119

गुणानां पारतन्त्र्यं (द्रव्याधीनत्वम्) इति स्वरूपमपि समक्षमायाति। समर्थः पदविधिः[1] इति सूत्रभाष्ये 'वीरपुरुषः' इत्यत्र प्रदर्शितः समासोऽपि इदमेव साधयति यत् वीरत्वगुणः पुरुषाधीनोऽस्ति। तदा एव तत्र एकार्थीभावरूपसामर्थ्यं तदैवात्र समासोऽपि भवति, नान्यथा।[2] कैयटाचार्येणापि पराश्रयस्य जात्यादेरपि गुणत्वमुक्तम्।[3] कथनस्यास्य तात्पर्यमिदमस्ति यत् शब्दशास्त्रे सोऽपि गुणो भवति यः परतन्त्रतया गृहीतो भवति। यथा 'धनमानय' इत्यत्र आनयनक्रियायां धनस्य पारतन्त्र्यम्, तेन धनमपि गुणः, न च धनमुपर्युक्तगुणलक्षणेन गृहीतुं शक्यते। अतः परतन्त्रतया (पराश्रयतया) यत्किमपि स्यात् तत्सर्वमपि परतन्त्रलक्षणलक्षितो गुणो भवतीति गम्यते।[4]

किञ्च गुणभेदेन द्रव्यस्य भेदव्यवहारो जायते, यथा – शुक्लमिदं वस्त्रम्, रक्तो घटः, दण्डी पुरुषः, धनी व्यक्तिः।[5] एकमेव उदकद्रव्यं गुणभेदेन तस्य अन्यत्वव्यवहारो जायते।[6] अतो भेदकाः गुणाः इति पक्षः महाभाष्ये दृश्यते। अत्र आश्रियमाणगुणो भेदको भवतीति तात्पर्यम्।

---

[1] अष्टाध्यायी 2-1-1

[2] 'यदि द्रव्यं पदार्थः, भवति तदासामर्थ्यम्, अन्यो हि वीरत्वं गुणः, अन्यो हि पुरुषत्वम्' इति महाभाष्यम् 2-1-1

[3] 'एतच्चोपलक्षणम्, पराश्रयस्य सर्वस्य भेदकस्य जात्यादेरिह गुणत्वे अभिमतत्वात्' इति महाभाष्यप्रदीपः 5-1-119

[4] 'धनादीनां साकाङ्क्षत्वात् भेदकत्वात् क्रियायां पारतन्त्र्याच्च गुणत्वम्। यथा शुक्लमित्युक्ते किं तदिति नित्यं द्रव्यमाकाङ्क्षति शुक्लं च वस्त्रमिति द्रव्यस्य भेदकं शुक्लमानयेत्युक्ते क्रियायां द्रव्यपरतन्त्रम्। द्रव्यानयनमन्तरेण गुणाऽनयनाऽसम्भवादिति शौक्ल्यं गुणः। धनमानयेत्युक्ते गवादिद्रव्याऽनयनात् क्रियायां पारतन्त्र्यं धनं गुणः' इति महाभाष्यप्रदीपः 5-1-59

[5] 'आश्रियमाणो गुणो भेदको भवति, तद्यथा – शुक्लमालभेत, न हि तेन यथोक्तं कृतं भवति' इति महाभाष्यम् 1-1-1

[6] 'एवं हि दृश्यते लोके, एकोऽयमात्मा उदकं नाम, तस्य गुणभेदात् अन्यत्वं भवति-अन्यदिदं शीतम्, अन्यदिदमुष्णम्' इति महाभाष्यम् 1-1-1

'अभेदकाः गुणाः'[1] इति वृद्धिरादैच्[2] इति सूत्रस्थमहाभाष्यस्य तु तात्पर्यमिदमस्ति यत् यथा एकस्मिन्नेव चैत्रे बाल्याद्यवस्थाभेदसत्त्वेऽपि भेदो न गृह्यते, स एव चैत्रो वार्द्धक्याद्यवस्थायामपि भवति। अत्र चैत्रो बाल्याद्यवस्थाभेदे सत्त्वेऽपि चैत्रेत्याख्यां न जहाति। परन्तु 'अयं स एव चैत्रः यो बाल्ये दृष्टः' इति बोधो जायते। किञ्च मुण्डी, जटी, शिखीत्यादिगुणभेदेनाऽपि चैत्रस्य भेदो न भवति किन्तु मुण्डी यश्चैत्रः स एव शिखी जट्यपि भवति। तथा च गुणानां भेदेऽपि न द्रव्यस्य भेदो भवति।

महाभाष्ये गुणशब्देन केवलगुणवाची शब्दोऽपि गृह्यते, यस्तु गुणवाची सन् गुणिनं बोधयति, न स तेन गृहीतो भवति। अत एव 'पूरणगुणे'त्यादिसूत्रभाष्ये द्रव्याद् गुणस्य भेदोपपत्तये षष्ठ्या विभक्त्या भेदो दर्शितः भाष्यकृता।[3] तद्यथा – **ब्राह्मणस्य शुक्लाः, काकस्य कार्ष्ण्यम्, कण्टकस्य तैक्ष्ण्यम्** इति। कुत्रचित् विशेष्यपदस्याऽभावात् शुक्लादिशब्दाः अपि गुणमात्रवचनाः दृश्यन्ते। अत एव शुक्लादीनां शब्दत्वमाशङ्क्य तेषां गुणत्वमुक्तं महाभाष्यकृता– **'यत्तर्हि तत् शुक्लो नीलः कपिलः कपोतः सः शब्दः ? नेत्याह गुणो नाम सः'** इति[4]। गुणशब्दस्य प्रयोगो महाभाष्ये बहुषु अर्थेषु दृश्यते। अत एवोक्तं पतञ्जलिना – **'गुणशब्दोऽयं बह्वर्थः'। अस्त्येव समेषु अवयवेषु वर्तते। तद्यथा द्विगुणा रज्जुः, त्रिगुणारज्जुरिति, अस्ति द्रव्यपदार्थः तद्यथा – योऽत्राप्रधानं भवति स आह गुणभूताः वयमत्र। अस्त्याचारे संस्कारे तद्यथा – संस्कृतमन्नं गुणवदित्युच्यते**, इति।

---

[1] 'ननु च अभेदकाः अपि गुणाः दृश्यन्ते, तद्यथा देवदत्ते मुण्ड्यपि जट्यपि शिख्यपि स्वाख्यां न जहाति, तथा बालो, युवा वृद्धो वत्सो दम्यो बलीवर्द' इति महाभाष्यम् 1-1-1

[2] अष्टाध्यायी 1-1-1

[3] 'गुणस्य किमुदाहरणम् ? ब्राह्मणस्य शुक्लाः, वृषलस्य कृष्णाः, इति नैतदस्ति प्रयोजनम्, इदं तर्हि काकस्य कार्ष्ण्यम्, कण्टकस्य तैक्ष्ण्यम्, बलाकायाः शौक्ल्यम्, इदञ्चाप्युदाहरणं ब्राह्मणस्य शुक्लाः, वृषलस्य कृष्णाः इति' महाभाष्यम् 2-1-11

[4] पस्पशाह्निकं महाभाष्यम्

तदेवं शाब्दिकशास्त्रे गुणो द्विविधः – लौकिकः शास्त्रीयश्च। तत्राद्यस्तावत् रूपरसगन्धस्पर्शादयः न्यायवैशेषिकदर्शने प्रसिद्धाः। सत्त्वरजस्तमसां परिणामभूताः शब्दस्पर्शरूपरसगन्धतन्मात्रारूपा अतिसूक्ष्माः तेषामपि परिमाणाः स्थूलाः शब्दस्पर्शादयः सांख्यवेदान्तादिशास्त्रे प्रसिद्धाः। व्याकरणेऽपि पाणिनीये तन्त्रे रूपादयो गुणविशेषाः बहुशो व्यवहृताः। तद्यथा – 'सत्यापपाशरूपवीणातूल' इति सूत्रे रूपग्रहणम्, 'रसादिभ्यश्च' इति सूत्रे रसग्रहणम्, 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' इत्यत्र गन्धग्रहणम्, द्रवमूर्तिस्पर्शयोः श्यः, इत्यत्र स्पर्शग्रहणम्, 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इत्यत्र ध्वनिरूपशब्दस्य, 'स्नेहे तैलच्' इत्यत्र स्नेहस्य, परिमाणान्तस्यासंज्ञाशाणयोः इत्यत्र परिमाणग्रहणं, संख्यायाः अतिशदन्तायाः कन् इत्यत्र संख्याशब्दस्य, 'पृथग्विनानानाभि'रित्यत्र पृथक्शब्दस्य, तस्य निमित्तं संयोगोत्पातौ इत्यत्र संयोगस्य कालविभागे चानहोरात्राणाम् इत्यत्र विभागस्य, परश्च इत्यत्र परत्वस्य, पूर्वपरावरदक्षिणोत्तरापराधराणि इत्यत्र परत्वापरत्वस्य, बह्वादिभ्यश्च इत्यत्र बह्वादिगणे गुरुत्वस्य, द्रवमूर्तिस्पर्शयोः श्यः इत्यत्र द्रवत्वस्य, 'सुखादिभ्यः कर्तृवेदनायाम्' इत्यत्र सुखस्य, दुःखात्प्रातिलोम्ये इत्यत्र दुःखस्य, 'धातोः कर्मणः समानकर्तृकादिच्छायां वा, इत्यत्रेच्छायाः, क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रतिकोपः, इत्यत्र कोपस्य, धर्मं चरति, इत्यत्र धर्मस्य, अधर्माच्चेति वक्तव्यम्' इत्यत्र अधर्मस्य, 'भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः' इत्यत्र ज्ञानयत्नयोः, संस्कृतम् इत्यत्र संस्कारस्य च ग्रहणं कृतं वर्तते।

शास्त्रीयगुणस्तु 'अदेङ् गुणः' इत्यत्र संकेतितः अकारादिः गुणः। कुत्रचित्तु विशेषणतया भासमानधर्मो गुणपदेन गृह्यते। तद्यथा – 'तृतीया तत्कृतार्थेन गुणवचनेन' इत्यादौ। एवमेव गुणकृतसादृश्ये गुणशब्दः बाह्यप्रयत्नार्थः, इत्येव गुणस्वरूपं विवेचितमस्ति।

**आचार्यभर्तृहरिमतेन गुणपदार्थानुशीलनम्**

आचार्यभर्तृहरिमतेन वाक्यपदीयानुसारं यदा गुणपदार्थस्वरूपं विवेचयामस्तर्हि तत्र पदकाण्डे गुणसमुद्देशे एवमाह भर्तृहरिः –

**संसर्गि भेदकं यद्यत् सव्यापारं प्रतीयते।**
**गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम्।।**[1] इति।

अस्यार्थोऽयमस्ति यत् न्यायवैशेषिकदर्शनानुसारं यद् यद् रूपरसादिकं गुणत्वेन तथा सामान्यादिकं धर्मिपरतन्त्रत्वेन प्रसिद्धं तत् तत् संसर्गि अर्थात् स्वस्य आधारेण सह संसृष्टम्, भेदकम् = शुक्लादिगुणवत् गौरयं नाश्वः इत्येवं वा स्वाधारस्य द्रव्यान्तराद् व्यवच्छेदकम्, सव्यापारम् = व्यावर्तकत्वरूपव्यापारविशिष्टम्, प्रतीयते = प्रतीयमानमस्ति तत् तस्य एव परतन्त्रत्वात् = धर्मिपराधीनतत्वात् शास्त्रे समर्थसूत्रभाष्ये[2] गुणत्वमुदाहृतम्[3] इति।

कथनस्य तात्पर्यमिदमस्ति यत् भर्तृहरिमते गुणः संसर्गी वर्तते, अर्थात् गुणः स्वाश्रये समवेतः सन् विश्रान्तो भवति। अस्मादेव कारणात् सः व्यावर्तकत्वरूपव्यापारविशिष्टो गुणः स्वाश्रयम् अन्येभ्यः पृथक्करोति। धर्मिपराधीनत्वात् पराश्रितत्वाद् वा अयं गुणः परतन्त्रो भवति।

---

[1] वाक्यपदीयपदकाण्डे गुणसमुद्देशकारिका-1

[2] समानाधिकरणेषूपसंख्यानमसमर्थत्वात्। समानाधिकरणेषु उपसंख्यानं कर्तव्यम् वीरः पुरुषो वीरपुरुषः। किं पुनः कारणं न सिद्ध्यति ? असमर्थत्वात्। कथमसामर्थ्यम् द्रव्यं पदार्थः इति चेत्। यदि द्रव्यं पदार्थो, न भवति तदा सामर्थ्यम्। भेदाऽभावात्। अथ हि गुणः पदार्थः, भवति तदा सामर्थ्यम्, अन्यो हि वीरत्वं गुणः, अन्यो हि पुरुषत्वम्। नान्यत्वमस्तीति इयता सामर्थ्यं भवति। अन्यो हि देवदत्तो गोभ्यश्चाश्वभ्यश्च। न चैतस्यैतावता सामर्थ्यं भवति को वा विशेषो यद् गुणे पदार्थे सामर्थ्यं स्यात् द्रव्ये च न स्यात्। एष विशेषः। एकं तयोरधिकरणम्। अन्यश्च वीरत्वं गुणः, अन्यः पुरुषत्वम्। द्रव्यपदार्थिकस्यापि तर्हि गुणभेदात् सामर्थ्यं भविष्यति इति महाभाष्यम्। समर्थः पदविधिः 2-1-1

[3] द्रव्यं पदार्थः इति पक्षः स्वीक्रियते चेत् समानाधिकरणेषु 'वीरपुरुषः' इत्यादिषु समासस्योपसंख्यानं कर्तव्यम् असमर्थत्वात्। अनेकस्यार्थस्यैकार्थभवनं हि एकार्थीभावरूपं सामर्थ्यमिति। इत्येवं 'वीरपुरुषः' इत्यादिषु समानाधिकरणसमासेषु वीरपुरुषपदार्थयोर्द्रव्ययोरत्यन्तमभेदात्। सामर्थ्याभावे सति द्रव्यपदार्थपक्षे समासाभावे चोदिते=आशङ्किते। अथ हि गुणः पदार्थो भवति तदा सामर्थ्यम्। अन्यो हि वीरत्वं गुणः, अन्यो हि पुरुषत्वम् इति द्रव्ये समवायाज्जातेरपि पारतन्त्र्यात् गुणत्वमुक्तम्। तथा च द्रव्यस्यैकत्वेऽपि तदाश्रितयोर्वीरत्व-पुरुषत्वयोर्गुणयोर्भेदात् तन्निमित्तकं तत्र भेदमादाय तत्र प्रतीयमानं सामर्थ्यमिति तत्र समानाधिकरणसमासः सिद्धः। इति अम्बाकर्त्रीव्याख्या, वाक्यपदीयपदकाण्डे गुणसमुद्देश कारिका-1

अतः परतन्त्रतया भेदकतया च यस्य बोधो भवति सः गुणः। अत एव हेलाराजोऽपि परतन्त्रत्वं भेदकत्वञ्च मुख्यं गुणलक्षणमस्ति इति सम्यगाह।[1]

अग्रे पुनः भर्तृहरिः गुणविषये एवमाह यत् किमपि वस्तु आत्मना एव आत्मानं परिच्छेत्तुं न शक्नोति। वस्तु स्वगुणमादाय एव स्वप्रकर्षस्य बोधं कारयति। तथाहि –

**'द्रव्यस्याव्यपदेशस्य य उपादीयते गुणः। भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयते।।'**[2] इति।

अस्यायमर्थो यत् अव्यपदेशस्य = व्यपदेशानर्हस्य निरूपयितुमशक्यस्य द्रव्यस्य व्यपदेशाय द्रव्यस्य अन्यस्माद् व्यवच्छेदको यो गुणः उपादीयते = शब्देन गृह्यते, तत्प्रकर्षः तत्कृतो द्रव्यस्य प्रकर्षः प्रत्ययेन तरप्तमबादिना अभिधीयते। यथा – शुक्लतरः पटः, अत्र शुक्लगुणनिमित्तो द्रव्यप्रकर्षः। संसर्गिभिः गुणादिभिरेव विशेष्यमाणं द्रव्यं सजातीयात् द्रव्यात् प्रकृष्यते। इति अम्बाकर्त्री व्याख्यायां सुस्पष्टम्। अत एव च ब्रह्मकाण्डेऽपि दृश्यते –

**गुणप्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते। तस्याश्रितगुणादेव प्रकृष्टत्वं प्रतीयते।।**[3] इति।

'शुक्लतरः पटः' इत्यत्र स्वतः पटरूपद्रव्यस्य न प्रकर्षोपकर्षौ किन्तु गुणप्रकर्षादेव, इति यो द्रव्यप्रकर्षहेतुः गुणः शुक्लादिः स्वातन्त्र्येण उपदिश्यते तस्य शुक्लरूपस्य अश्रितात् संसर्गिभेदकत्वेन विवक्षितात् गुणात् शुक्लत्वरूपधर्मात् एव प्रकृष्टत्वं प्रतीयते। यथा – निरुपाधिनः निर्गुणस्य द्रव्यस्य प्रकर्षो नास्ति तथा द्रव्यान्निष्कृष्टस्य स्वतन्त्रस्य गुणस्यापि शुक्लतरं रूपतरं रूपमिति स्वतः प्रकर्षो नास्ति अपितु तदवस्थायां द्रव्यायमाणत्वात् गुणस्य संसर्गिधर्मान्तरनिमित्त एव प्रकर्षः। अत एवोक्तं भर्तृहरिणा –

**सर्वस्यैव प्रधानस्य न विना भेदहेतुना। प्रकर्षो विद्यते नापि शब्दस्योपैति वाच्यताम्।।**[4] इति।

अर्थात् प्रधानस्य द्रव्यस्य गुणस्य वा सर्वस्य एव तरबादिप्रत्ययोत्पत्तिहेतुभूतः प्रकर्षः

---

1 'संसर्गि भेदकं यद्यत्' इति हि लक्षणम्। 'भेदकत्वं चात्र मुख्यं लक्षणम्' इति हेलाराजः, वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-2

2 वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-2

3 वाक्यपदीयब्रह्मकाण्डे कारिका-64

4 वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-3

भेदहेतुना व्यवच्छेदकस्वगतविशेषेण विना न विद्यते, नापि स्वगतः सर्वो विशेषः शब्दस्य वाच्यतामुपैति। शब्दस्य क्वचिदेव स्वप्रवृत्तिनिमित्तभूते विशेषे एव वाच्यतामुपैति। यथा – शुक्लशब्देन शुक्लत्वगुणरूप एव शुक्लद्रव्यगतो विशेषोऽभिधीयते। गुणाभिधायिना तु शुक्लशब्देन स्वगतो जातिरूप एव विशेषोऽभिधीयते। न तु भासुरत्वादिरूपाः विशेषाः अभिधीयन्ते।

अत्रैव विचार्यते यत् प्रत्येकार्थस्य कृते प्रत्येकशब्दाभिनिवेशः अर्थात् प्रत्यर्थं शब्दाभिनिवेशः इति भाष्यसिद्धान्तमाश्रित्य भासुरत्वादयोऽर्थाः न शुक्लशब्दस्य वाच्याः, तेषां तत्प्रवृत्तिनिमित्तत्वाभावात्। अतः शुक्लतरं रूपमित्यत्र शब्दावाच्यप्रतीयमान-भासुरत्वादि-धर्मनिमित्तके प्रकर्षे अनेकोपाधिसन्निधानात् किमुपाधिकृतोऽयं प्रकर्षः इति अनियमः स्यात् एतदर्थमाह **भर्तृहरिः** –

**विद्यमानाः प्रधानेषु न सर्वे भेदहेतवः।**
**विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिभिः।।**[1] इति।

अस्यायमभिप्रायः यत् प्रधानेषु = प्राधान्येन शब्दवाच्येषु ये अनेके भेदहेतवः = व्यवच्छेदहेतवः सन्ति ते सर्वे व्यावृत्तार्थाभिः शब्दैः तत एव हेतोः नोच्यते। तेषां सर्वेषां विशेषाणां प्रतिनियतव्यावृत्तिविशिष्टार्थाभिधायिभिः शब्दैः असम्बन्धात्। तस्माद् अभिधीय-मानधर्म-समानाधिकरणप्रतीयमानधर्मनिमित्तक एव गुणस्य प्रकर्षः इति शुक्लतरं रूपमित्यत्र अभिधीयमानशुक्लत्वजातिसमानाधिकरणतदविनाभूतप्रतीयमानभासुरत्वादिधर्मनिमित्तक एव प्रकर्ष इति नानियमः।

न शुक्लादिशब्दाः भासुरत्वादिषु संकेतिता इति न ते तदर्थाभिधायिनः। तस्मात् शुक्लतरं रूपमस्येत्यादौ शब्दानुपात्तप्रतीयमानभास्वरत्वादिधर्महेतुक एव प्रकर्षः इति प्रयोगप्रामाण्यान्निश्चीयताम्। 'शुक्लतरः पटः' इत्यादौ तु शब्दोपात्तशुक्लादिगुणहेतुको द्रव्ये प्रकर्षः। शुक्ले गुणे त्वनुपात्तभासुरत्वादिगुणहेतुकः प्रकर्षः इति परम्परा इति

---

[1] वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-4

अम्बाकर्त्रीव्याख्यायां स्पष्टम्।[1]

व्यपदेशानर्हस्य द्रव्यस्य संसर्गिधर्मरूपगुणरूपनिमित्तापेक्षा स्वतः व्यपदेशप्रवृत्तिः, तत्रैव व्यपदेशे संसर्गिणः सामर्थ्योपक्षयात् प्रकर्षेऽपि कथं तस्य संसर्गिधर्मस्य व्यापारः कल्प्यते इत्याशंक्य भर्तृहरिणा स्वयमेवोक्तं यत् –

**वस्तूपलक्षणे तत्र विशेषो व्यापृतो यदि। प्रकर्षो नियमाऽभावात् स्यादविज्ञातहेतुकः।।**[2] इति।

अर्थात् 'शुक्लतरः पटः' इत्यादौ वस्तूपलक्षणे एव यदि विशेषः शुक्लत्वादिः गुणो व्यापृतः न तु प्रकर्षेऽपि, तदा प्रकर्षस्य नियामकाभावात् प्रकर्षोऽविज्ञातहेतुकः स्यात् (अयमेव विशेषोऽत्र प्रकर्षहेतुरिति विशेषणज्ञानं निश्चयात्मकं न स्यात्) तथा च गरिमादि गुणेनापि 'शुक्लतरः पटः' इति प्रतीयेत।

तात्पर्यमिदमस्ति यत् द्रव्यस्य सजातीयात् व्यवच्छेदे उपाधिभूतस्य विशेषस्य शुक्लत्वादेः वस्तुनिर्देशमात्रचरितार्थत्वे वस्तुव्यपदेशमात्र एव हेतुत्वे यः शुक्लो दृष्टः स गरिमादिना प्रकृष्टः शुक्लतरः प्रतीयेत। तथा च शुक्लत्वादिरूपो नियतो विशेषः प्रकर्षस्य निमित्तं न ज्ञायेत। परन्तु नैवं प्रसिद्धिरस्ति। शुक्लगुणनिमित्तस्यैव प्रकर्षस्य शुक्लतरः पट इति वाक्यादवबोधो भवति। तथा च शुक्लतरः पटः इति प्रतीतिमनुसृत्य व्यपदेशहेतोरेव विशेषस्य प्रकर्षेऽपि व्यापारः कल्पयितुं न्याय्यः इति अम्बाकर्त्री व्याख्या।[3]

इदमिदानीं विचार्यते यत् प्रकर्षद्योतकोऽयं तरप्प्रत्ययः निकृष्टे प्रकर्षाभावात् निकृष्टतरः इति तथा प्रकृष्टे च पुनः प्रकर्षान्तराभावात् प्रकृष्टतरः इति निकृष्टप्रकृष्टाभ्यां शब्दाभ्यां कथं स्यात् ? एतदेव समाधातुमाह वाक्यपदीयकारः –

**सर्वं च सर्वतोऽवश्यं नियमेन प्रकृष्यते। संसर्गिणा निमित्तेन निकृष्टेनाधिकेन वा।।**[4] इति।

अस्यायमभिप्रायोऽस्ति यत् सर्वं च निकृष्टं प्रकृष्टं वा वस्तु संसर्गिणा निकृष्टेन गुणेन

---

[1] अम्बाकर्त्री व्याख्या, वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-4

[2] वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-5

[3] अम्बाकर्त्री व्याख्या, वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-5

[4] वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-6

अथवा अधिकेन = प्रकृष्टेन गुणेन निमित्तेन सर्वतः = निकृष्टात् प्रकृष्टात् वा अवश्यं नियमेन प्रकृष्यते। तद्यथा जात्यादौ द्वौ निकृष्टौ, तयोरेको नीचकर्मणापि निकृष्ट इति नीचकर्मनिमित्तकः तत्र निकृष्टे प्रकर्षः। एवमेव जात्या द्वौ प्रकृष्टौ तयोरेकः शोभनेन कर्मणापि प्रकृष्ट इति शोभनकर्मनिमित्तकस्तत्र प्रकृष्टे प्रकर्षः इति यथायथं निकृष्टतरः प्रकृष्टतरः इति प्रयोगोपपत्तिः भवतीति तात्पर्यम्। एवमेव शुक्लतरं रूपमित्यादौ गुणप्राधान्येऽपि भासुरत्वादि-रूपापरधर्मनिमित्तकं प्रकर्षं सूचयति इति भावः।

अत्र पुनः प्रश्नोऽयं जागर्ति यत् इह शाब्दे व्यवहारे लोके गोतरा इति प्रयोगो दृश्यते। तत्र जातेः सजातीयात् व्यवच्छेदकत्वाभावात् न जातिनिमित्तकः प्रकर्षः सम्भवति। न च तदतिरिक्तं निमित्तमत्र 'गोतरा' इत्यत्र गोनिष्ठे प्रकर्षे सव्यापारं प्रतीयते, अतो निर्निमित्तोऽत्र प्रकर्षो द्रव्यस्य वाच्यः। एवं 'शुक्लतरः पटः' इत्यादावपि द्रव्यस्य प्रकर्षो निर्निमित्त एव भविष्यति। अतः गुणहेतुकः प्रकर्षः कथं समुद्घोष्यते ? एतदर्थमाह भर्तृहरिः –

**नोपेक्षते निमित्तं च प्रकर्षे व्यापृतं यदि। द्रव्यस्य स्यादुपादानं प्रकर्षं तु अनर्थकम्।।**[1] इति।

अस्य तात्पर्यमिदमस्ति यत् यदि अपचयोपचयसम्बन्धायोग्यं परिनिष्ठितरूपं द्रव्यं स्वनिमित्तकं प्रकर्षं नानुभवति, यदि च स्वोपाधिरूपं स्वप्रकर्षे व्यापृतं निमित्तमपि न अङ्गीकरोति तदा प्रकर्षं प्रति प्रकर्षबोधनाय 'शुक्लतर' इति रूपेण द्रव्यस्य = द्रव्यबोधकशब्दस्य उपादानमनर्थकं स्यात्। अतः प्रयोगप्रामाण्यात् यथोपपत्तिप्रकर्षः अनुविधेयः इति व्यपदेशहेतुस्वसंसर्गिवाच्यधर्मनिमित्तक एव सर्वत्र गुणोपाधिकद्रव्याभिधाने 'शुक्लतरः पटः' इत्यादौ व्यवस्थाप्यः।

अर्थात् 'गोतरा' इत्यादौ जात्युपाधिकद्रव्याभिधाने तु जातेः व्यपदेशहेतुभूतायाः प्रकर्षहेतुत्वासम्भवे यथा शुक्लतरं रूपमित्यत्र व्यपदेशहेतुना सह एकार्थसमवेतप्रतीयमान-भासुरत्वादिधर्मनिमित्तकः प्रकर्षो व्यवस्थाप्यते, तथा 'गोतरा' इत्यत्रापि व्यपदेशहेतुना सह

---

[1] वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-7

एकार्थसमवेतात् प्रतीयमानात् वाहदोहदादेर्धर्मात् प्रकर्षो व्यवस्थाप्यः, अत एव प्रकृष्टवाहदोहो गौः 'गोतरा' इति भण्यते इति अम्बाकर्त्री व्याख्यायां सुस्पष्टम्।[1]

'शुक्लतरः पटः' इत्यत्र गुणप्रकर्षस्य द्रव्यप्रकर्षं प्रति निमित्तत्वं ज्ञापकत्वमेव न तु कारकत्वम् अनेन हि गुणप्रकर्षस्यैव भानमिति प्रतीयते, अत आह –

**सव्यापारो गुणस्तस्मात् स्वप्रकर्षनिबन्धनः। द्रव्यात्मानं भिनत्त्येव स्वप्रकर्षं निवेशयन्।।**[2] इति।

स्वप्रकर्षनिबन्धनो हि गुणो द्रव्यप्रकर्षे सव्यापारः, अत एव स्वप्रकर्षं द्रव्ये निवेशयन् द्रव्यात्मानं भिनत्ति = व्यवच्छिनत्ति। द्रव्यस्य स्वतो निरतिशयत्वात् जातेश्च सजातीयव्यवच्छेदकत्वेन तत्कृतप्रकर्षस्यापि तत्राभावात् स्वनिमित्तभूतप्रकर्षाधानोद्युक्तः संसर्गिलक्षणो गुणः स्वगतप्रकर्षहेतुकेन द्रव्यप्रकर्षेण विशेषेण द्रव्यस्य आश्रयान्तराद् व्यवच्छेदं विदधाति इति भावः।

गुणस्य प्रकर्षेण द्रव्यं प्रकृष्टं कथं भवति ? इति जिज्ञासायामाह भर्तृहरिः –

**'अरूपं पररूपेण द्रव्यमाख्यायते यथा। अप्रकर्षं प्रकर्षेण गुणस्याविश्यते तथा।।'**[3] इति।

रूप्यते व्यपदिश्यते द्रव्यं येन तद् रूपम् उपाधिः जातिगुणादिकम्, तद्रहितम् अरूपं द्रव्यस्वरूपं यथा पररूपेण परस्य जात्यादेः रूपेण स्वरूपेण यथा आख्यायते तथा स्वतोऽप्रकर्षं द्रव्यं कर्मभूतम्, गुणस्य प्रकर्षेण कर्त्रा आविश्यते प्रविश्यते इति भावः।

जात्यादिरूपस्य उपाधेः तदुपहितस्य द्रव्यस्य च यो विवेकः = पृथग्भावः भेदो वा तस्य तयोस्तादात्म्यप्रत्ययेन दुरवधारत्वात् तयोः संकरः = नीरक्षीरयोरिव सम्मेलनम् इति शाब्दे व्यवहारे गुणप्रकर्षो गुणिनि=गुणतादात्म्यापन्ने द्रव्ये विश्राम्यति। अतः गुणस्य प्रकर्षेण द्रव्यं प्रकृष्टमिति व्यवहारो भवति।

❑❑❑

---

[1] अम्बाकर्त्री व्याख्या, वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-7

[2] वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-9

[3] वाक्यपदीयपदकाण्डे गुणसमुद्देशे कारिका-9

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# संस्कृतभाषायां वाचोयुक्तिः - काचित् वैयाकरणदृष्टिः

(Idioms in Sanskrit - A Grammatical Perspective)

**डा. गोपीकृष्णन् रघुः***

## भूमिका

इह खलु जगति जेगीयमानासु भाषासु विवक्षितार्थप्रकाशनाय विभिन्नपदगुम्फनरीतिः, वक्रताभूषिताः प्रकारविशेषाः समाश्रीयन्ते। सर्वास्वपि भाषासु कानिचित् पदानि केचित् पदबन्धाश्च आपाततः प्रतीयमानात् अर्थात् भिन्नम् अर्थ बोधयन्ति । एते च आइलभाषायाम् 'ईडियम्' (Idiom) इति, हिन्दीभाषायां मुँहावर' इति च अभिधीयन्ते। 'ईडियम्' इत्यस्य अर्थः आङ्ग्लभाषायाम् Oxford Dictionary इत्यभिधे शब्दार्थकोशे' A form of expression peculiar to a language इति दर्शितः। 'Idiom is a group of words making a peculiar expression which is an important part in all language'.

## विचारसङ्गतिः

ईदृशाः प्रयोगाः वस्तुतः बहवो बभूवुः संस्कृतभाषायामपि। शिष्टप्रयुक्ताः अपि एते भवन्ति, यतः एतेषां व्युत्पादनं पाणिनिशास्त्रे अवलोक्यते। संस्कृतविपश्चिद्भिस्तु तेषां परामर्शाय सङ्ग्रहणाय वा प्रयासः अद्यावधि न कृतः। आङ्लभाषादिषु तु व्याकरणाङ्गत्वेनैव ते अधीयन्ते। संस्कृतव्याकरणशास्त्रे तु यद्यपि एतेषां व्युत्पादने अस्त्येव प्रयासः, तथापि पृथग्वर्गीकरणे प्रयत्नः न कृतः, साधुत्वान्वाख्यानाय प्रवृत्तानाम् आचार्याणां तादृशशब्दविशेषवर्गीकरणेन साध्यप्रयोजनस्य अदर्शनात्। तद्वर्गीकरणेन साधुत्वान्वाख्यानाय किमपि नास्ति प्रयोजनम्।

* सहायकाचार्यः, संस्कृत-दर्शनविभागः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्था, बेलूरमठः, हाऊडा।

आलङ्कारिकैः तु काव्ये चमत्काराधायकत्वात् एतेषां परामर्शः कर्तव्यः आसीत्। सूक्ष्मदर्शिभिः एतैः अयं प्रकारः शब्दविशेषस्य न दृष्टः इति न शक्यते अभिधातुम्। किन्तु –

**पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा।**
**प्रौढिव्याससमासौ च साभिप्रायत्वमस्य च।।**

इति वदद्भिः रसगङ्गाधरकरैः उक्तलक्षणायां प्रौढौ अस्य अन्तर्भावः कृतः इति लक्ष्यते।

वक्रोक्तिकारेण कुन्तकेन तु स्फुटं वाग्विशेषस्यास्य चमत्कारजनकता दृष्टा इति अवसीयते। स हि स्वग्रन्थस्य प्रथमोन्मेषे- 'पदपूर्वार्धवक्रतायाः उपचारवक्रत्वं नाम प्रकारान्तरं विद्यते' इत्यधिधाय 'हस्तावचेयं यशः' इति उदाजहार। विस्तरस्तु तेनापि न दर्शितः इति अन्यदेतत्। अतोऽत्र मया कश्चन प्रयासः क्रियते तद्दिशि। तत्रादौ तल्लक्षणं निरूप्यते ततश्च तत्स्वरूपं किञ्चित्प्रदर्श्यते।

**संज्ञाविचारः**

'ईडियम्' इत्यस्य संस्कृते किं नामधेयं स्यादिति प्रश्ने प्राचीनास्तु मौनं भजन्ते। व्याकरणशास्त्रे तु शब्दशास्त्रीयप्रयोजनाभावात् न कापि संज्ञा कृता। आलङ्कारिकैः तु प्रौढिनामके गुणे पदवक्रतायां वा कथञ्चित् प्रवेशनात् अस्य विशेषतः प्रदिपादने यत्नः न कृतः। शास्त्रान्तराणामयं न विषयः इत्यतः नात्र प्रयासः दृश्यते। वस्तुतस्तु आधुनिकभाषाशास्त्रस्य अयं विषयः इति नूतनतया नामकरणस्य प्रयत्नः कृतः विद्वद्भिः। आधुनिकसंस्कृतपण्डितेषु प्रसिद्धाः पुल्लेलरामचन्द्रुडुमहोदयेन वचोविच्छित्तिः इति नाम्ना व्यवहारः कृतः दृश्यते। पण्डितप्रकाण्डैः रङ्गनाथशर्मवर्यैः तु वाचोयुक्तिः इति नाम्ना व्यवहारः कृतः दृश्यते।

मम तु एवं प्रतिभाति – 'वाचोयुक्तिः' इति युक्तं नामधेयम् इति। वाचो युक्तिः इति विग्रहः। समासे- 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इति षष्ठयाः अलुक्। युक्तिः, योगः, प्रयोगः इति अनर्थान्तरम्। प्रचीनेषु ग्रन्थेषु शब्दस्यास्य प्रयोगः बहुधा दृश्यते। यद्यपि प्राचीनैः 'ईडियम्' इत्यर्थे अयं शब्दः न प्रयुक्तः, तथापि तथा संज्ञाकरणे न किञ्चित् बाधकम्। तैरपि शब्दोऽयं शब्दविन्यासवैशिष्ट्यपरकतया एव प्रयुक्तः वर्तते। यथा महाभाष्ये का तर्हि इयं वाचोयुक्तिः इत्यसकृत् प्रयुङ्क्ते। समर्थश्च अयं शब्दः विवक्षितार्थबोधने, श्रवणहितश्च, संक्षिप्तश्च। उपर्युक्तवार्तिकेन साध्यमानौ दिशोदण्ड-पश्यतोहरशब्दौ च अर्थविशेषबोधकौ, न तु यौगिकार्थमात्रपरौ इत्यपि अवधेयम्। तावदेव न, वचोविच्छित्तिशब्दस्य अर्थः तु शब्दसौन्दर्यमिति। अतोऽनेन शब्देन न केवलं वाचोयुक्तयः किन्तु ततोधिकमपि बोद्ध्यते इत्यतः व्यापकः सः शब्दः।

**लक्षणम्**

अथ अस्याः वाचोयुक्तेः किं लक्षणम् ? वाचोयुक्तिः नाम लक्षणया व्यञ्जनया वा विलक्षणार्थप्रतिपादकतया रूढः शब्दविशेषः पदकदम्बो वा इति सामान्यं लक्षणं वक्तुं शक्नुमः। अर्थगतं वैलक्षण्यं, शब्दगतं वैशिष्ट्यं च सहृदयसंवेद्यमिति न क्वचित् अतिप्रसक्तिः। संक्षेपतः निर्देक्ष्यमाणः अयम् आकृतिगणो बोध्यः। शब्दानां विषये वाचकाः, लाक्षणिकाः, व्यञ्जकाश्च इत्यादिभेदानां प्रतिपादनं, विवेचनं च आङ्ग्लभाषायां न कृतम्। अथापि लाक्षणिकानां शब्दानाम् अतीवाधिकतया प्रयोगः तस्यां भाषायां दृश्यते येन भाषायां महत्सौन्दर्यं भावाविष्करणे च पाटवं संपाद्यते। Grass root level, bottle neck, tantalizing, in spite of, make it, make up, lose heart इत्यादयः सहस्रशः लाक्षणिकप्रयोगाः क्रियन्ते तस्यां भाषायाम्। इमे सर्वे प्रयोगाः वाचोयुक्तिपदभाजाः भवन्ति। अतोऽत्र उक्तं लक्षणं तेष्वप्यन्वेति इति न काप्यनुपपत्तिः।

**अत्र शङ्का समुत्पद्यते** - यदि लक्षणया व्यञ्जनया वा अर्थबोधकत्वं तर्हि लाक्षणिकात् शब्दात् व्यञ्जकाच्छब्दाच्च को भेदः इति। उच्यते- लाक्षणिकः शब्दः व्यञ्जकः शब्दः च

प्रकरणमनुसृत्य क्वचित् प्रधानं क्वचिदप्रधानञ्चार्थं बोधयतः। अयं तु न तथा। सर्वदैव स्वाभिव्यञ्जकमेवार्थं बोधयति न तु मुख्यमर्थम्। यथा- गङ्गायां घोषः इत्यत्र तीरार्थं बोधयन् गङ्गाशब्दः गङ्गायां स्नातीत्यादौ मुख्यं प्रवाहरूपमर्थं बोधयति। किन्तु वाचोयुक्तयः न कदाचिदपि स्वमुख्यमर्थं बोधयति। यथा- देवानांप्रियः इति शब्दः सर्वदैव अयोग्यपुरुषमेव बोधयति, न देवानां प्रियं पुरुषम्। यदि पृच्छ्यते निरूढलक्षणा अपि एवमेवार्थं बोधयतीति ततोऽस्य को भेदः इति तर्हि निरूढलक्षणायां स्वार्थपरित्यागः प्रायः भवति, यथा कुशलः इत्यत्र कुशलवनार्थस्य न कदाचिदपि भानं भवति, किन्तु दक्षः इत्यर्थस्यैव। एषु मुख्यार्थस्यापि भानं भवति येन कश्चन विशिष्टः चमत्कारः जायते। यथा पूर्वोक्ते उदाहरणे देवानामेवायं प्रियः न तु मनुष्याणामित्यर्थस्य भानात् चमत्कारः कश्चन भवति। एवं चमत्कारजनकतया अर्थबोधकत्वमेव वाचोयुक्तीनां वैशिष्ट्यम्।

**स्वरूपम्**

इदानीं पाणिनीये व्युत्पादितानां वाचोयुक्तीनां स्वरूपं किञ्चिन्निरूप्यते। समासेषु प्रायः बह्व्यः वाचोयुक्तयः पणिनिना व्युत्पादिताः वर्तन्ते। तेषु मुख्यतया सूत्रद्वयं वर्तते- पात्रेसमितादयश्च, मयूरव्यंसकादयश्च इति। तानि चात्र किञ्चित् प्रदर्श्यन्ते-

१) पात्रेसमितः इति शब्दः 'पात्रेसमितादयश्च' इति पाणिनिसूत्रेण व्युत्पादितः। भोजनसमये एव सन्निहितः, न तु कार्ये इति तदर्थः सिद्धान्तकौमुद्यां निरूपितः। वाच्यमर्यादया अलभ्यः अयमर्थः लक्ष्यः, व्यङ्ग्यः वा, समुदायशक्तिः एव वा। अन्ये च तद्गणे पठिताः - पात्रेबहुलः - यस्य भोजनं बहु, कार्यम् अल्पम्। उदुम्बरक्रिमिः - अत्यल्पज्ञः, एवं कूपमण्डूकः नगरकाकः धृष्टः। गेहेशूरः - वचनशूरः, उत्तरकुमारः इव। एवं मातरिपुरुषः, गेहेनर्दी च। गर्भेतृप्तः - आजन्मदरिद्रः। कर्णेटिरिटिरा पुनः पुनः जल्पनेन उदेगजननम्। एवं कर्णेचुरुचुरा। आखनिकबकः समयान्येषी धूर्तः आखनिको जलस्रोतः।

२) अश्नीतपिबता-खादतमोदताप्रभृतयः मयूरव्यंसकादिषु पठ्यन्ते तत्र केषाञ्चिदर्थः प्रसिद्धः इतरेषामर्थो न ज्ञायते। विदुषाम् उपेक्षा तत्र हेतुः। उपेक्षया एव संस्कृतभाण्डागारे विद्यमानाः बहवः शब्दाः लुप्ताः। अन्ये च अज्ञेयार्थकाः जाताः इति शोचनीया स्थितिः।

एतदतिरिक्ततया अपि केचन शब्दा विशिष्टसूत्रैः समासेषु निष्पादिताः। यथा -

१) काकपेया नदी - अल्पजला नदी। श्रोत्रपेया सूक्तिः, हस्तग्राह्या कौमुदी। 'कृत्यैः अधिकार्थवचने' इति समासः।

२) खट्वारूढः- जाल्मः, धूर्तः। 'खट्वा क्षेपे' इति सूत्रेण समासः।

३) तीर्थध्वाङक्षः- यथैव हि तीर्थ ध्वाङक्षश्चिरं स्थातारो न भवन्ति, तद्वदन्योऽपि यः कार्यं प्रत्यनवस्थितः स 'तीर्थध्वाङक्षः' इत्युच्यते। ध्वाङ्क्षेण क्षेपे इति सूत्रेण समासः।

४) अवतप्तेनकुलस्थितं त एतत्। चापलम्, अनवस्थितत्वं तवैततित्यर्थः। क्षेपे इति सूत्रेण समासः। एवम् उदकेविशीर्णम्, प्रवाहेमूत्रितम्, भस्मनिहुतम् इत्यादः। निष्फलं यत् क्रियते तदेवम् उच्यते।

५) देवानांप्रिय इति च मूर्खे इति वार्तिकेन मूर्खार्थे अयं शब्दः निष्पादितः।

६) अहिनकुलम्, गोव्याघ्रम्, काकोलूकम् इत्यादौ यद्यपि द्वन्द्वः एकवद्भावश्च येषां च विरोधः शाश्वतीकःइत्यनेन विहितः, तथापि 'तयोः अहिनकुलम्' 'कर्णार्जुनयोः गोव्याघ्रम्', 'राजकीयपक्षद्वयस्य दैवासुरम्' इत्यादिलाक्षणिकप्रयोगेषु चमत्कारविशेषान् जनयन्तः एते शब्दाः वाचोयुक्तिपदाभिधेयाः भवन्ति। अन्योन्यवैरः शब्दार्थः।

एवं बहवः शब्दाः इतोऽपि वर्तन्ते दिङ्मात्रमिह दर्शितम्।

समासातिरिक्तवृत्तिष्वपि एते शब्दाः दृश्यन्ते। तेषामुदहरणानि -

१) कृत्प्रत्ययनिष्पन्नाः - तुन्दपरिमृजः - अलसः। तुन्दशोकयोः परिमृजापनुदोः इति कप्रत्ययेन निष्पन्नः। पण्डितंमन्यः- मूर्खः, आत्ममाने खश्च इति खश्प्रत्ययेन निष्पन्नः। तिर्यक्कृत्य गतः, तिर्यक्कृत्वा गतः, तिर्यक्कारं गतः। समाप्य गतः इत्यर्थः। 'तिर्यव्यपवर्ग' इति क्त्वाणमुलौ। 'तिर्यक्करोति' इत्यस्य समापयति इत्यर्थः।

२) तद्धितवृत्त्या निष्पन्नानि यथा- काकतालीयम्, अजाकृपाणीयम् आकस्मिकप्राप्तम्। श्वेतकाकीयम् - अनुतम्। 'समासाच्च तद्विषयात्' इति छः। समयाकरोति - कालं यापयति। 'समयाच्च यापनायाम्' इति डाच्।

वृत्त्यतिरिक्ततया अपि वाचोयुक्तयः दृश्यन्ते। तेषामुदाहरणानि यथा -

आगमयस्व तावत् - मा त्वरिष्ठाः इत्यर्थः। 'आगमेः क्षमायाम्' इति वार्तिकात् आत्मनेपदम्। आगमयते - न त्वरयते।

संक्रीडते, परिक्रीडते - निश्शब्द क्रीडति इत्यर्थः। निःशब्दं चक्रं परिवर्तते इत्यर्थः अपि।

गोपी कृष्णाय तिष्ठते - आशयं प्रकाशयति।

दास्या संप्रयच्छते कामुकः- दासीम् उपभोक्तुं तस्यै धनादिकं ददाति इत्यर्थः। अशिष्टव्यवहारे चेत् इदम्। एवं भृत्यः अधिकारिणा सम्प्रयच्छते, चोरः आरक्षिणा सम्प्रयच्छते इत्यादि। उत्कोचं ददाति इत्यर्थः। एषु आत्मनेपदिप्रयोगात् अर्थभेदः संवृत्तः।

'एहि मन्ये ओदनं भोक्ष्यसे - ओदनं भोक्ष्ये इति त्वं मन्यसे इत्यर्थः। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।' एवम् 'एत मन्ये ओदनं भोक्ष्यच्वे। प्रहासे पुरुषव्यत्ययो वचनव्यत्ययश्च। तथा एष गच्छामि, एष आगच्छामि' इत्यादिष्वपि पुरुषभेदात् त्वरा गम्यते।

एवं परिशीलयामः चेत् एतादृशप्रयोगाः शास्त्रव्युत्पादिताः एव बहवः सन्ति। प्रयोगपरिशीलनेन तु ततोऽधिकं सिद्ध्यति। यथा कूपमण्डूकादयः शब्दाः स्वतः निष्पन्नाः भाषान्तरेष्वपि लब्धप्रचाराः संस्कृतमूलकाः एव।

## वैशिष्ट्यम्

इदानिमत्र अन्यभाषायाः एषां वैशिष्ट्यं किञ्चिदालेच्यते - संस्कृतभाषास्थाः वाचोयुक्तयः प्रायशः वृत्तिनिबद्धाः वर्तन्ते। कृत्तद्धितसामासैकशेषसनाद्यन्ताः पञ्चवृत्तयः केवलं संस्कृतभाषायामेवोपलभ्यन्ते। भाषायामस्यां षष्ठीतत्पुरुषसप्तमीतत्पुरुषादिनामभिः ये व्यवह्रियन्ते समासाः तत्सदृशाः केचित् समासाभासाः आङ्ग्लभाषादिषु विरलतया दृश्यन्ते, तथापि अन्येषां समासानां सर्वथा तत्र अभाव एव। तेनैव कश्चन विशेषः अत्र सिद्धः भवति। स च संस्कृते वाचोयुक्तिपदनां स्वाभाविकेऽपि अर्थे प्रयोगः सर्वदा भवितुमर्हति। वृत्तौ भेदे सम्पादिते तत्सिद्ध्यति। यथा - देवानांप्रियशब्दः मूर्खवाचकः, देवप्रियः इति शब्दः, देवानां प्रियः इति वाक्यं वा न तमर्थं बोधयति। अतः यदा अर्थभेदः कल्पनीयः वृत्तिभेदेन तत्सिद्ध्यति। ईदृशी कल्पना भाषान्तरेषु प्रायः न विद्यते। अस्मादेव कारणात् संस्कृतस्थानां वाचोयुक्तिनां प्रयोगे सूक्ष्मता अपि अपेक्षते।

## प्रयोजनम्

वाचोयुक्तीनां किं प्रयोजनमिति प्रश्नस्य एवमुत्तरं बोद्धयम्। वाग्व्यवहारे च एतेषां प्रयोगात् कश्चन सहृदयसंवेद्यः चमत्कारः समुल्लसति इति तु अनुभवरूढमेतत्। इमे च वक्तृणां कौशल्यम् आभिजात्यं च व्यञ्जयन्तः श्रोतृणामपि बोधसौकर्यं सौकुमार्यञ्च वर्धयति। यथा - महाभाष्ये आहोपुरुषिकामात्रं तु भवानाह विध्यर्थं इति वचनेन अहङ्कारप्रयुक्तवचनमिदमिति सरसया रीत्या बोध्यते। पुनः वाचोयुक्तयः भाषायाः जीवत्स्वरूपं बोधयति। यतः इमे प्रयोगसिद्धाः अर्थाः भवन्ति न तु केवलं शास्त्रसिद्धाः व्युत्पादिताः। प्रयोगादेव एतेषां वैशिष्ट्यं बोध्यते। अतः एतेषामध्ययनेन भाषायाः तदानिन्तनसमाजस्य च स्वरूपं सम्यगवन्तुं शक्यते। तदर्थम् अवश्यमेव वाचोयुक्तीनां विशिष्टमध्ययनं कर्तव्यमेव।

## सहायकग्रन्थाः

1) व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लितम्) - सम्पा० शर्मा शिवदत्तः, चौखम्बा संस्कृत प्रतिष्ठान, देहली, २०१४

2) वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता) – भट्टोजिदीक्षितः, सम्पा० शर्मा परमेश्वरानन्दः, मोतिलाल बनारसीदास, वाराणसी, २०१०

3) रङ्गनाथलेखमञ्जूषा - शर्मा रङ्गनाथः, संस्कृतभारती, बेङ्गलूरु, २०१६

4) संस्कृतवचोविच्छित्तिः प्रत्ययार्थवैचित्री च - रामचन्द्रुडु पुल्लेल, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००२

❏❏❏

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२०                    **सम्पुटम् :** संयुक्तम् (१,२)

# ध्रुवपदार्थविमर्शः

**डा. सुधाकरमिश्रः***

'नामरूपे व्याकरवाणि' इति उपनिषद्वचनप्रामाण्यात् नामपदार्थः साक्षात् परं ब्रह्मणः अपरं रूपमिति। नाम इत्युक्ते शब्दैव। स च शब्दः चराचरात्मकं, चलाचलात्मकं, दृश्यादृश्यात्मकं, विद्यमानाविद्यमानरूपं वा सर्वं निर्वहति। अस्माकं यानि शास्त्राणि तानि सर्वाण्यापि शब्दमयान्येव। तस्य शब्दस्य अपूर्वा महिमा। यतो हि स शब्दः लौकिकमलौकिकमुभयम्, प्रत्यक्षपरोक्षमुभयम्, सत्ताऽसत्तात्मकमुभयमपि वक्तुं समर्थः। सर्वेषां मूलभूतः यः वेदः सोऽपि शब्दमय एव। ''गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्म काणामणि कर्ता स णौ'' इति सूत्रे ''वेदमध्यापयेद्विधिम्''[1] इति उदाहरणे शब्दकर्मणः उदाहरणमिदम्। अपरिमिता महिमाऽस्य शब्दस्य सार्थकमनर्थकमुभयमपि उत्पादयितुं समर्थः। तेषु शास्त्रेषु ''द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते''[2]। एवं रूपस्यापराविद्याविशिष्टस्य व्याकरणस्यापि अनादिपरम्परा एव। तस्य बहवः द्रष्टारः ऋषयो बभूवुः। तेषु अन्यतमः भगवान् पाणिनिः। तेषां तपस्यायाः साक्षात्फलमस्माभिः पाणिनि - अष्टाध्यायीत्त्वेन प्राप्यते। अष्टाध्यायी नाम व्याकरणशास्त्रस्य व्यवस्थापकं शास्त्रम्। तच्च चतुःसहस्राणि सूत्रविशिष्टम्। वृद्धिरादैच्[3] आरभ्य ''अ अ''[4] इति पर्यन्तम्। तत्र लौकिकवैदिकोभयविधशब्दस्य तत्त्वचिन्तनं प्रयोगस्य फलं प्रयोगप्रकाराश्च सर्वे

* व्याकरणविभागः, श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः,७/२ए, पी.डब्ल्यु.डी.रोड, कोलकाता।

१ पाणिनिसूत्रम्

२ मुण्डकोपनिषदि ४.५/१

३ पा.सू. १.१.१

४ तत्रैव, ८.४.६८

पक्षाः सूक्ष्मत्वेन विश्लेषिताः बृंहिताश्च। तत्र प्रमाणं महाभाष्यं यत् "केषां शब्दानाम्?। लौकिकानां वैदिकानामिति। तस्याः अष्टाध्याय्याः शब्दसाधनदृष्ट्या नाना प्रकरणेषु विभागाः परिकल्पितास्सन्ति। तेषु अन्यतमं राजते कारणप्रकरणम्। इदं नाना अभिधम्। यथा कारकप्रकरणम्, विभक्त्यर्थप्रकरणम्,सुबर्थप्रकरणम्, साधनसमुद्देश्यम् सर्वमपि नाम अन्वर्थभूतम्। क्रियानिमित्तकत्वात् कारणप्रकरणम्। विभक्त्यर्थप्रतिपादनात् विभक्त्यर्थप्रकरणम्। सुबर्थ बोधकत्वात् सुबर्थप्रकरणम्।

**स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः**[1]**॥**

अस्य प्रकरणस्य शास्त्रेषु द्विधा प्रतिपादनमुपलभ्यते। आरोहावरोहक्रमभेदात्। सूत्रक्रमे अष्टाध्यायीग्रन्थे प्रथमं कारकम् अपादानकारकम्। सिद्धान्तकौमुद्यादिषु लौकिकसंख्यामधिकृत्य प्रथमाद्वितीयादिनिरूपणम्। तच्च कारकं किमिति -

**कारकार्थेतरार्था च सुप् द्विधा च विभज्यते।**
**धात्वार्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्**[2]**॥**
**क्रियाप्रकारीभूतोऽर्थः कारकं तच्च षड्विधम्।**
**कर्तृकर्मादिभेदेन शेषः सम्बन्ध इष्यते॥**

इति शाब्दिकाः स्मरन्ति ।

**अपादानसम्प्रदानकारणाधारकर्मणाम्।**
**कर्तुश्च भेदतः षोडा कारकं परिकीर्त्तितम्**[3]**॥**

अस्य अन्यदपि रूपं मिलति यथा -

---

[१] वाक्यपदीयं पदकाण्डम् साधनसमुद्देश्यः १
[२] शब्दार्थशक्तिप्रकाशिका श्लोकसंख्या ६७
[३] शब्दशक्तिप्रकाशिका श्लोकसंख्या ६८

**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्[1]॥**

तेष्वन्यतमं अपादानकारकम्। अपादानम् इत्युक्ते पञ्चमी विशिष्टत्वमिति। तत्र समीचीनम्। यतो हि पञ्चमी नानाऽर्थे व्यवहृता भवति यथा - विभागे, भयहेतौ[2], दर्शनेच्छाभावाश्रये[3], नियमपूर्वकविद्यास्वीकारे वक्त्रार्थे[4], जायमानार्थस्य हेतौ[5], भूकर्तुः प्रभवार्थे[6], ल्यब्लोपे, एवमेवोपपदविभक्तयोऽपि ''अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते''[7], अपपरी योगे[8], मर्यादार्थकाङ्योगे[9], अप आङ् परियोगे, प्रतिनिधिप्रतिदानार्थकप्रतियोगे[10], एवमेवान्यार्थेऽपि योगे बोध्याः। तत्र प्रथमं यच्च कारणं विभागेति तदर्थं सूत्रं ''ध्रुवमपायेऽपादनाम्[11]''इति। अत्र सूत्रे त्रीणि पदानि सन्ति यथा - ध्रुवम् इति प्रथमान्तम्, अपाये इति सप्तम्यन्तम्, अपादानम् इति प्रथमान्तम्। संज्ञासूत्रम् । एषा अपादानसंज्ञा - अन्वर्थसंज्ञा, अर्थसंज्ञा च। यथा - अप आङ् उपसर्गपूर्वको दाधातुः भावार्थकल्युट् प्रत्यये सति निष्पद्यते अपादानशब्दः। अपादीयते पृथक् क्रियत इति अपादानम्। अर्थात् पृथक्करणव्यापारविशेषः अपादानम्। अत्र आदानशब्दः धारणप्रभृतिसंश्लेषात्मकार्थे किन्तु यदा अप इति उपसर्गप्रयोगस्तदा विपरीतविश्लेषार्थे प्रयुक्तो भवति। सामान्यतया सम्प्रदानापादने

---

१ वैयाकरणभूषणसारः १, पा.सू. १.४.५५
२ भीत्रार्थानां भयहेतुः, पा.सू. १.४.२५
३ अन्तर्धौ येनादर्शमिच्छति, पा.सू. १.४.२८
४ आख्यातोपयोगे, पा.सू. १.४.२९
५ जनिकर्तुः प्रकृतिः, पा.सू. १.४.३०
६ भुवः प्रभवः पा.सू. १.४.३१
७ पा.सू. ३.२.२९
८ अपपरीवर्जने, पा.सू. १.४.८८
९ आङ्मर्यादा वचने, पा.सू. १.४.८९
१० प्रतिःप्रतिनिधिप्रतिदानयोः, पा.सू. १.४.९२
११ पा.सू. १.४.२४

परस्परसम्बद्धभूतौ शब्दौ विद्येते। ययोः समकालिकः विकासः प्रतिभाति। यतो हि संश्लेषविश्लेषावपि परस्परसम्बद्धभूतावेव। ध्रुवपदार्थश्च ध्रु गतिस्थैर्ययोः, इतस्मात् कुटादिगणपठितात् "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः[1]" इति सूत्रेण अच् प्रत्यये सति 'गाङ्कुटादिभ्योऽञ्णिन्ङित्ति" इति सूत्रेण ङित्वात् गुणाभावः, उवङादेशे सत्यनुबन्धलोपे, विभक्तिकार्ये ध्रुवमिति। पुनः ध्रुव स्थैर्ये इति धातोः "इगुपधज्ञाप्रीकिरः कः"[2] इति सूत्रेण क प्रत्यये सति "पुगन्तलघूपधस्य च"[3], इति सूत्रेण गुणे प्राप्ते "क्ङिति च" इति सूत्रेण गुणनिषेधे ध्रुवमिति। उभयविधसाधनप्रक्रियामधिकृत्य सिद्ध्यत्यं शब्दः। यद्यपि ध्रुवशब्दस्य गीताभागवतवेदान्तलोकादिषु नानार्थे प्रयोगः प्राप्यते यथा ध्रुवनामकः बालकः श्रीमद्भागवतमहापुराणे, ध्रुवनामकं नक्षत्रम्, भाष्यकारः नित्यलक्षणप्रसङ्गेऽपि ध्रुव इति पदस्य व्यवहारं करोति । अचलं ध्रुवम् इति श्लोके स्थिरतममिति। परन्तु अत्र किञ्चित्विशिष्टमेव ध्रुवमिति। तच्च लौकिकं,बुद्धिपरिकल्पितम्,चिन्तितम्,सचलमपि अचलमिति। सर्वप्रकारकं गृह्यते।

इदं ध्रुवं नहि केवलं लौकिकमात्रमेव प्रामाणिकमपितु शास्त्रीयमपि। यतो हि शास्त्रकारैः स्वस्वचिन्तनानुसारेणापि अस्य व्यवहारं साधितवन्तः। अस्य सूत्रस्यार्थनिरूपणप्रसङ्ग उवाच भट्टोजिदीक्षितः यत् "अपाय = विश्लेषः तस्मिन् अवधिभूतं यत्कारकं तदपादानसंज्ञं स्यात्। परन्तु काशिकाकारस्य योऽर्थ स इतोऽपि सरलः यथा **काशिका** - ध्रुवं = यदपाययुक्तमपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवति। वृक्षात् पत्रं पतति इत्यत्र अपयायुक्तं पत्रम्, तस्मिन् अपाये अवधिभूतः वृक्षः स एव ध्रुवत्वेन व्यवहितः तस्यापादानसंज्ञा भवति। प्रौढमनोरमाग्रन्थे पञ्चमीकारकप्रकरणे भट्टोजिदीक्षितः ध्रुवं स्थिरम्। प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयः। तच्चार्थादवधेरेव। पञ्चम्यर्थेऽवधौ अभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम्। प्रत्ययार्थस्तु क्रियायाम्, स च धर्मी न तु धर्ममात्रम्। विभक्त्यर्थे

---

१ पा.सू. ३.१.१३४
२ तत्रैव, ३.१.१३५
३ तत्रैव, ७.३.८६

विहितस्य बहुव्रीहेर्धर्मिपरताया निर्विवादत्वात्। यथा उद्धृतौदना स्थाली इत्यत्र उद्धृतम् ओदनं यस्याः इत्यत्र अन्यपदार्थः स्थाली पदार्थः धर्मी तथैव अत्रापि पर्वतात् पपतोऽश्वात्पतति इत्यत्र शाब्दबोधप्रसङ्गे पर्वतावधिकपतनाश्रयोऽश्वस्तदवधिकं देवदत्तादिनिष्ठपतनमर्थः। अत्र पर्वतावधिकम्, अश्वावधिकम् इति शब्दद्वयम्। उभयत्रापि बहुव्रीहिसमासः कप् प्रत्ययश्च। पर्वतोऽवधिः यस्य इति पर्वतावधिकः। अश्वोऽवधिः यस्य इति अश्वावधिकः। तेन धर्मी इत्यस्य ग्रहणं भवति। न तु धर्ममात्रस्य। विभक्त्यर्थे या बहुव्रीहिः तत्र धर्मी इत्यस्यैव बोधो भवति अत्र नास्ति कश्चन विवादः। तथैवात्रापि पञ्चमी अपि धर्मीपरकस्यैव बोधकः। न तु धर्मपरकस्य। तेनावधिरूपार्थस्य ग्रहणं भवति । तस्याः पङ्क्तेः व्याख्यानं कुर्वन्नाचार्यः लिलेख **शब्दरत्ने** - वस्तुतः अवध्यवधिमद्भावरूपविभक्त्यर्थसम्बन्धेनावधिक्रिययोरन्वय इति निरूपितम् । अवधिश्च अवधिमान् च इति अवध्यवधिमन्तौ तयोर्भावः अवध्यवधिमद्भावः। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते। तथा च अवधित्व-अवधित्वमत्वरूपयोः विभक्त्यर्थसम्बन्धः। अर्थात् अवध्यवधिमद्भावरूपविभक्त्यर्थसम्बन्धेन पञ्चम्यन्तस्य विभागेऽन्वयो भवति। तस्यापादानसंज्ञा भवति। **पुनरत्र प्रश्नः यत् -** फलव्यापारयोः धातुरिति वचनप्रामाण्यात् फलाश्रयत्वं कर्मत्वम्। व्यापाराश्रयत्वं कर्तृत्वम्। तर्हि अत्रापि अवधिः वृक्षः अवधिमत्वं पत्रे अवध्यवधि-मद्भावसम्बन्धः। भाष्यसम्मतं व्याख्यानमाश्रीयते चेत् तदा ध्रुवं नाम स्थिरमेव। **तत्र भाष्ये -** त्रस्तादश्वात्पतितः, धावतोऽश्वात् पतितः इत्यादावश्वे ध्रुवत्वाभावमाशङ्क्य लिखति अध्रौव्यमविवक्षितमत्र, यतः सतोऽप्यविवक्षा भवति अलोमिका एडका, अनुदरा कन्या इति। असतश्च विवक्षा भवति समुद्रः कुण्डिका। विन्ध्यो वर्धितकमिति। अत्र अतश्च इति विवरणं तु प्रासङ्गिकः। सतोऽप्यविवक्षेति तु प्रकृतोऽपयोगि।

**काशिकायां न्यासकारो लिखति** यथा - अपायः विश्लेषः, विभाग इत्यर्थः। तस्य विभागस्य द्विष्ठत्वात् यथा तेन विभागेन योऽपैति सोऽपाययुक्तः तथा यतोऽपैति सोऽप्यपाययुक्तः तस्मादुभयत्र पञ्चम्या भवितव्यमिति। न अपाययुक्तमपायसाध्ये यच्चावधिभूतं तद्वाचकात् पञ्चमी। यद्यपि ध्रुवशब्दो लोके एकरूपमाचष्टे - ध्रुवमस्य शीलम्, ध्रुवमस्य

रूपमिति, तथाप्यपाये साध्येऽभिहितया तया न कश्चिदर्थः सम्पद्यत इति नात्र ध्रुवताऽपायं प्रत्युपयुज्यते? सैवोपादीयते सा चावधिभाव एव। अर्थात् सामान्यरूपेण विद्यामानानामेवावधित्वेन स्वीकरणीयमिति तदा उत्तरमपि तत्रैव यत् अपायशब्दस्य सन्निधौ ध्रुवशब्दः सम्बन्धात् संश्लेषलक्षणात् प्रच्यवमानस्यावधिभावत्वेन व्यवहारः सम्पद्यते। अत एवापाये साध्येऽवधिभूतं यत् तदिह ध्रुवशब्देनोच्यते। तच्च ध्रुवं चलाचले उभयत्रापि सत्वात् धावतोऽश्वात् पतति इत्यादिस्थलेऽपि सिध्यत्यपादानसंज्ञा। प्रायः पदमञ्जरीकारस्यापि तत्रैव तात्पर्यमिति। विभागविषयो द्विविधः स्थूलं सूक्ष्मञ्च। स्थूलपदार्थे ध्रुवत्वं दृश्यते परन्तु सूक्ष्मधर्माधर्मनिन्दाविरामादिषु कथमपादानत्वं अवधित्वं वा सम्भवति । तदर्थं यद्यपि पृथग्रूपेण वार्तिकस्य परिकल्पना कृताऽस्ति। यतो हि अधर्माच्च जुगुप्सते, अधर्माद्विरमति, धर्मात् प्रमाद्यतीति। नह्यत्रापायोऽस्ति? कथम्? कायसम्प्राप्तिपूर्वको ह्यपायो भवति न चेह कायसम्प्राप्तिरस्तीति। तथा च ''जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्[1]'' एतेषां सूक्ष्मादीनाम-प्यपाये अवधित्वं स्वीकृत्य अपादानत्वं साध्यते। जुगुप्साद्यर्थानां धातूनां प्रयोगे अपादानसंज्ञाया उपासंख्यानं = प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम् अपादानमिति महतीसंज्ञा क्रियते महाविषयेयं संज्ञेति सूचनार्थम्। एवञ्च महाविषया भवतीयम्, यदि सूत्रोपात्तात् संज्ञिनोऽन्योऽप्यस्याः विषयो भवति नान्यथा, तेन जुगुप्सादीनां प्रयोगेऽसत्यप्यप्यपायेऽ-पादानसंज्ञा भविष्यति। इति एकः पक्षः। द्वितीयश्च अस्त्येवात्रापायः, नहि कायसम्प्राप्तिपूर्वक एवापायो भवतीति, किं तर्हि? चित्तसंप्राप्तिपूर्वकोऽपि भवति। इह तावदधर्माज्जुगुप्सते, अधर्माद्विरमति, य एव मनुष्यः प्रेक्षापूर्वकारी भवति एवं पश्यति दुःखहेतुरयमधर्मो नाम अतो नार्हत्येनं सचेताः कर्तुमिति, एवं विचारयंस्तं बुद्ध्या प्राप्नोति, प्राप्य च ततो निवर्तते। तत्र ध्रुवमपायेऽपादानम् इत्येवमपादानमिति संज्ञा सिद्धा भवति धर्मात् प्रमाद्यतीत्यत्रापि यो नास्तिकः पुरुषो भवति स एवं पश्यति नास्माद्धर्मात् किञ्चिदिष्टं सम्पद्यते दुःखमेव केवलं तदारम्भनिमित्तकं भवति। स एवं विचारयंस्तं बुद्ध्या प्राप्नोति प्राप्य च ततो निवर्तते, तथा च

---

[१] वार्तिकम्

ध्रुवमपायेऽपादानामित्येवं सिद्धम्। न्यासकारस्य द्विप्रकारकमपि व्याख्यानमतीव रमणीयम्। एवं सत्यपि एकः प्रयोगः एवमप्यस्ति यत् ''ग्रामान्नागच्छतीति''? अत्र कथमपादानं सम्भवति, ग्रामस्यापायेनायुक्तत्वात्।

यस्यां सत्यामपायो भवति सा प्रतिषिध्यते। अत्र अपादानसाधनागमनक्रिया। तदसत्यां तस्यां कुतोऽपायः **इति प्रश्नः। उत्तरयति**, आचार्यः नैष दोषः। अत्र हि अपादानसंज्ञायां समुपजातायां पश्चात् प्रतिषेधेन सम्बन्धः क्रियते अन्यथा हि प्रतिषेधस्य विषयो न दर्शितः स्यात्। तथा ह्यपादानसाधनागमनक्रिया प्रतिषेद्धुमिष्टा। तत्र यदि चादावेव निषेधः स्यात् अपायाभावात् तदसम्बद्धस्य ग्रामस्यापादानसंज्ञा सिद्धा न स्यात्। ततश्च प्रतिषेध्यापादान-साधनागमनक्रिया प्रतिषेधस्य विषयभूता, सा नशक्यते प्रदर्शयितुम्, न चात्राप्रदर्शितविषये प्रतिषेधः शक्यते वक्तुम्। तस्मात् पूर्वमपादानासंज्ञा भवति पश्चाद् प्रतिषेधेन योग इत्येष क्रमः। आचार्यनागेशः कैयटोक्तं व्याख्यानं सम्मानत्वेन न स्वीकरोति अपितु भाष्यमेव समर्थयति। यतो हि भाष्यकारः ध्रुपदार्थं ध्रुवपदार्थत्वेन एव स्वीकरोति न तु चलपदार्थान् ध्रुवत्वेन स्वीकरोति। चलपदार्थेषु चलधर्ममस्वीकृत्य अविवक्षां वा कृत्वा ध्रुवत्वं साधयति। भर्तृहरेः कारिकायाः अतदावेशादित्यस्य तदावेशाविवक्षणत्वादित्यर्थः। ध्रुवमपायेऽपादानमित्यस्य निष्कृष्टसूत्रार्थः ''अपाये गतिविशेषे सति यद् ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वो-पयोगिव्यापारस्यानाश्रयं तदपादानमिति''। पुनः प्रश्नः यत् ध्रुवमपायेऽपादामित्यत्र अपायपदस्य किं प्रयोजनम्? यतो हि ''कारके'' इत्यस्याधिकारः आगच्छति। तस्मिन् सूत्रे कारकपदं संज्ञापरं क्रियापरमुभयपरमिति। यदि क्रियापरं स्यात् करोति इति कारकं तदा ध्रुवमपादानमित्येवोच्यतां, तेन ध्रुवपदसमभिव्याहारात् विभागक्रिया एव आगच्छति तदर्थम् अपायपदस्य ग्रहणं न कर्त्तव्यम्। **प्रोक्तञ्च हरिणा -**

**गतिं विना त्ववधिना नापाय इति कथ्यते।**
**वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम्[1]॥**

---

१ वाक्यपदीयम् ३.७.१४३

यदि क्रियते तदा तत्पदं तात्पर्यग्राहकम्। यदि संज्ञापरं स्यात् तदा अपायपदमावश्यकमिति। अन्ते ध्रुवग्रहणस्य वास्तविकं तात्पर्यं यत् कारकान्तराणामिवा-पादानस्यावधिभावोपगमातिरिक्तव्यापाराभावबोधनायेत्याहुः। परस्परान्मेषावपसरतः इत्यत्र मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्तृत्वम्। परस्परपदोपात्तयोरेव विभागाश्रयत्वादपानत्वमिति। मेषपदोपात्ते तदविवक्षणात्। प्रयोगानुसारित्वाद् विवक्षायाः। अत्र अर्थानुसारीव्यवस्था तु अस्तीति परन्तु शब्दानुसारी अपि व्यवस्था दृश्यते। यथा आत्मा आत्मानं जानाति इत्यत्र अन्तःकरणावच्छिन्नम् चैतन्यम्। शरीरावच्छिन्नं चैतन्यमिति। यतो शब्दलिङ्गितार्थभानस्यैव सत्त्वाच्च तथैव व्यवहारः। वैयाकरणसिद्धान्तलघुमञ्जूषायाः सुबर्थप्रकरणनिरूपणावसरे भट्टनागेशः प्रतिपादयति यत् ''पञ्चम्याः अपादानत्वशक्तिमानमर्थः। अपादाने पञ्चमी[1] इति सूत्रात्। सूत्रात् इत्यत्र या पञ्चमी सा ''विभाषा गुणेऽस्त्रियाम्''[2] इति। सा शक्तिश्च प्रकृतधातूपात्तविभागजनकव्यापारानाश्रयत्वे सति प्रकृतधात्वर्थविभागाश्रयो यस्तद् वृत्तिः। ध्रुवमपायेऽपादनामिति सूत्रात्। अयमेव च ध्रुवपदार्थः। अपाये एव ध्रुवत्वं सम्भवति। ध्रुवग्रहणं किमर्थम्? ग्रामादागच्छति शकटेन। अत्र शकटस्य मा भूदिति। पुनः प्रश्नः यत् ध्रुवग्रहणे क्रियमाणेऽपि कथं न धनुषा विध्यतीत्यत्र पञ्चमी। अत्र हि शराणामपायं प्रति अवधिभावेनैव धनुषः साधकतमत्वम्। सत्यम्। उभयप्रसङ्गे परत्वात्करणसंज्ञा भविष्यति। यदि धनुषा विध्यति इत्यत्र करणसंज्ञा बाधिका तदा ध्रुवग्रहणाभावे ग्रामादागच्छति शकटेनेत्यत्रापि परत्वात् शकटस्यापि साधकतमत्वात् करणसंज्ञया बाधात् पञ्चमी प्राप्तिर्नास्ति। वृक्षस्य पत्रं पततीत्यत्र तु अपायस्याविवक्षितत्त्वात् अकारकत्वाच्च न भविष्यति। इतोऽपि ध्रुवग्रहण-प्रसङ्गविषये निर्धार्यमाणस्य संज्ञित्वादपायविषयेषु कारकेषु मध्ये यत्कारकं संज्ञान्तरस्या-विषयस्तदाऽपादानमिति अर्थात् यस्य कारकस्य अन्या संज्ञा न भवति तदपादानसंज्ञको भवति। तदेवं ध्रुवग्रहणस्यात्यावश्यकप्रयोजनं नास्ति। मन्दप्रयोजनमिति यावत्। इदं ध्रुवत्वं त्रिषु स्थलेषु सम्भवति निर्दिष्टविषये, उपात्तविषये, अपेक्षितक्रिया विषये चेति। प्रोक्तञ्च **वाक्यपदीये** -

१ पा.सू. २.३.२८
२ तत्रैव, १.३.२५

**निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।**
**अपेक्षितक्रियञ्चेति त्रिधाऽपादानमुच्यते**[1]**॥**

1. साक्षाद्धातुना गतिनिर्दिश्यते तन्निर्दिष्टम्। अश्वात् पतति। वृक्षात् पत्रं पतति।
2. धात्वन्तराङ्गं स्वार्थं धातुराह तदुपात्तविषयम्। बलाहकाद् विद्योतते विद्युत्।
3. अपेक्षिता क्रिया यत्र तत्तृतीयम्। कुतो भवान्। पाटलिपुत्रात्। अत्र अर्थाध्याहारः, शब्दाध्याहारश्चोभयौ भवतः। उच्चरितं वाक्यैकदेशरूपमेव तदर्थपरम्। पदाध्याहारवादे तु अनुपात्तसाकाङ्क्षक्रियावाचकपदकम्। अनुपात्तं साकाङ्क्षा या क्रिया तद्वाचकं पदं यत्र तदित्यर्थः। क्रियार्थोपपदस्य कर्मणि स्थानिनः इति सूत्रबलात्, ''ल्यब्लोपे कर्मण्यधिकरणे च'' इति वार्तिकबलात् अर्थाध्याहारः। स्पृहेरीप्सितः इति सूत्रबलात् शब्दाध्याहारः। इतोऽपि विषयाः विवृत्तास्सन्ति विस्तारभयादलम्।

## सहायकग्रन्थसूची

1. वाक्यपदीयम् - अम्बाकर्त्री व्याख्यया सह, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी,1963
2. व्याकरणमहाभाष्यम् - गुरुप्रसादशास्त्री ,प्रतिभाप्रकाशनम्,देहली,1999
3. काशिका - न्यासपदमञ्जरी, भावबोधिनीसहिता, ताराबुक एजेन्सी, वाराणसी,1986
4. प्रौढ़मनोरमा - भावप्रकाशादिसहिता, गोपालदत्तपाण्डेयः, चौखम्भाविद्याप्रकाशनम्, वाराणसी, 2000
5. बृहच्छब्देन्दुशेखरः - प्रो. सीतारामशास्त्री, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी,1998
6. वैयाकरणसिद्धान्तकौमुदी - लक्ष्मीटीका सहिता, पण्डितसभापतिशर्मोपाध्यायः
7. प्रौढमनोरमा (कारकादव्ययीभावान्तप्रकरणं यावत्) - द्वारिकाप्रसादद्विवेदी, भारतीयविद्यासंस्थानम्, वाराणसी, 2014
8. वाक्यपदीयम् - डॉ.सुधाकरमिश्रः,बनारस मर्केण्टाइलकम्पनी, कोलकाता,2015
9. कारकतत्त्वानुशीलन – प्रो. उमाशंकरशर्मा (ऋषिः), चौखम्भासुरभारती,वाराणसी,1994

---

[१] वाक्यपदीयम् पदकाण्डम् ३.७.१३६

10. लघुशब्देन्दुशेखरः - प्रो. बालशास्त्री,वाणीविलासप्रकाशनम् वाराणसी,1991
11. वैयाकरणसिद्धान्तकौमुदी - गोविन्दाचार्यः, द्वितीयो भागः,चौखम्भासुरभारती, वाराणसी,2001
12. वैयाकरणसिद्धान्तलघुमञ्जूषा - माधवशास्त्रीभण्डारी,राष्ट्रियसंस्कृतसंस्थानम् नवदेहली,2006
13. पाणिनिशिक्षा - कालिदास अकादमी,उज्जैन,मध्यप्रदेशः,1986
14. भाषा का इतिहास - भगवद्दत्तः, विजयकुमारगोविन्दराम हासानन्दः, नवदेहली,2012
15. परमलघुमञ्जूषा - लोकमणिदाहालः,चौखम्भासुरभारतीप्रकाशनम्,वाराणसी,2001
16. वैयाकरणभूषणसारः - श्रीब्रह्मदत्तद्विवेदी, चौखम्भापब्लिसर्स, वाराणसी,2011
17. माण्डूक्योपनिषद् - गीताप्रेसः, गोरखपुरम्, 1970
18. मनुस्मृतिः - राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली,2012
19. याज्ञवल्क्यशिक्षा - नरेशझा, चौखम्भासुरभारती, वाराणासी,2014
20. कुमारसम्भवम् मल्लिनाथटीकासहितम् - महाकविकालिदासः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2005
21. शब्दशक्तिप्रकाशिका श्रीमज्जगदीशतर्कालङ्कारभट्टाचार्यविरचिता - ढुण्ढिराजशास्त्रीसम्पादिता चौखम्भाप्रकाशनम्, वाराणसी,2013

❑❑❑

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# सनादिप्रत्ययविमर्शः

**डा. वि. श्रीनिवासनारायणः***

**उपक्रमः**

लेखेऽस्मिन् प्रत्ययपदार्थं विवेचयितुमीहे। ततः परं शब्दशास्त्राभिप्रायेण मुनित्रयप्रामाण्येन च प्रत्ययपदार्थं विवर्णयिषामि। ततः परं सनादिप्रत्ययान् तद्विशेषाँश्च यथाशास्त्रं यथामति च विवेचयामि। तत्रादौ प्रत्ययः इति पदस्य व्युत्पत्तिमालोचयामः। प्रतीयते अर्थः अनेन, प्रतियन्ति अर्थम् अनेन इति वा अर्थे, प्रति उपसर्गपूर्वकात् इण् - गतौ इत्यस्माद् आदादिकाद्धातोः भावे करणादिकारकेऽर्थे वा **एरच्** (पा. 3.3.56) इति सूत्रेण अच् इति प्रत्यये कृते निष्पन्नः। तत्र भवान् भट्टोजिदीक्षितः प्रत्ययपदव्युत्पत्तिम् इत्थं प्रादर्शयत् कौमुद्याम्[1] – **प्रत्यय इति ण्विणो रूपम्** इति हि तद्वचनम् ।

प्रत्ययशब्दं प्रयुञ्जते नानार्थेषु लोकाः। तदुक्तं **अमरकोश**कृता[2] – प्रत्ययोऽधीन-शपथ-ज्ञान-विश्वास-हेतुषु इति। कोशान्तरे च[3] – प्रत्ययः शपथे रन्ध्रे विश्वास-आचार-हेतुषु। प्रथितत्वे च सन्नादावधीनज्ञानयोरपि इत्येवमर्थाः लक्ष्यन्ते। एवम् उपदश अर्थेषु तत्तत्सन्दर्भे प्रयुज्यमानोऽयं शब्दः अतितरां प्रसिद्धः संस्कृतप्रपञ्चे।

शास्त्रलोके त्वयं शब्दः विलक्षणेष्वर्थेषु प्रयुक्तः लक्ष्यते। तद्यथा – बुद्धेरेव परिणामविशेषः प्रत्ययः इति सांख्याः ब्रुवते। समेऽपि दार्शनिकाः अर्थमिममुपयुञ्जते प्रायः। भगवतीं वाचं व्याचिकीर्षुः भगवान् पाणिनिः **प्रत्ययः** (पा. 3.1.1) इति सूत्रं विरचयाम्बभूव। सूत्रमिदं विलक्षणम्। शास्त्रस्यास्य प्रवृत्तिमभिलक्ष्य संज्ञाधिकारोऽयं योगः इत्याचक्षते समेऽपि

---

* सहायकाचार्यः, व्याकरणम्, कालिकट् आदर्शसंस्कृतविद्यापीठम्, बालुश्शेरी ।

1 वैयाकरणसिद्धान्तकौमुदी, भ्वादिप्रकरणम् – 2326 सूत्रव्याख्यासन्दर्भे, पृ.278

2 अमरकोशः – तृतीयं काण्डम्, नानार्थवर्गः, श्लोकसंख्या पादसंख्या च, 147.2,पृ.422

3 तत्रैव, विश्वकोशस्थं पद्यमिदम् इति अमरकोशव्याख्यायां सुधाख्यायाम्।

वैयाकरणाः[1]। सर्वत्र सूत्रे सन् प्रत्ययः, क्यच् प्रत्ययः इत्यादिरीत्या पाठापेक्षं लाघवम्, उपायान्तराश्रयणे अतिप्रसङ्गादिप्रयुक्तं गौरवमित्यतः गौरवातिप्रसङ्गादिदोषपरिहारेण अधिकारेण इयं संज्ञा क्रियत इति यथान्यासमेव रमणीयम् इति समेऽपि व्याचक्षते। अध्यायत्रयं सर्वांशेन अधिकुरुत इत्यस्त्यस्य इतराधिकारापेक्षं महत्त्वमतितराम्।

सम्प्रति शाब्दिकग्रन्थेष्वस्याधिकारस्य व्याख्यानं कथङ्कारं प्रवृत्तमिति अवलोकयामहे। तत्राद्यः तत्रभवतो **भगवतः भाष्यकारस्य ग्रन्थः**[2] – प्रकृति-उपपद-उपाधीनां प्रत्ययत्वस्य, एवं विकार-आगम-आदेशानां प्रत्ययत्वस्य च खण्डनाय, प्रत्ययपदार्थनिर्णयाय च प्रवृत्तमिदं भाष्यम्। "यः स्वमर्थं प्रत्याययति, सः प्रत्ययः। प्रत्यय इति महती संज्ञा क्रियते। महत्याः संज्ञायाः करणे एतत्प्रयोजनम् – अन्वर्थसंज्ञा यथा विज्ञायेत। प्रत्याययतीति प्रत्ययः" इति सनादिषु प्रत्ययेषु व्युत्पत्तिरियम्। एवं तत्रैव भाष्ये अर्थान्तरमुपदर्शितम् – "प्रत्याय्यत इति प्रत्ययः" इति। यस्यार्थः प्रकृत्या प्रत्याय्यते सः प्रत्ययः इति। स्वार्थिकेषु प्रत्ययेषु स्वस्य विशिष्य कस्यचिदर्थस्याभावात् प्रत्ययसाधनार्था व्युत्पत्तिरियम्। व्युत्पत्तिद्वयमपि आश्रयणीयमत्र शास्त्र इति भाष्यकारस्य निर्णयः – "एवं तर्ह्युभयसाधनोऽयं कर्तृसाधनः, कर्मसाधनश्च" इति। अत एव प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमित्युद्घोषः वैयाकरण-निकाये। एवं च प्रत्ययत्वस्य परिष्कार इत्थं दृश्यते – स्वस्वप्रकृत्यन्यतरार्थप्रत्याययकत्वम् इति।

प्रत्ययाधिकारः अध्यायत्रयमभिव्याप्य राराज्यत इति पूर्वमुक्तमेव। तत्र तृतीये अध्याये - सनादयः – विकरणाः – कृत्संज्ञकाः – लकाराः – तिङश्च भगवता उपादिशि। सनादिप्रत्ययविषये लेखेऽस्मिन् विस्तरेण समालोचयिष्यामः। विकरणप्रत्ययाः – **स्य** इत्यारभ्य **श्यन्** प्रत्ययं यावत् आधात्वधिकरात्। धात्वधिकारे कृत्संज्ञकाः प्रत्ययाः चतुर्थपादे षड्वषष्टिसूत्रं यावत् पठिताः भगवता।

तथाहि – **धातोः** (पा. 3.1.90) इति अधिकारस्थम्, कृत्संज्ञाविधायकं **कृदतिङ्**

---

[1] शब्दकौस्तुभे, द्वितीयभागे, पृ. 301, काशिका न्यास-पदमञ्जरी-भावबोधिनीसहिता, तृतीयो भागः पृ.198

[2] व्याकरणमहाभाष्यम् – प्रदीप-उद्योत-छायासमेतम्, तृतीयः भागः पृ.6-7

(पा.3.1.93) इति सूत्रम्। उत्सर्गतः एतत्संज्ञकानां प्रत्ययानां कर्ता अर्थः, कारकाणि वा। यथासन्दर्भं विशेषार्था अपि तत्र तत्र प्रदर्शिताः। धातोरित्यधिकारस्योपस्थितत्वात् प्रत्यया इमे धातुप्रकृतिका इति स्पष्टमेवावगम्यते। ण्वुलादयस्तत्रप्रसिद्धाः। अधातुप्रकृतिका अपि केचन कृत् प्रत्ययाः लक्ष्यन्ते। तद्यथा– रोगाख्यायां ण्वुल् बहुलम् (पा.3.3.108) इति सूत्रे वार्तिककारेण **कार-इफ-छ** इत्येवं त्रयः प्रत्ययाः उपदिष्टाः। कृत्संज्ञकेषु प्रत्ययेषु विशेषसंज्ञाः अपि दृश्यन्ते, कार्यविशेषविभागार्थं भगवता कल्पिताः। तथाहि – कृत्याः – इमे सप्त वर्तन्ते। निष्ठा – एतत्संज्ञकौ प्रत्ययौ उभौ। सत् – उभौ प्रत्ययौ इत्येवमादयः। एवं लादेशभूताः केचन कृत्संज्ञकप्रत्ययाः, वर्तमान-भूत-भविष्यदधिकारेषु विहिताः, लिङ्गनियमेन वर्तमानाः इत्येवमादयः उपविभागाः नाना वर्तन्ते।

अध्याये चतुर्थे पञ्चमे च – सुपः – स्त्रीप्रत्ययाः – तद्धिताः तद्विशेषाश्च उपादिश्यन्त। सुपः – एकविंशतिः प्रत्ययाः, स्त्रीप्रत्ययाः – अष्टौ – **स्त्रियाम्** (पा.4.1.3) इत्यधिकारे पठितत्वादेषां स्त्रीप्रत्यया इति व्यवहारः।

**तद्धिताः** (पा.4.1.76) इत्यधिकारे विहितानां प्रत्ययानां तद्धितप्रत्यया इति व्यवहारः। लोकप्रयोगे इमे प्रसिद्धाः। अत एव इयमुक्तिः प्रसिद्धा शाब्दिके जगति – तद्धितमूढो वैयाकरणः, तद्धितमूढोऽवैयाकरण इति। तद्धितम् ऊढः वैयाकरणः, तद्धे मूढः अवैयाकरण इत्येवं वाक्यस्यार्थस्तु स्फुट एव। **ङ्याप्प्रातिपदिकात्** (पा.4.1.1) इत्यस्मिन् अधिकारे पठिताः यद्यपि इमे प्रत्ययाः, तथापि सुप्प्रत्ययव्यवधानेन विधीयन्ते, तस्यापत्यम् (पा.4.1.92) इत्यादिसमर्थविभक्तिनिर्देशात्, **घकालतनेषु–** इत्यादिज्ञापकाच्च, स्वार्थिकाः अत्यन्तस्वार्थिकाश्च प्रातिपदिकाद् विधीयन्त इति विवेकः।

एते प्रत्ययाः अपत्यार्थे, चातुरार्थिकेषु, शेषाधिकारे, विकार-अवयवार्थयोः, दीव्यत्याद्यर्थे, वहत्याद्यर्थे, क्रीताद्यर्थे, कालाद्यर्थे, मत्वर्थे च विहिताः। एवं असार्वविभक्तिकत्वेन अव्ययसंज्ञकाः तद्धिताः केचन – वति-शस्-स्ताति-विभक्तिसंज्ञकाः प्रत्ययाः इत्यादयः। तद्धितसंज्ञकप्रत्ययेषु कार्यविशेषविभागार्थाः विशेषसंज्ञाः – विभक्तिसंज्ञकाः, तद्राजसंज्ञकाः, घसंज्ञकाः,समासान्ताः इत्यादयः।

एवं समासेन प्रत्ययानां विभागः द्रष्टुं शक्यते अष्टाध्याय्याम्। विस्तरेण तु तत एव अवगच्छामः। एते त्रयः अध्याया एव अष्टकस्य प्राणभूताः, यानाश्रित्य इतरेष्वध्यायेषु प्रक्रिया प्रादर्शि भगवता।

सम्प्रति सनादयः प्रत्ययाः तद्विशेषाश्च प्रदर्श्यन्ते – सनादयः प्रत्ययाः द्वादश वर्तन्ते। तथाहि परम्परागतः श्लोक इत्थम् –

सन्-क्यच्-काम्यच्-क्यङ्-क्यषः अथ-आचारक्विप्-णिच्-यङौ तथा।
यक्-आय-ईयङ्-णिङ् – चेति द्वादशामी सनादयः॥

इति। प्रत्यया इमे अष्टाध्याय्याः तृतीये अध्याये प्रत्ययाधिकारारम्भे पठिताः। एतत्प्रत्ययसंयोगात् परं धातुसंज्ञां लभते शब्द इत्यतः एतेषां प्रत्ययानां धातुप्रत्ययाः इति नामधातुप्रत्यया इति वा व्यवहारः दृश्यते व्याकरणसिद्धान्तख्यापकेषु ग्रन्थेषु। **सनाद्यन्ताधातवः** (पा.3.1.32) इति सूत्रेण एतत्प्रत्ययान्तेषु विशिष्य धातुसंज्ञा विहिता। एवं धातुसंज्ञालब्ध्युत्तरं पुनः लडादि, कृत्सामान्यञ्च यथाशास्त्रं प्रतिपद्यन्ते। कृत्संज्ञकप्रत्ययेषु एतत्प्रत्ययान्तेभ्य एव विशिष्य विहाता अपि दृश्यन्ते, तद्यथा – **अ प्रत्ययात्** (पा.3.3.102), **सनाशंसभिक्षउः** (पा.3.2.168) इत्यादीनि सूत्राणि।

**1) सन् प्रत्ययः –**

अयं प्रत्ययः अर्थभेदवशात् त्रिधा निरूपयितुं शक्यते – स्वार्थिकः, समानकर्तृकात् इच्छाकर्मभूतात् क्रियावाचकात् यावद्धातोः विहितः, आशङ्कार्थकश्च।

तत्र स्वार्थिकः – **गुप्तिज्किद्भ्यः सन्** (पा.3.1.5), **मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य** (पा.3.1.6) इति सूत्राभ्यां विहितः। अर्थविशेषेष्वेवैषां प्रयोगः, **गुपेर्निन्दायाम्** इत्यादिवार्तिकैरनुशासनात्। जुगुप्सते, तितिक्षते, मीमांसते, चिकित्सति इत्याद्युदाहरणम्।

इच्छाकर्मीभूताद् धातोः विहितः – **धातोः कर्मणः समानकर्तृकादिच्छायां वा** (पा.3.1.7) इति सूत्रेण विहितः। धातोः, कर्मणः, समानकर्तृकात्, इच्छायां, वा इति पञ्चपदं सूत्रम्। धातोः कर्मत्व-समानकर्तृकत्वे अर्थद्वारके बोध्ये। सन्प्रत्ययार्थभूतेच्छा, तत्कर्मीभूता च या क्रिया, तस्याः इच्छायाश्च कर्ता समानः स्यादिति नियमः प्राथम्येनास्य प्रत्ययस्य

प्रवृत्तिनिमित्तम्। अत एव सामर्थ्ये सत्येव इमे प्रत्यया इत्येषां वृत्तिष्वन्तर्भावः। तथा चायमर्थः सम्पद्यते – इषिकर्मणा इषिणा समानकर्तृको धातुः वा समर्थो भवति। समार्थाच्च सन् प्रत्ययो भवति इति। अत्र सूत्रे धातोरित्युच्चार्य, प्रत्ययविधानात् आर्धधातुकसंज्ञा सिद्ध्यतीति विशेषः। उदाहरणम् – पठितुम् इच्छति – पिपठिषति इत्यादि। आर्धधातुकत्वात् इडागमसिद्धिः। अत्र सूत्रे वा शब्दग्रहणात् पक्षे वाक्यप्रयोगोऽपि सिद्ध्यति। समानकर्तृकादिपदसामर्थ्यात् शिष्याः पठन्तु इति इच्छति गुरुः इत्यादि स्थले वाक्यमेव। सन् प्रत्ययो न भवतीति प्रयोजनम्।

आशङ्कायां सन् प्रत्ययः विहितः **वार्तिककारैः** – आशङ्कायाम् अचेतनेषु उपसङ्ख्यानम् इति वार्तिकेन। आशङ्का सम्भावना। तद्विशिष्टक्रियावाचकताद्धातोः स्वार्थे सन् प्रत्यय इति आकरव्याख्या। सूत्रेण तु इच्छाकर्मण एव धातोः सन् विहितः। इच्छा तु चेतनावत्येवेति सूत्रेण सनः अप्राप्तौ इदं वचनमारब्धम्। उदाहरणम् – कूलं पिपतिषति श्वा मुमूर्षति इत्यादि। इदं प्रत्याख्यातं भगवता इत्थम् – इच्छायाः प्रवृत्तित एवोपलब्धिरिति, सा प्रवृत्तिः चेतनेषु अचेतनेष्वपि तुल्यैवेति। अत्र गौणमुख्यन्यायः नाश्रीयत इति तात्पर्यम्। अतः कूलस्य लोष्टाः शीर्यन्ते, भिदा उपजायत इत्यादिपिपतिषाप्रवृत्तिमभिलक्ष्य कूलं पिपतिषतीत्यादिप्रयोगाः सङ्गच्छन्त इति।

**प्रकारान्तरम्** – चेतनावत्स्वेव इच्छेति मत्त्वा अचेतनेषु तदभावात् सूत्रेणाप्राप्तौ हि वार्तिकमारब्धव्यम्, अचेतनः पदार्थः लोके न वर्तत एवेति। तत्र दृष्टान्तः प्रदर्शितः – कंसकाः सर्पन्ति, अयस्कान्तम् अयः सङ्क्रामति, ऋषिः पठति इत्यादि। अतः सर्वस्यापि चेतनत्वात् इच्छा सम्भवतीति सर्वत्रापि सन् सिद्ध्यतीति वार्तिकमनावश्यकम् इति।

इच्छाकर्मणः धातोः सन् इत्युक्तौ कर्तुम् अन्विच्छति इत्यादावपि सन् प्रत्ययः स्यादित्याशङ्क्य, इत्थं समाहितम् – कान्तिकर्मण एव सन् इति।

**जिगमिषितुम् इच्छति इत्याद्यर्थे सन् स्याद् न वेति शङ्का, तत्समाधानञ्च –**

पूर्वोक्तोदाहरणस्थले जिगमिष इत्यादेः धातोः इषिकर्मणः सन् स्यान्न वेति शङ्कायाम्,

**भाष्यकारेण** इत्थं समाहितम्[1] – न कर्तव्यः सन् इति। अर्थगत्यर्थः शब्दप्रयोगः। अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य अपरस्य प्रयोगेण न भवितव्यम्। उक्तार्थानाम् अप्रयोगः इति न्यायात् इति। तदेव स्फुटतरमभिहितं प्रदीपकृता[2] – इच्छायाः एकत्वात् तस्याः पूर्वोत्पन्नेन सनाभिहितत्वात् परः सन्न भवतीति। एवं तर्हि एष्टुम् इच्छतीत्यर्थे इष् धातोः इच्छार्थे सन् न स्यादित्याशङ्किते, तत्र सनः सिध्यर्थम्, चिकीर्षितुम् इच्छतीत्यादौ सनः वारणार्थञ्च **भाष्ये** इत्थमिष्टिः पठिता –

शैषिकान्मत्वर्थीयात् शैषिको मतुबर्थिकः।
सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते॥ इति।

सन्नन्तान्न सनिष्यत इति प्रकृतोपयोगी अंशः। सन्नन्तात् सन्नेति वचः सरूपे इत्येव। सारूप्यं चार्थद्वारकम्। तेन चिकीर्षितुम् इच्छति, जिगमिषितुम् इच्छति इत्यादौ सन् न भवति। उभयोः सन् प्रत्यययोः अर्थसारूप्यात्। स्वार्थसन्नन्तात् तु इच्छार्थकः सन् स्यादेव। जुगुप्सितुम् इच्छति जुगुप्सिषते इत्यादि उदाहरणम्।

**2) क्यच् प्रत्ययः – सुप आत्मनः क्यच्** (पा. 3.1.8) इति सूत्रेण भगवता विहितः। पूर्वस्मात् सूत्रात् समानकर्तृकात् इच्छायां वा इति पदत्रयं सम्बध्नाति। तथा च सूत्रार्थ इत्थम् – इषिकर्मणः एषितृसम्बन्धिनः समर्थात् सुबन्तादिच्छार्थे क्यच् प्रत्ययः स्यात्।

प्रक्रिया इत्थम् - देवम् आत्मनः इच्छतीति लौकिकं विग्रहवाक्यम्।
देव अम् य (क्यच्) इति अलौकिकं विग्रहवाक्यम्।

सनाद्यन्ता धातवः इति सूत्रेण धातुसंज्ञा। धात्ववयवस्य सुप् प्रत्ययस्य लुक्। देव य इति स्थिते, क्यचि च (पा. 7.4.33) इति सूत्रेण देवशब्दान्त्यस्य अकारस्य स्थाने ईकारे, देवीय इति क्यजन्तः धातुः। लडादौ देवीयति इत्यादीनि रूपाणि। अत्रापि समानकर्तृकत्वं

---

[1] व्याकरणमहाभाष्यम् – प्रदीप-उद्योत-छायासमेतम्, तृतीयः भागः, पृ.30

[2] तत्रैव

तन्त्रमेव। अतः राज्ञः पुत्रमिच्छति लोकः इत्यर्थे क्यच् न प्रवर्तते। अयम् इच्छाक्यजन्तः इति व्यवह्रियते।

**अत्र कतिचन विशेषाः –** मकारान्ताः यदि शब्दाः भवेयुः तत्रायं क्यच् न स्यादिति। उदाहरणम् – किम् इच्छति, इदम् इच्छतीत्यादि उदाहरणम्।

एवं बुभुक्षा-पिपासा-गर्धार्थेषु अशनाय-उदन्य-धनाय इति क्यच् प्रत्ययान्ता धातवः निपातिताः[1]।

इच्छार्थके क्यचि असुक् आगमः विहितः आत्मप्रीतिरूपे अर्थविशेषे[2]। तद्यथा – अश्वम् आत्मन इच्छति वडवा इत्यर्थे (मैथनुच्छासन्दर्भे) एव असुगागमः। अश्वस्यति इति रूपम्। अर्थान्तरे तु – अश्वीयति इति। एवं वृषस्यतीत्यपि। एवं क्षीरम् आत्मनः इच्छति बालकः इत्यर्थे (लालसायामर्थे) एव असुगागमः। क्षीरस्यति इति रूपम्। अन्यथा तु क्षीरीयति इति रूपम्।

एवं सर्वप्रातिपदिकेभ्यः आत्मप्रीत्यर्थे सुक्-असुक् आगमौ विहितौ क्यच् प्रत्यये परे[3]। दधि आत्मनः इच्छतीत्यर्थे दधिस्यति, दध्यस्यति इत्युदाहरणम्।

**आचारार्थकः क्यच् प्रत्ययः –**

उपमानादाचारे (पा.3.1.10) इति सूत्रेणायं विहितः। उपमानवाचकात् सुबन्तात् कर्मवाचकात् आचरतीत्यर्थे क्यच् प्रत्ययः विधीयते। उदाहरणम् – छात्रं पुत्रम् इव आचरति इत्यर्थे उपमानवाचकात् कर्मभूतात् पुत्रम् इत्यस्माद्द्वितीयान्तात् क्यच् प्रत्ययः। प्रक्रिया पूर्ववदेव। पुत्रीयति इत्युदाहरणम्। अत्र आचारक्रियायां द्वे कर्मणी। पुत्रः उपमानभूतः प्रथमं कर्म। छात्रः उपमेयभूतः द्वितीयं कर्म। अत्र पुत्रस्य क्यजन्तधात्वर्थसङ्गृहीतत्वेऽपि छात्ररूपं कर्म आदाय सकर्मकत्वं सुनिरूप्यमेव। बोधः इत्थम् – उपमेयच्छात्रकर्मकः चैत्रकर्तृकः

[1] अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु - पा.7.4.34

[2] अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि - पा.7.4.34। अत्र वार्तिकानि – अश्ववृषयोः मैथुनेच्छायाम्, क्षीरलवणयोर्लालसायाम् इत्यादि। - वा. 4309,15

[3] सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ - वा. 4316-17

उपमानपुत्रकर्मकाचारः इति। एवं च इच्छार्थकक्यच् अकर्मकः, आचारार्थकः क्यच् सकर्मकः इति व्यवस्था।

आचारार्थे एव उपमानात् अधिकरणवाचकादपि क्यच् विहितः, **अधिकरणाच्चेति वक्तव्यम्** इति **वार्तिकेन**। प्रसादीयति कुटीं भिक्षुकः इत्यादि उदाहरणम्। कुट्यां प्रासादे इव आचरति भिक्षुकः इति तदर्थः। उपमेयकुट्यधिकरणकः भिक्षुककर्तृकः उपमान-प्रासादाधिकरणकाचारः इति बोधः।

**क्यच् प्रत्ययविधेः सन्दर्भान्तरम् –**

नमस्-वरिवस्-चित्रङ् शब्देभ्यः क्रियाविशेषे क्रमेण पूजायाम्-परिचर्यायाम्-आश्चर्ये चार्थे क्यच् प्रत्ययः[1]। उदाहरणम् – नमस्यति देवान्। वरिवस्यति गुरून्। चित्रीयति इति।

**3) काम्यच् प्रत्ययः –** सुप आत्मनः क्यच् इति सूत्रं यत्र प्रवर्तते, तत्रैव काम्यच् प्रत्ययोऽपि विहितः काम्यच्च (पा.3.1.10) इति सूत्रेण। उदाहरणम् - यशः आत्मनः इच्छति – यशस्काम्यति इत्यादि।

**4) क्यङ् प्रत्ययः -** उपमानवाचकात् सुबन्तात् कर्तृवाचकात् आचरतीत्यर्थे क्यङ् प्रत्ययः विधीयते। उदाहरणम् – राम इव आचरति चैत्रः इत्यर्थः उदाहरणसन्दर्भः। प्रत्ययस्य ङित्त्वात् आत्मनेपदीधातुरयं सिद्ध्यति। रामायते इत्यादि रूपम्। यदि कर्तृवाचकः शब्दः सकारान्तः, तर्हि तस्य लोपोऽपि तत्सन्नियोगशिष्टः विहितः भगवता। अतः विद्वान् इव आचरति देवदत्त इत्यर्थे विद्वायते इति रूपम्। अत्रापि कर्तृद्वयम्। एकः उपमानभूतः, यः धात्वर्थेन सङ्गृहीतः। अन्यः उपमेयभूतः कर्ता। इयं वृत्तिः अतः एकार्थीभावसत्त्वात् **सविशेषणानांवृत्तिर्न** इति नियमात् सुन्दरः कृष्णः इवाचरति इत्यत्र क्यङ् प्रत्ययः न भवति। एवं क्यच् प्रत्ययस्थलेऽपि महान्तं पुत्रम् आत्मनः इच्छति इत्यर्थेऽपि क्यच् प्रत्ययः न भवति।

---

[1] नमोवरिवश्चित्रङः क्यच् - पा.3.1.19

**क्यङ् प्रत्ययस्य विशेषसन्दर्भाः –**

[1]उत्साहेऽर्थे कष्टशब्दात् क्यङ् प्रत्ययः। उदाहरणम् – कष्टायते। कष्टाय क्रामति इत्यर्थः।

[2]रोमन्थं वर्तयतीत्यर्थे तपः चरतीत्यर्थे च कर्मभूताभ्यां रोमन्थ-तपश्शब्दाभ्यां क्यङ् प्रत्ययः। उदाहरणम्– रोमन्थं वर्तयतीत्यर्थे रोमन्थायते । चर्वितस्य आकृष्य पुनश्चर्वणम् इत्यर्थः। तत्रापि विशिष्य हनुचालने एवायं प्रयोगः। अन्यत्र कीटो रोमन्थं वर्तयतीत्यादि वाक्यमेव।

तपः चरतीत्यर्थे तपस्यति। अत्र क्यङन्तस्य ङित्त्वेऽपि विशेषवचनात् आत्मनेपदं प्रबाध्य, परस्मैपदं विहितम्[3]।

एवं बाष्पायते – ऊष्मायते – फेनायते इत्यत्र उद्वमनेऽर्थे क्यङ् प्रत्ययः[4]।

शब्दायते-वैरायते –इत्यत्र करणेऽर्थे क्यङ् प्रत्ययः[5]।

[6]सुखं वेदयते इत्यर्थे वेदनाकर्मीभूतेभ्यः सुखादिशब्दात् द्वितीयान्तात् क्यङ् प्रत्ययः स्यात् आत्मनश्चेत् सुखादीनि स्युः। उदाहरणम् – सुखायते – सुखं वेदयते इत्यादि। परस्य सुखं वेदयते इत्याद्यर्थे क्यङ् न भवति।

**5) क्यष् प्रत्ययः – लोहितादिडाज्भ्यः क्यष्** (पा.3.1.13) इति सूत्रेण भगवता पाणिनिना क्यष् प्रत्ययः विहितः। लोहितादिभ्यः डाच् प्रत्ययान्तेभ्यः क्यष् प्रत्ययः स्यात् अभूततद्भावेऽर्थे विवक्षिते। उदाहरणम् – अलोहितः लोहितः भवति इत्यर्थे **लोहिताय** इति सनाद्यन्तः क्यष् प्रत्ययान्तः धातुः। **वा क्यषः** इति शास्त्रात् परस्मैपदविकल्पः। पक्षे आत्मनेपदप्रत्ययाश्च। उदाहरणम् – लोहितायति लोहितायते इत्यादि।

---

[1] कष्टाय क्रमणे - पा.3.1.14

[2] कर्मणो रोमन्थतपोभ्यां वर्तिचरोः - पा.3.1.15

[3] तपसः परस्मैपदं च इति वार्तिकम् - वा.1733

[4] बाष्पोष्मभ्यामुद्वमने - पा.3.1.16, फेनाच्चेति वक्तव्यम् - वा.1734

[5] शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे - पा.3.1.17

[6] सुखादिभ्यः कर्तृवेदनायाम् - पा.3.1.18

भवनेऽर्थे भृशादिभ्यः शब्देभ्यः अभूततद्भावे विषयभूते क्यष् विहितः[1]।

**6) क्विप् प्रत्ययः –** प्रत्ययोऽयं वार्तिककारैरनुशिष्टः। **सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः** इति तदीयं वार्तिकम्। आचरतीत्यर्थे अयं प्रत्ययः। अयं सर्वलोपी प्रत्ययः। अस्यैतावानेवोपयोगः इति भाति – साक्षात् प्रातिपदिकेभ्यः तिङामप्रवृत्तेः, क्वचित् तादृशप्रयोगान् इष्टान् साधयितुं क्विप् प्रत्ययं विधाय, तस्य सनाद्यन्तत्वात् धातुत्वं सम्पाद्य, ततः तिङादिः कर्तुं शक्य इति। उदाहरणम् – कृष्ण इव आचरति इत्यर्थे कृष्ण इत्यस्मात् प्रातिपदिकात् क्विप् प्रत्यये सर्वलोपित्वात्, प्रत्ययलक्षणेन क्विबन्तत्वात् कृष्णशब्दस्य सनाद्यन्ता धातवः इति सूत्रेण धातुसंज्ञा सिध्यति। ततः तिङाद्युत्पत्तौ कृष्णति इत्यादिप्रयोगः इति।

ईदृशी व्यवस्था कृत्प्रत्ययेषु भगवता सूत्रकारेण प्रादर्शि। तथाहि – केवलेभ्यः धातुभ्यः सुप् दुश्शकः विधातुम्, तिङाम् अपवादत्वात्। अतः तेभ्यः कर्त्रर्थे क्विप् प्रत्ययः विहितः सूत्रकारेण **अन्येभ्योऽपि दृश्यते** (पा.3.2.178) इति सूत्रेण। तस्य सर्वलोपित्वेऽपि प्रत्ययलक्षणेन क्विबन्तत्वात् कृदन्तत्वात् **कृत्तद्धितसमासाश्च** (पा.1.2.46) इति सूत्रेण प्रातिपदिकसंज्ञासिद्धिः, ततः स्वाद्युत्पत्तिरिति।

**7) णिच्प्रत्ययः –** मुण्डयति इत्याद्युदाहरणम्। मुण्डं करोतीत्यादि तदर्थः।
अयं णिच् प्रत्ययः त्रिभिः सूत्रैः विहितः। वार्तिकेनैकेन च। तथाहि –

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् (पा.3.1.21)

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा.3.1.25)
अत्र सूत्रद्वयेनापि करोत्यर्थ एव प्रत्ययः विहितः।

हेतुमति च (पा.3.1.26) इति। प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोः णिच् प्रत्ययः विहितः। गन्तुं प्रेरयति गमयति इत्याद्युदाहरणम्।

**8) यङ् प्रत्ययः – धातोरेकाचो हलादेः क्रियासमभिहारे यङ्** (पा.3.1.22) इति सूत्रेण विहितः। क्रियासमभिहारे - पौनःपुन्ये भृशार्थे च द्योत्ये हलादेः धातोः एकाचः यङ् प्रत्ययः

---

[1] भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः - पा.3.1.13

विधीयते। बोभूयते, पापच्यते इत्याद्युदाहरणम्। पुनःपुनः भवति अतिशयेन भवति इति वा अर्थः।

यङन्तस्थले प्रयोगवैचित्र्यं द्रष्टुं शक्यमस्माभिः, यङ् प्रत्ययस्य लुग्विहितः भगवता पाणिनिना **यङोऽचि च** (पा.2.4.74)इति सूत्रेण। तेन यङ्प्रत्ययसत्त्वे आत्मनेपदप्रयोगः, तल्लुकि परस्मैपदित्वेन प्रयोग इत्येवं व्यवस्था सिद्ध्यति। यङ्लुकि – बोभवीति – बोभोति इत्यादि प्रयोगः।

केभ्यश्चित् धातुविशेषेभ्यः अर्थविशेषे यङ् प्रत्ययः विहितः। तथाहि –

**नित्यं कौटिल्ये गतौ** (पा.3.1.23) कुटिलं व्रजति – वाव्रज्यते इत्याद्युदाहरणम्।

**लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्** (पा.3.1.24) गर्हितं लुम्पति लोलुप्यते इत्यादि।

**9) यक् प्रत्ययः –** कण्ड्वादिभ्यः विहितः अयं प्रत्ययः **कण्ड्वादिभ्यो यक्** (पा.3.1.27) इति सूत्रेण। अयं प्रत्ययः स्वार्थिकः। कण्ड्वादयः द्विधा – धातवः, प्रातिपदिकानि च। उदाहरणम्- कण्डूयति कण्डूयते इत्यादि। कण्डूञ् इति धातोः ञित्त्वात् अयमुभयपदी।

**10) आय प्रत्ययः – गुपूधूपविच्छिपणिपनिभ्यआयः** (पा.3.1.29) इति भगवतः सूत्रम्। अयं प्रत्ययः स्वार्थिकः। गुपू धातोः अनुबन्धलोपोत्तरं स्वार्थे आय प्रत्यये कृते गोपाय इति रूपम्। अयं सनाद्यन्तत्वात् धात्वन्तरम्। ततः लडादिः इति प्रक्रियाक्रमः। गोपायतीत्यादि उदाहरणम्। प्रत्ययोऽयं आर्धधातुकेषु विषयभूतेषु विकल्पेन विधीयते।

**11) ईयङ् प्रत्ययः – ऋतेरीयङ्** (पा.3.1.29) इति भगवतः पाणिनेः सूत्रम्। ऋतिः धातुः सौत्रः। अस्य धातोः जुगुप्सा, कृपा चार्थौ इति प्रामाणिकेषु ग्रन्थेषूल्लेखः दृश्यते। उदाहरणम्– ऋतीयते इति। ईयङ् प्रत्ययान्तस्य सनाद्यन्तस्य धातुसंज्ञा, ङित्त्वात्, आत्मनेपदे एव प्रयोगः।

**12) णिङ् प्रत्ययः – पुच्छभाण्डचीवराण्णिङ्** (पा.3.1.20) इति भगवतः सूत्रम्। पुच्छ-भाण्ड-चीवरशब्देभ्यः विहितः णिङ् प्रत्ययः। अयं स्वार्थिकः। एतत्प्रत्ययान्तस्य सनाद्यन्तत्वात् धातुसंज्ञा। प्रत्ययस्य ङित्त्वात् आत्मनेपदमेव। उत्पुच्छयते, सम्भाण्डयते इत्यादि।

एवं णिङ् विधायकं द्वितीयं सूत्रम् – **कमेर्णिङ्** (पा.3.1.30) इति। कामयते इत्याद्युदाहरणम्।

एवं समासेन सनादीनां द्वादशानां परिचयः प्रवर्तितः। अत्र सर्वत्र सनादिप्रत्ययानां वृत्त्यन्तर्गतत्वात् सामर्थ्यसत्त्व एव इमे प्रत्ययाः। एवं सविशेषणानां वृत्तिर्नेति नियमस्य जागरूकत्वात् सविशेषणेषु वृत्तिः न जायते। वाक्यमेव प्रयुज्यत इति विवेक्तव्यम्।

**उपसंहारः –** लेखेऽस्मिन् यथाप्रतिज्ञं प्रत्ययपदार्थः, एतच्छास्त्रेण विहितानां प्रत्ययानां परिचयः, सनादिप्रत्ययविषयको विमर्शश्च यथाग्रन्थं व्यधायि। सनादयः प्रत्ययाः वृत्तिष्वन्तर्भवन्ति। अतः एतदन्ताः धातुसंज्ञकाः विशिष्टार्थबोधकत्वात् विलक्षणतामावहन्ति। ईदृशैः शब्दैः पुष्टेयं संस्कृता वाक्। इमामुपास्महे वयम्। एतस्याः व्याकृतिरूपमिदं शास्त्रमधीमहे, यदध्येतृषु वृद्धिरनुगृहीता भगवता भाष्यकृता, येन महता देवेन साम्यं लभेमहि, येनाध्ययनेन वाङ्गो विवृणुयाच्चेति। तदुक्तं **दण्डिना** महाकविना – "श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।" इति। शम्।

यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव मे नहि।
यदत्रासौष्ठवं किञ्चित् तन्ममैव गुरोर्न हि॥

**उपयुक्तग्रन्थसूची**

1) अष्टाध्यायीसूत्रपाठः – भगवत्पाणिनिविरचितः
2) अमरकोषः – सुधाव्याख्योपेतः
3) वैयाकरणसिद्धान्तकौमुदी – मूलमात्रम्
4) वृत्तिविचारमु (तेलुगु)
5) शब्दकौस्तुभः – द्वितीयो भागः (प्रथमाध्यायद्वितीयपादमारभ्य तृतीयाध्याय-द्वितीयपादान्तो भागः)
6) व्याकरणमहाभाष्यम् – तृतीयभागः (तृतीयाध्यायभाष्यम्)
7) काशिका न्यास-पदमञ्जरी-भावबोधिनीसमेता

❑ ❑ ❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# नित्यवीप्सयोः क्रियासमभिहारे द्वे वाच्ये, आभीक्ष्ण्ये द्वे वाच्ये, इत्यादि वार्तिकविषये किञ्चित्

**कुप्पा बिल्वेश शर्मा***

याहियाहीति याति इत्यत्र "**क्रियासमभिहारे द्वे वाच्ये**" इति द्विर्वचनं श्रूयते। एवमेव [1]यङन्तस्थले "**क्रियासमभिहारे द्वे वाच्ये**" इति द्वित्वं कुतो न भवति? इति शङ्का। [2]**"सन्यङोः"** (पा.सू 6.1.9) इति द्वित्वं तु धातुद्वित्वम्। **क्रियासमभिहारे द्वे वाच्ये** इति द्वित्वं तु पदद्वित्वम्। अतः यङन्तस्य पदस्य अनेन वार्तिकेन द्वित्वं आशङ्क्यते। अर्थात् पापच्यते पापच्यते यङन्तस्य नित्यं द्वित्वं स्यात्। तत्तु नेष्यते।

द्विर्वचनविषये शास्त्रे अनेकानि वाक्यानि श्रूयन्ते। यथा **"नित्यवीप्सयोः"** (पा.सू 8.1.4) इति सूत्रम्, "**क्रियासमभिहारे द्वे वाच्ये**" इति वार्तिकम्, [3]"**आभीक्ष्ण्ये द्वे वाच्ये**" इति वार्तिकञ्च।

**अत्र सन्देहः**

कः सन्देहः ? **नित्यवीप्सयोः** इति सूत्रे नित्यत्वं नाम आभीक्ष्ण्यमिति, आभीक्ष्ण्यं नाम पौनःपुन्यमिति विवरणम्। तथा च पौनःपुन्येऽर्थे **नित्यवीप्सयोः** इति सूत्रेणैव सिद्धे, **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकं किमर्थम्? (उभयमपि पदद्वित्वमेव, आष्टमिकमेव) केवलं **भृशार्थे द्वे वाच्ये** इत्येव वार्तिकं अनुशासनीयम्। एवमेव **आभीक्ष्ण्ये द्वे वाच्ये** इति वार्तिकमपि नारम्भणीयमिति चेत् -

---

* सहायकाचार्यः, व्याकरणविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

[1] धातोरेकाचो हलादेः क्रियासमभिहारे यङ् सू.पा – 3.1.12

[2] सन्नन्तस्य यङन्तस्य च प्रथमस्यैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य

[3] प्रकारे गुणवचनस् 8.1.12 –इति सूत्रभाष्ये वर्तते।

**नागेशकृतव्यवस्था**

सत्यम्। अत्र व्यवस्थापेक्षा वर्तते। व्यवस्था च इत्थं - **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकेन यङन्तस्य द्वित्वं न भवति।

तथाहि **भाष्ये** यथान्यासे दोषमाशङ्क्य, **क्रियासमभिहारे लोट्, मध्यमपुरुषैकवचनस्य द्वे भवतः** इति न्यासं कृत्वा अनेन वचनेन लोण्मध्यमपुरुषैकवचनस्यैव द्विर्वचनमुक्तम्। एवं न्यासे **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकमपि न पृथक् पठनीयम्। यद्यप्ययमस्थिरपक्षः, यतः लोण्मध्यमपुरुषैकवचने एव द्वित्वप्रवृत्तेः। सर्वेषु लकारेषु, वचनेषु च द्वित्वं इष्यते। तथापि न्यासान्तरकल्पनया यः अर्थो ध्वनितः **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकं लोण्मध्यपुरुषमात्रविषयकमिति सोर्थः अबाधितः एव।

लोटः क्रियासमभिहारे वृत्तिस्तु वृद्धकुमारीन्यायेन बोध्यम्। न च **क्रियासमभिहारे द्वे वाच्ये** इति वचनान्तरमेवेति भ्रमितव्यम्। गौरवात्। किञ्च अष्टमाध्याये भाष्ये **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकविवरणसन्दर्भे **लुनीहि लुनीहीत्येवायं लुनातीति** लोडन्तोदाहरणमेव प्रदर्शितम्। तेनापि क्रियासमभिहारे द्वे वाच्ये इति वार्तिकं लोण्मध्यमपुरुषमात्रविषयकमिति स्पष्टमवगम्यते। अतः यङन्तस्थले **क्रियासमभिहारे द्वे वाच्ये** इति द्वित्वं न भवति।

**अत्र आशङ्का –**

[1]क्रियासमभिहारे यङ् विहितः, [2]द्वित्वं च विहितम् । यङन्तस्थले **क्रियासमभिहारे द्वे वाच्ये** इति द्वित्वं न भवतीति च उक्तम्। भवतु ! यङन्तस्थले **क्रियासमभिहारे द्वे वाच्ये** इति द्वित्वं मास्तु। यङन्तस्थले पौनःपुन्ये अर्थे **नित्यवीप्सयोः** इति द्विर्वचनं कुतो न भवति?। न च **"उक्तार्थानामप्रयोगः"** इति न्यायेन पौनःपुन्यस्य यङा उक्तत्वात् नहि तत्र पुनः **नित्यवीप्सयोः** इति द्विर्वचनं भवतीति वाच्यम्। [3]द्वौ ब्राह्मणौ इत्यादिवाचकद्योतकसमुच्चयस्थले

---

[1] धातोरेकाचो हलादेः क्रियासमभिहारे यङ् – पा सू.3.1.12

[2] क्रियासमभिहारे द्वे वाच्ये।

[3] मञ्जूषायामनभिहिते इति सूत्र व्याख्यावसरे उक्तम्।

उक्तार्थानामप्रयोगः इति न्यायस्य सञ्चारो नास्तीति मञ्जूषायां व्यवस्थापितम्। अतः यङन्तस्थले यङा उक्तेपि पौनःपुन्यरूपे अर्थे, पुनः पौनःपुन्यरूपार्थे **नित्यवीप्सयोः** इति द्विर्वचनं कुतो न भवतीति शङ्का भवत्येव।

**समाधानम् –**

अत्रायं विवेकः -"**धातोरेकाचो हलादेः क्रियासमभिहारेयङि**"ति (3.1.22) क्रियासमभिहारे यङ् उक्तः। क्रियासमभिहारो नाम पौनःपुन्यं भृशार्थश्च। यङन्तस्थले केवलपौनःपुन्यार्थो वा, केवलभृशार्थो वा यदा विवक्षितः तदा पूर्वोक्तरीत्या **क्रियासमभिहारे द्वे वाच्ये**इति द्विर्वचनं न भवति। क्रियासमभिहारे द्वे वाच्ये इत्यस्य लोण्मात्रविषयकत्वेन पूर्वं व्यवस्थापितत्वात्। एवमेव पौनःपुन्ये यङि, ततो भृशार्थविवक्षायां "**नित्यवीप्सयोः**" इति सौत्रं द्विर्वचनं न भवति। भृशार्थे **नित्यवीप्सयोः** इति द्विर्वचनस्य विधानाभावात्। पौनःपुन्यार्थे एव **नित्यवीप्सयोः** इति द्विर्वचनस्य विहितत्वात्। नित्यत्वं नाम पौनःपुन्यमित्युक्तम्। भृशार्थे यङि, ततः पौनःपुन्यार्थविवक्षायां तु नित्यवीप्सयोः इति द्विर्वचनं भवत्येव। **पापच्यते पापच्यते** इति। भृशं क्रियां निर्वर्तयन् पुनः पुनः पचति इत्यर्थः।

**अत्र शङ्का**

पौनःपुन्ये अर्थे यङि, पुनः पौनःपुन्यार्थविवक्षायां **नित्यवीप्सयोः** इति द्विर्वचनं कुतो न भवति ? न च उक्तार्थानामप्रयोगः इति न्यायेन पौनःपुन्यस्य यङा उक्तत्वात् नहि तत्र पुनः **नित्यवीप्सयोः** इति द्विर्वचनं भवतीति वाच्यम्। द्वौ ब्राह्मणौ इत्यादिवाचकद्योतकसमुच्चयस्थले **उक्तार्थानामप्रयोगः** इति न्यायस्य सञ्चारो नास्तीति कारके व्यवस्थापितम्। अतः पौनःपुन्ये अर्थे यङि, पुनः पौनःपुन्यार्थे एव **नित्यवीप्सयोः** इति द्विर्वचनं कुतो नभवतीति शङ्का तु तथैव स्थिता।

उच्यते - शास्त्रे द्वित्वविधायकवाक्यानि अनेकानि वर्तते। **नित्यवीप्सयोः, क्रियासमभिहारे द्वे वाच्ये, आभीक्ष्ण्ये द्वे वाच्ये** इत्यादीनि। तत्र पौनःपुन्यार्थे नित्यवीप्सयोरिति द्वित्वं सिद्धमेव। केवलं भृशार्थे एव द्वित्वमनुशासनीयम्। अर्थात् भृशार्थे द्वित्वमात्रफलके

**भृशार्थे द्वे वाच्ये** इत्येव वक्तव्ये वार्तिककृता **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकं किमर्थं प्रणीतम् ? वार्तिके क्रियासमभिहारपदं व्यर्थमिति शङ्का ।

तथा च **वार्तिके** क्रियासमभिहारपदं व्यर्थं सत् ज्ञापयति - पौनःपुन्यस्य केनचिद्योतिते सौत्रद्वित्वं न प्रवर्तते इति। अतो यङन्ते **नित्यवीप्सयो**रिति न सौत्रं द्वित्वम्। पौनःपुन्यस्य यङा द्योतितत्वात्। **सौत्रद्वित्वं** न प्रवर्तते इति कथनात् **लुनीहिलुनीहीत्येवायं लुनाति** इत्यत्र लोटा पौनःपुन्यस्य द्योतितत्वेपि वार्तिकोक्तं द्वित्वं भवत्येव। तदर्थमेव **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकारम्भः।

एतावता **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकं लोण्मध्यपुरुषमात्रविषयकमिति, **नित्यवीप्सयो**रिति सौत्रं द्वित्वं च यङन्ते न प्रवर्तते इति च व्यवस्थापितम्। एवं यदा व्यवस्था तदा **भुक्त्वा भुक्त्वा, भोजं भोजं** इत्यत्र **क्रियासमभिहारे द्वे वाच्ये** इति द्वित्वं न भवति, तस्य लोण्मध्यपुरुषमात्रविषयकत्वात्। तत्र द्वित्वसिद्धये **आभीक्ष्ण्ये द्वे वाच्ये** इति वार्तिकान्तरमपि पठनीयम्।

न च भुक्त्वा भुक्त्वा, भोजं भोजं इत्यत्र **नित्यवीप्सयो**रिति सौत्रद्वित्वेनैव सिद्धे **आभीक्ष्ण्ये द्वे वाच्ये** इति वार्तिकान्तरं किमर्थमिति प्रष्टव्यम्। पौनःपुन्यस्य केनचिद्योतिते सौत्रद्वित्वं न प्रवर्तते इति ज्ञापनानुसारेण, क्त्वाणमुल्भ्यां पौनःपुन्यस्य द्योतितत्वात् सौत्रद्वित्वमपि न प्रवर्तते। अतः वाक्यत्रयमपि अपेक्षते इति फलितम्।

**भट्टोजिदीक्षितस्तु -**

क्त्वाणमुल्भ्यामेव आभीक्ष्ण्यस्य (पौनःपुन्यस्य) द्योतितत्वात् अप्राप्तद्वित्वविधानार्थं **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकम्। अन्यथा **उक्तार्थानामप्रयोग** इति द्वित्वं न स्यात् इत्यवोचत्। तन्न स्वरसम्। द्योतकसमुच्चयस्यापि दृष्टत्वादिति उक्तोत्तरमेतत्। दीक्षितमते **आभीक्ष्ण्ये द्वे वाच्ये** इति वार्तिकं च व्यर्थं स्यात्।

**दीक्षितपक्षतः आक्षेपः**

[1]**सिद्धान्तकौमुद्यां** दीक्षितः पौनःपुन्ये अर्थे **नित्यवीप्सयो**रिति सिद्धे भृशार्थे द्वित्वार्थमिदं **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकम्। ततःपरं अस्य भृशार्थे एव द्विर्वचनफलकत्वे, **भृशार्थे द्वे वाच्ये** इत्येव वक्तव्ये, क्रियासमभिहारपदं व्यर्थमित्याशङ्क्य, पौनःपुन्येपि लोटा सह समुच्चित्य द्योतकतां लब्धुं **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकमित्यवोचत्। लुनीहि लुनीहीत्येवायं लुनाति इत्यत्र लोटा सह द्विर्वचनस्य च समुच्चयार्थं **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकम्। लोटैव पौनःपुन्यस्य द्योतितत्वात् तत्र **नित्यवीप्सयो**रिति द्विर्वचनस्य अप्राप्तौ सत्यां **क्रियासमभिहरे द्वे वाच्ये** इति वार्तिकेन द्वित्वमिति भावः।

**अत्र शङ्का -**

नन्वत्र यथा लोटा सह समुच्चित्य द्विर्वचनं जातं, तथा क्रियासमभिहारेयङि, यङा सह समुच्चित्य **क्रियासमभिहारे द्वे वाच्ये** इति द्विर्वचनं स्यात् ? **पापच्यते पापच्यते** इति, **बोभूयते बोभूयते** इति चेत् न। लोट् क्रियासमभिहारं व्यभिचरति। समुच्चयेपि जायमानत्वात्। अतः केवलः लोट् क्रियासमभिहारं द्योतयितुं न समर्थः। ततश्च लोट्-द्विर्वचनयोरेव मिलितयोः क्रियासमभिहारद्योतकत्वम्। न त्वेकैकस्येति युक्तं लोडन्तस्य द्विर्वचनम्। यङ् तु क्रियासमभिहारं न व्यभिचरतीति, अतः द्विर्वचनं विनैव तस्य क्रियासमभिहारद्योतकत्वम्। तेन यङन्तस्य न द्विर्वचनमिति। तथा सति कथं नागेशोक्तज्ञापकवचनं सम्भवति ?

**समाधानम् -**

अर्थान्तरेपि लोटः विधानेन केवललोटः क्रियासमभिहारद्योतने सामर्थ्यं नास्तीति यदुक्तं तन्न युक्तम्। अकजादेरनेकत्र द्योत्यार्थे विधानेपि, केवलस्यैव अकजादेः प्रकरणादिसहायेन तत्तदर्थद्योतकत्वं सम्भवति। सर्वकः इत्यकज्विशिष्टे समभिहारादिकं विनैव

[1] बालमनोरमा, तत्त्वबोधनीसहिता सिद्धान्तकौमुदी - 2, पुटसंख्या - 671

प्रकरणादिसहायेन तत्तदर्थावगतेर्दृष्टत्वात्। अन्यथा अकजादीनां केवलानां द्योतकत्वासम्भवे केवलानां प्रयोगाभावः प्रसज्येत । अतः उपर्युक्तज्ञापकाश्रयणमेव वरम्। सिद्धान्तकौमुद्यां तु वृत्तिकाररीत्या उक्तम् ।

**कैयटमतम्** -

यत्तु कर्ता यां क्रियां प्राधान्येन अनुपरमन् करोति तद् नित्यम्। पुनः पुनः क्रियायाः विच्छेदेनोत्पत्तिः आभीक्ष्ण्यमिति नित्याभीक्ष्ण्ययोः भेदः उक्तः कैयटेन। परन्तु तत्र प्रमाणं नास्ति, भाष्यविरोधश्च ।

**नित्यवीप्सयोः** इति भाष्ये तद्यदाभीक्ष्ण्ये वर्तते तस्येदं ग्रहणं इत्युक्तम् । अनेन भाष्येण नित्यत्व, आभीक्ष्ण्ययोः समानार्थकत्वमेव प्रतीयते। न तु कैयटोक्तरीत्या अर्थभेदः। नागेशकृतव्यवस्था तु भाष्यमनुवर्तते इति दिक्।

क्रियासमभिहारे यङ्, क्रियासमभिहारे लोट् च उक्तौ। कदा लोट्? कदा यङ्? यङ्सूत्रभाष्ये अयमंशःविचारितः।

**निर्णीतार्थमात्रमुच्यते** -

"**धातोरेकाचो हलादेः क्रियासमभिहारेयङ्**" (3.1.22) इति सूत्रे "**धातोः कर्मणः समानकर्तृकादिच्छायां वा**" (3.1.7) इत्यतः वा इत्यनुवृत्तिं कृत्वा क्रियासमभिहारेयङ् विकल्पेन भवतीति व्याख्येयम्। यङभावपक्षे "**क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः**" (3.4.2) इति लोट्। लोटः धातुसम्बन्धश्च अपेक्षते इति शम् ।

## परिशीलिताः ग्रन्थाः

१) सिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीसहिता - सम्पा. गिरिधरशर्माचतुर्वेदः, मोतीलाल-बनारसीदास, वाराणसी, २००१

२) महाभाष्यम् प्रदीपोद्योतसहितम् (तृतीयखण्डम्) - चौखम्बासंस्कृतप्रतिष्ठानम्, २००४

३) लघुशब्देन्दुशेखरः चन्द्रकलासमन्वितः (तृतीयोभागः) - चौखम्बाविद्याभवन, वाराणसी, २००१

❑❑❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# हठयोगाभ्यासानुकूलदेशकालस्थानानि

**डा. तपन कुमार घडेइ***

हठयोगशास्त्रमिदं यद्यपि विस्तृतं विद्यते परन्तु अहं केवलं हठयोगस्थविषयत्रये देशकालस्थानानामित्येषां विषये किञ्चिदालोचयामि। हठयोगाभ्यास: कुत्र? कस्मिन् देशे? कस्मिन् काले ? कस्मिन् स्थाने च कर्त्तव्य: तदिदानीं हठयोगदृष्ट्यालोच्यते।

**हठयोगप्रदीपिकादृष्ट्या**

**देश: -**

१) यस्मिन् देशे कश्चिदुत्तम:, बुद्धिमान्, सच्चरित्रराज: शासनं कुर्यात्। अस्मादुच्यते - "यथा राजा तथा प्रजा:" इति महद्दुक्ते:, राज्ञ: शोभनत्वात् प्रजानामपि शोभनत्वं सूचितम्।

२) तद्देशस्य प्रजा: धार्मिका: भवेयु:।

३) यत्र कदापि दुर्भिक्षं न भवेत्।

४) यत्र साधक: भिक्षां प्राप्तुं कठिनतां नानुभवेत्।

५) यत्र लुण्ठका:, चौरा:, दुष्टपुरुषा: न भवेयु:। तेन चिरवास: कर्तुं शक्यते।

६) यत्र व्याघ्र-सिहांदय: हिंस्रप्राणिभ्य: भयं न भवेत्। इत्युक्ते उपद्रव: रहित: स्यात्।

७) यत्र साधक: निर्भयेन दीर्घकालं यावत् साधनां कर्तुं प्रभवेत्।

८) यत्र भूमि: कठिना न भवेत्। इत्युक्ते समतला भवेत्।

९) यत्राग्निजलेभ्य: भयं न भवेत्।

---

* सहायकाचार्य:, योगविज्ञानविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:।

१०) यत्र जनसमर्द्दः न भवेत्। तद्द्वारा कलहोऽपि न जायेत। अस्मादुच्यते श्रीमद्भागवते -

**वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि।**
**एक एव चरेत् तस्मात् कुमार्या इव कङ्कणम्**[१]।। इति।

महाभारतशान्तिपर्वणि यथा –

**बहूनां कलहो नित्यं द्वयोः संकथनं ध्रुवम् ।**
**एकाकी विचरिष्यामि कुमारीशङ्खको यथा**[२]।।

बृहत्पराशरस्मृतौ –

**यतिभिस्त्रिभिरेकत्र द्वाभ्यां पञ्चभिरेव वा।**
**न स्थातव्यं कदाचित् स्यात् तिष्ठन्तो नाशमाप्नुयुः।।**
**बहुत्वं यत्र भिक्षूणां वार्तास्तत्र विचित्रकाः।**
**स्नेह-पैशुन्यमात्सर्यं भिक्षूणां नृपतेरपि**[३]।।

एतद्देशे हठयोगाभ्यासः सुलभेन साधकेन कर्तुं शक्यः।

**स्थानम् -**

१) योगाभ्यासाय साधकः कुटीरं निर्मापयेत्।
२) धनुष्प्रमाणपरिमिता नाम चतुःहस्तपरिमिता भूमिः भवेत्।
३) कुटीरं शिला-पर्वतप्रदेशेषु नैव भवेत्।
४) अपि तु समतलाभूमौ भवेत्।

---

[१] श्रीमद्भागवतपुराणम् - ११/९/१०
[२] महाभारतशान्तिपर्व- १७८/१३
[३] बृहत्पराशरस्मृतिः - १२/१३५-१३६

५) यत्र बंसवृक्षाः अधिकाः सन्ति तत्र कुटीरं नैव निर्मातव्यम्। कुतः इत्युक्ते बंसवृक्षाणां घर्षणेन कदाचिदग्निः ज्वलेत्। अतः अग्निभयकारणात् तत्स्थाने कुटीरं न निर्माणं कुर्यात्।

६) यत्र यस्याः नद्याः कूले वन्याः अधिकाः आयान्ति तत्रापि कुटीरनिर्माणं न कर्त्तव्यम्। कस्मादित्युक्ते वन्यागतायां सत्यां कुटीरं कदाचिन्निमज्जेत्।

७) अतः हठयोगाभ्यासी साधकः कुटीरं निर्जनस्थाने निर्माणं कुर्यात्। नोचेत् अन्यकुत्रापि यदि सः निर्मापयेत् तर्हि जनानां कलकलकारणात् योगाभ्यासे कदाचित् विघ्नाः जायेरन्। तथा भयानि अपि विद्येरन् ।उक्तञ्च तेन प्रदीपिकाकारेण-

**सुराज्ये धार्मिके देशे सुभिक्षे निरुपद्रवे।**
**धनुः प्रमाणपर्यन्तं शिलाग्निजलवर्जित ।**
**एकान्ते मठिकामध्ये स्थातव्यं हठयोगिना[१] ।।**

एतेषु शुभस्थानेषु अथवा हितप्रदस्थानेषु कुटीरं निर्माणं सर्वदा समुचितं भवेदिति शास्त्रकाराः वदन्ति ।

**कुटीरनिर्माणम् -**

अधुना हठयोगानुसारेण कुटीरनिर्माणपद्धतिः अत्र आलोच्यते। यत्र साधकः सौलभ्येन हठयोगं कर्त्तुं शक्नुयात् । यथा -

१) कुटीरस्य द्वारं क्षुद्रं भवेत् ।

२) तस्मिन् कुटीरे छिद्राणि, गवाक्षाः, गर्त्तादयः अपि नैव भवेयुः। कुतः इत्युक्ते यदि छिद्राणि, गवाक्षाः, गर्त्तादयः भवन्ति तर्हि मूषिकादयः सुलभेन प्रवेष्टुं पारयन्ति।

---

[१] हठयोगप्रदीपिका- १/१२

३) तत्कुटीरस्य अन्तर्भागः बहिर्भागभूमिः उच्चा-नीच्चा अभूत्वा समतला भवेत्। येन साधकः सुलभेन योगाभ्यासं कर्तुं पारयेत्।

४) यस्य कुटीरस्य भित्तिः गोमय-मृत्तिकाद्वारा लिप्ता स्यात्। स्वच्छा भवेत्। कीटादयजन्तवः न भवेयुः।

५) तत्स्थानाद्बहिर्देशे मनोहरमण्डपं, सुन्दरकूपश्च भवेताम्। तच्च मण्डपं कूपश्च तत्कुटीरस्य निकटे भवेताम्।

६) तस्य कुटीरस्य चतुःपार्श्वे प्राकारः अपि आच्छादितो भवेत्। यद्द्वारा बहिःस्थात् जन्तवः अन्तः आगन्तुं न पारयेयुः।

एतादृशं स्थानं योगाभ्यासं कर्तुं योगिनः समुचितमिति आमनन्ति। यदुक्तमात्मारामेण -

**अल्पद्वारमरन्ध्रगर्तविवरं नात्युच्चनीचायतम्,**
**सम्यग्गोमयसान्द्रलिप्तममलं निःशेषजन्तूज्झितम् ।**
**बाह्ये मण्डपवेदिकूपरुचिरं प्राकारसंवेष्टितम्,**
**प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः**[1] **।।**

अयं विषयः नन्दिकेश्वरपुराणे अपि विमृष्टः। स च विषयः अत्रापि मितमात्रेण आलोच्यते। तत्र तावत् नन्दिकेश्वरः कुटीरशब्दस्यार्थः मठः इति उच्यते। तत्र तावत् मठस्य लक्षणम् इत्थमुक्तवान् । तथाहि -

**मन्दिरं रम्यविन्यासं मनोज्ञं गन्धवासितम् ।**
**धूपामोदादिसुरभि कुसुमोत्करमण्डितम् ।।**
**मुनि-तीर्थ-नदी-वृक्ष-पद्मिनी-शैलशोभितम् ।**
**चित्रकर्मनिबद्धं च चित्रभेदविचित्रितम् ।।**

[1] हठयोगप्रदीपिका- १/१३

**कुर्याद् योगगृहं धीमान् सुरम्यं शान्तवर्त्मना।**
**दृष्ट्वा चित्रगतान् शान्तान् मुनीन् याति गतः शमम्**[१] **।।**

## घेरण्डसंहितादृशा

अमुष्मिन् विषये घेरण्डसंहिताकारः घेरण्डमुनिः स्थानकालदेशानां विषये स्वाभिमतं प्रकटितवान् । तत्र पञ्चमोपदेशे प्राणायामप्रयोगसन्दर्भे एतं विषयमुपस्थापयत्।

वस्तुतः हठयोगस्य कश्चन क्रमः घेरण्डसंहितायां निश्चितः। तत्र आदौ स्थानं वक्तव्यम्। द्वितीये कालः वक्तव्यः। तृतीये अल्पाहरः कथनीयः। चतुर्थे नाडीशुद्धिः वक्तव्या। अवसाने च प्राणायामः कार्यः। अतः एते चत्वारः क्रमाः यदि हठयोगिसाधकैः समाचर्यन्ते हठयोगाभ्यासः सौलभ्येन सुकरेण कर्त्तुं च शक्येत ।

तदुक्तं घेरण्डेन - **आदौ स्थानं तथा कालं मिताहारं तथापरम् ।**
**नाडीशुद्धिं ततः पश्चात् प्राणायामं च साधयेत् ।।** इति।
(घेरण्डसंहिता- ५/२)

**स्थानम् -**

दूरदेशे, वने, राजधान्यां, जनसङ्गमे योगारम्भं न कुर्वीत। यदि योगारम्भं कुर्यात्, तर्हि सिद्धिं न प्राप्नुयात् । यथा –

**दूरदेशे तथारण्ये राजधान्यां जनान्तिके।**
**योगारम्भं न कुर्वीत कृतश्चेत् सिद्धि न भवेत्**[२] **।।**

दूरदेशे विश्वासः नैव जायते। अरण्ये सुरक्षायाः अभावः दृश्यते। नगर्य्यां सार्वजनिकं भवेत्। अस्मात् एतानि त्रीणि दूरदेश-अरण्य-नगरस्थानानि सर्वदा योगिभिः

[१] The Hathayogapradipika of Svatmarama, p. 12
[२] घेरण्डसंहिता- ५/३

योगाभ्यासाय त्यक्तव्यानि भवन्ति। यदुक्तम् -

**अविश्वासं दूरदेशे अरण्ये रक्षिवर्जितम्।**
**लोकारण्ये प्रकाशश्च तस्मात् त्रीणि विवर्जयेत्**[१]।। इति।

देशविषये यथा हठयोगप्रदीपिकायां विषय: उक्त: स च समानविषय: घेरण्डसंहितायामपि अभिहित: । यथा-

**सुदेशे धार्मिके राज्ये सुभिक्षे निरुपद्रवे।**
**कृत्वा कुटीरं तत्रैकं प्राचीरै: परिवेष्टितम्।।**
**वापीकूपतडागं च प्राचीरं मध्यवर्ति च।**
**नात्युच्चं नातिनिम्नं च कुटीरं कीटवर्जितम्।।**
**सम्यग्गोमयलिप्तं च कुटीरं तत्रनिर्मितम् ।**
**एवं स्थानेषु गुप्तेषु प्राणायामं समभ्यसेत्**[२]।।

**काल: –**

घेरण्डसंहितायां हठयोगविषये केचित्काला: निर्दिष्टा:। तद्यथा – ऋतु:, मास:, वर्षादय:। वस्तुत: यद्यपि षड्ऋतव: सन्ति। तेषु षड्ऋतुषु केषु ऋतुषु, केषु मासेषु अयं हठयोग: अभ्यास: कर्त्तव्य: तद्विषयेऽपि अत्र पुङ्खानुपुङ्खत्वेन विमर्शितोऽस्ति।

हेमन्ते, शिशिरे, ग्रीष्मे, वर्षासु हठयोगाभ्यास: कदापि नैव कर्त्तव्य:। यदि क्रियेत, तर्हि रोगा: भवेयु:। तर्हि वसन्तशरदृतो: हठयोगाभ्यास: करणीय:। अनेन शरीरं सुस्थं निरोगञ्च भवति । तथाहि –

**हेमन्ते शिशिरे ग्रीष्मे वर्षायां च ऋतौ तथा।**
**योगारम्भं न कुर्वीत कृते योगो हि रोगद:।।**

---

[१] घेरण्डसंहिता- ५/४

[२] तत्रैव - ५/५-७

**वसन्ते शरदि प्रोक्तं योगारम्भं समाचरेत्।**
**तथायोगी भवेत् सिद्धो रोगान्मुक्तो भवेद् ध्रुवम्[१]।।**

चैत्रमासादारभ्य फाल्गुनान्तं यावत् द्वयोः द्वयोः मासयोः ऋतवः भवन्ति। परन्तु चतुर्ष्वेव मासेष्वेकस्येव ऋतोः अनुभवः सञ्जायते।

**चैत्रादिफाल्गुनान्ते च माघादिफाल्गुनान्तिके।**
**द्वौ द्वौ मासौ ऋतुभागौ अनुभावश्चतुश्चतुः।।**
**वसन्तश्चैत्र वैशाखो ज्येष्ठषाढौ च ग्रीष्मकौ।**
**वर्षा श्रावणभाद्राभ्यां शरदाश्विनकार्तिकौ।**
**मार्गपौषौ च हेमन्तः शिशिरो माघफाल्गुनौ[२]।।**

| मासाः | ऋतवः |
|---|---|
| चैत्रः<br>वैशाखम् | मासद्वये वसन्तऋतोः प्रभावः भवति। |
| ज्येष्ठः<br>आषाढः | मासद्वये ग्रीष्मऋतोः प्रभावः भवति। |
| श्रावणः<br>भाद्रपदः | मासद्वये वर्षर्तोः प्रभावः भवति। |
| आश्विनः<br>कार्तिकः | मासद्वये शरदृतोः प्रभावः भवति। |
| मार्गशीर्षः | मासद्वये हेमन्तर्तोः प्रभावः भवति। |

[१] घेरण्डसंहिता- ५/८-९
[२] तत्रैव - ५/१०-११

| | |
|---|---|
| पौषः | |
| माघः | द्वयोः मासयोः शिशिरर्तोः प्रभावः भवति । |
| फाल्गुनः | |

कथमेकैकस्य ऋतोः अनुभवः चतुर्षु मासेषु जायते विद्वांसः इत्थं मतमुपस्थापयन्ति। यथा -

**माघादिमाधवान्तेषु वसन्तानुभवश्चतुः।।**
**चैत्रादि चाषाढान्तं च निदाघानुभवश्चतुः।**
**आषाढादि चाश्विनान्तं प्रावृषानुभवश्चतुः।।**
**भाद्रादिमार्गशीर्षान्तं शरदाऽनुभवश्चतुः।**
**ख्कार्तिकादिमाघमासान्तं हेमन्तानुभवश्चतुः।**
**मार्गादिचतुरो मासान् शिशिरानुभवश्चतुः[१]।।**

**मासानाम् ऋतुप्रभावः**

१) माघ-फाल्गुन-चैत्र-वैशाखमासेषु वसन्तर्तोरनुभवः जायते।
२) चैत्र-वैशाख-ज्येष्ठ-आषाढमासान्तं यावत् ग्रीष्मर्तोरनुभवः जायते।
३) आषाढ-श्रावण-भाद्रपद-आश्विनमासेषु वर्षर्तोरनुभवः जायते।
४) भाद्रपद-आश्विन-कार्तिक-मार्गशीर्षमासेषु शरदृतोरनुभवः जायते।
५) कार्तिक-मार्गशीर्ष-पौष-माघेमासेषु हेमन्तर्तोरनुभवः जायते।
६) मार्गशीर्ष-पौष-माघ-फाल्गुनेमासेषु शिशिरर्तोरनुभवः जायते।

आचार्यघेरण्डः घेरण्डसंहितायामित्थं विषयमन्तिमे उपस्थापयितुमिच्छति यत्

[१] घेरण्डसंहिता- ५/१२-१४

वसन्ते, शरदि च योगाभ्यासं नितान्तमाचरेत्। यदि एतयोः ऋतोः योगाभ्यासं कारयेत्, तर्हि कष्टाद्विना योगसिद्धिमाप्तुं शक्नुयादिति तस्य आशयः। तदुक्तं -

**वसन्ते वापि शरदि योगारम्भं समाचरेत्।**
**तदा योगो भवेत् सिद्धो विनायासेन कथ्यते**[1]।। इति।

हठयोगाभ्यासानुकुलदेशकालस्थानमित्ययं विषयः हठयोगप्रदीपिका-घेरण्डसंहितयोः सुष्ठु आलोचितः। सः च विषयः समत्वेन हठरत्नावल्यामपि श्रीनिवासयोगिना प्रतिपादितः । तथाहि -

**सुराष्ट्रे धार्मिके देशे सुभिक्षे निरुपद्रवे ।**
**एकान्तमठिकामध्ये स्थातव्यं हठयोगिना ।।**
**अल्पद्वारमरन्ध्रगर्तपिठरं नात्युच्चनीचायतम्**
**सम्यग्गोमयसान्द्रलिप्तविमलं निःशेषबाधोज्झितम् ।**
**बाह्ये मण्डपवेदिकूपरुचिरं प्राकारसंवेष्टितम्**
**प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः**[2] ।।

हठयोगाभ्यासी साधुः मठं वसेत्। सः च साधुः सर्वाभ्यः मानसिक-शारीरिकचिन्ताभ्यः दूरे तिष्ठेत्। मानसिक-शारीरिकचिन्तां त्यजेत् इत्यर्थः। तथा सद्गुरूपदिष्टमार्गमनुसरेत्। एवमाचर्य योगाभ्यासं कुर्यात्। उक्तं च -

**एवंविधे मठे स्थित्वा सर्वचिन्ताविवर्जितः।**
**गुरूपदिष्टमार्गेण योगमेव समभ्यसेत्**[3] ।।

---

[1] घेरण्डसंहिता- ५/१५

[2] हठरत्नावली- १/६६-६७

[3] हठयोगप्रदीपिका- १/१४

एतादृशी देशे, स्थाने स्थितेषु सत्सु योगिनः सुलभेन योगसाधनद्वारा सिद्धिमाप्तुं प्रभवन्ति नास्त्यत्र कापि विचिकित्सा।

अयं च सन्दर्भः स्कन्दपुराणेऽपि विमृष्टः। तदुच्यते -

**आचार्याद्योगसर्वस्वमवाप्य स्थिरधीः स्वयम् ।**
**यथोक्तं लभते तेन प्राप्नोत्यपि च निर्वृतिम्**[१] ।। इति ।

यः स्थिरमान् मानवः स एव योगसाधनां कर्त्तुं प्रभवति। स्थिरबुद्ध्या यत् किमपि तेनासाद्यते तत् सुलभः तस्य जायते। यदि एतादृशं स्थिरबुद्धिमान् भवति सुलभेन योगं प्राप्तुं शक्नोति, तर्हि सः संसाररूपबन्धनात् मुक्तिं प्राप्य योगरूपस्थिरकर्मणि प्रवृत्तो भविष्यति।

## सहायकग्रन्थसूची

१. हठयोगप्रदीपिका - आत्मारामयोगीन्द्रः, सम्पादकः - स्वामी श्रीद्वारिकादासशास्त्री, चौखम्बा विद्याभवन, वाराणसी, २०१३

२. The Hathayogapradipika of Svatmarama – With the commentary Jyotsna of Brahmananda and English Translation, The Adyar Libray and Research Centre, The Theosophical Society, Adyar, Chennai

३. हठरत्नावली- श्रीनिवासभट्टः, Editor – M. Venkata Reddy, Vemana Yoga Research Institute, Market Street, Secunderabad-3, A.P.

४. घेरण्डसंहिता - घेरण्डमुनिः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११

❑❑❑

[१] The Hathayogapradipika of Svatmarama, p. 13

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# मानसिकक्लेशापनयने भगवद्गीतायाः भूमिका

**चक्रधरमेहेरः**[*]

सांसारिकजीवनेऽस्मिन् जन्ममात्रमेव जीवानां दुःखानि उत्पद्यन्ते इत्यत्र न संशयः। वस्तुतः कस्यचिदपि प्राणिनः भौतिकसुखदुःखानुभूतिनिमित्तं सांसारिक–क्रियाकलापाः एव आवश्यकाः भवन्ति। अतः जन्मारभ्यः मानवस्य जीवनमार्गे द्व्यपि सुखदुःखे परस्परं पार्श्ववर्तिने भवतः इति वक्तुं शक्यते। परम् उभे अपि क्षणमात्रं वास्तविके न त्वामरणं स्थायिनी। किञ्च इदानीन्तनकाले मानवाः स्वस्वकार्येषु निरताः सन्तः अहर्निशम् ऐहिकसुखप्राप्तये प्रयतमानाः वर्तन्ते। तत्रादौ भौतिकसुखमयं सर्वमपि तत्त्वत्वेन मन्यमानाः तदन्वेषणे सम्पूर्णकालं यापयन्ति। यद्यपि दर्शनेषु आधिभौतिक–आधिदैविक–आध्यात्मिकादीनि त्रीणि दुःखानि सञ्चर्चितानि, अथापि एतेभ्यः त्रिभ्यः दुःखेभ्यः आत्मानमुद्धर्तुं मनुष्याणां प्रयत्नं सफलीकुर्वन्ति भारतीयदर्शनानि। किन्तु भौतिकवादिसमाजेऽस्मिन् अहर्निशं सुखमनुधावन्तः बहुधा दुःखेन प्रपीडिताः सन्तः विनाशमार्गं चिन्वन्ति केचन। अन्ते मृगमरीचिका इव तच्छुखमप्राप्नुवन्तः विविधमानसिकक्लेशान् अनुभवन्तः दृश्यन्ते बहवः। यदि विचार्यते चेत् मानवस्य कस्यचिद् वस्तुनः ग्रहणशैली एव

[*] सहायकाचार्यः, शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, रणवीरपरिसरः, जम्मू।

सुखदु:खयो: कारणं भवति। बुद्धिमान् व्यक्ति: सदैव ज्ञानमार्गमाश्रित्य सिद्ध्यसिद्धौ, लाभालाभौ च समो कृत्वा सत्कर्मणि आत्मानं नियोजयति। पुनश्च कर्मजनितफलानां त्यागपूर्वकं स: विवेकी पुरुष: जन्मरूपबन्धनान्मुक्त: सन् मोक्षमेवावाप्नोति। उक्तं हि –

**कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिण:।**
**जन्मबन्धविनिर्मुक्ता: पदं गच्छन्त्यनामयम्।।**[१]

स च बुद्धिमान् पुरुष: ईर्ष्यारागद्वेषादिरहितस्सन् कृतनियन्त्रणै: इन्द्रियै: सांसारिकविषयान् उपभुञ्जन् अपि स्वान्त:करणनिर्मलतां प्राप्नोति। तया आत्मनिर्मलतया एव मनसि विद्यमानानां क्लेशानां नाश: भवति, यत: प्रसन्नचित्तस्य जनस्य बुद्धि: शीघ्रं हि स्थिरा भवति। परन्तु अयुक्तस्य (बुद्धिरहितस्य) पुरुषस्य आत्मविषयकं ज्ञानं न जागर्ति। न च तस्मिन् आत्मविषयिकी भावना जागरुका भवति। अत: तादृशस्य भावनारहितपुरुषस्य जीवने शान्तिर्न लभ्यते, तथा अशान्तस्य कुतो वा सुखं स्यात्? यथा हि –

**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**
**न चाभावयत: शान्तिरशान्तस्य कुत: सुखम्।।**[२]

अत: य: मनुष्य: सर्वविधविषयान् परित्यज्य नि:स्पृहो भूत्वा अनात्माशरीरे निरहङ्कारेण विचरति स एव शान्तिमवाप्नोति। उक्तं हि –

---

[१] श्रीमद्भगवद्गीता- २/५१

[२] तत्रैव -२/६६

**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।।**[१]
**कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।**
**अभितो ब्रह्मनिर्वाणं वर्तते विजितात्मनाम्।।**[२]

अर्थात् कामक्रोधरहितानां यत्नशीलानां विजितात्मनां पुरुषाणां कृते सर्वविधप्रकारेण ब्रह्मनिर्वाणं भवति।

सम्प्रति भगवद्गीता एव एतादृशाणां क्लेशानामपनयने अवश्यमुपकुर्यादिति मेऽस्ति विश्वासः। आधुनिककाले निरन्तरं कार्यं कुर्वतां जनानां मानसपटले भगवद्गीता अवश्यं शान्तिं प्रयच्छति, आह्लादञ्च जनयतीति अनुभवैकवेद्योऽयं विषयः। तत्र निम्नलिखितानि कानिचन क्लेशानां कारणानि उल्लिख्यन्ते येषां समाधानं श्रीमद्भागवद्गीतायां पञ्चसहस्रवर्षेभ्यः प्रागेव भगवता योगेश्वरश्रीकृष्णद्वारा कृतमस्ति, यच्च साम्प्रतिके अपि युगे मानवसमाजाय वरमिव कार्यं कुरुते।

**विषयासक्तिः-**

भौतिकजगत्यस्मिन् प्राणिनां चक्षुश्रोत्रघ्राणजिह्वात्वगादीन्द्रियाकर्षणयुक्तानाम् अथवा क्षणमात्रशारीरिकभोगविलासयुक्तानां वस्तूनां प्रति आसक्तिः एव मानवक्लेशानां मुख्यकारणेष्वेकं भवति। भूयोभूयः सांसारिकविषयाणां चिन्तनेन तेषु तेषु विषयेषु कामक्रोधादिनाम् उत्पत्तिः जायते येन काचन व्यक्तिः विवेकशून्यः सन् कार्याकार्य-जयपराजय-लाभहान्यादिविषये अविचार्य स्वबुद्धेः क्षमतां नाशयन् आत्मनः विनाशे कारणीभूतः भवति। उक्तं हि भगवता श्रीकृष्णेन श्रीभगवद्गीतायां

---

[१] श्रीमद्भगवद्गीता-२/७१

[२] तत्रैव -२/५१

यत् –

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।**
**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।**[१]

अतः यः मनुष्यः एतान् सांसारिकविषयान् परित्यज्य तेषु निःस्पृहो भूत्वा निर्ममो निरहङ्कारश्च विचरति सः अचिरं शान्तिमवाप्नोति। यथा हि –

**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।।**[२]

**भयः –**

भयः प्राणिजगत्सु विद्यमाना काचित् नकारात्मिका भावना या सम्भावितघटनाम् आकलय्य सहजप्रतिक्रियारूपेण बहिः दृश्यते। अयं च भयः मानवस्य नैकेभ्यः अवचेतनव्यवहारेभ्यः मार्गाणां निर्माणं करोति। अनेन व्यक्तिः मानसिकरूपेण पीडितो भूत्वा स्वाभाविकप्रवृत्तेः पूर्णतया अभिव्यक्त्यै क्लेशमनुभवति। तथैव कुरुक्षेत्रे महाबाहुः अर्जुनः यदा युद्धाय उपस्थितान् स्वगुरुबान्धवजनान् दृष्ट्वा सम्भावितवंशविनाशस्य घटनाम् आकलय्य भयपूर्वकम् अस्त्रत्यागाय कथयति तदा भगवान् श्रीकृष्णः तद्भयं निवारयन् उपदिशति –

राग–भय–क्रोधादिरहितः मद्भक्त्याश्रितो भूत्वा ज्ञानतपसा पवित्रः सन्

---

[१] श्रीमद्भगवद्गीता-२/६२, ६३

[२] तत्रैव -२/७१

प्रवृत्तिनिवृत्तम्, कार्यमकार्यम्, भयाभयम्, बन्धं मोक्षं च जानाति तस्यैव बुद्धिः सात्त्विकी भवति, यया मनुष्यः निर्भयं जीवनं यापयति। यथा च –

**वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।**
**बहवो ज्ञानतपसा पूता मद्भावमागता।।**[१]
**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।**
**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।।**[२]

**सम्भ्रमः –**

सम्भ्रमः नाम मानवस्य मनसि स्थितः तादृशः कश्चन विचारः यः विभिन्नैः स्रोतैः प्रमाणीकृतोऽपि व्यक्तिः तं पूर्णरूपेण परित्यक्तुं प्रस्तुतः न भवति। मनोविज्ञानानुसारम् अयमेकः अपूर्णः सिद्धान्तः, यः अन्यधारणाभ्यः उत्पन्नात् विश्वासात् भिन्नः भवति। विशेषतः व्यक्तिः तन्त्रिकासम्बन्धिसमस्यायाम् अथवा मानसिकपीडासम्बन्धिसमस्यायां सम्भ्रमस्थितौ पतति। महान् मनोवैज्ञानिकः दार्शनिकश्च कार्ल जैस्पर्समहोदयः १९१७ तमे लिखिते 'General Psychopathology' नामके स्वकीये पुस्तके सम्भ्रमस्य त्रयः प्रमुखाः मापदण्डाः इति कथयति। ते च –

१) निश्चितता (दृढधारणाधारिता)

२) असमाधानम् (प्रस्तुते प्रमाणेऽपि अग्रहणम्)

३) असत्यता (स्पष्टात् पूर्णतः विपरीता)

---

[१] श्रीमद्भगवद्गीता-४/१०

[२] तत्रैव -१८/३०

पुनश्च 'Diagnostic and Statistical Manual of Mental Disorders' नामके प्रतिवेदने सम्भ्रमस्य परिभाषा निम्नवत् प्रदत्ता। तद्यथा –

'सम्भ्रमः एका भ्रान्त्यात्मिकाऽवधारणा या वास्तविकाद्भिन्नमनुमानेन आधारितं भवति तथा अखण्डनीये प्रमाणेऽपि दृढनिश्चया भवति।' तथैव कुरुक्षेत्रस्य रणभूमौ आत्मीयजनान् अवलोक्य तैस्सह योद्धव्यं न वेति यदा अर्जुनस्य सम्भ्रमः भवति तदा तमुद्दिश्य भगवता श्रीकृष्णेन उच्यते –

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**
**भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया।।**[१]

अर्थात् ईश्वरः सवचेतनाचेतनानां हृदये स्थित्वा यन्त्रारूढानि सर्वभूतानि स्वकीयया सत्त्वादिगुणमय्या मायया गुणानुगुणं प्रवर्तयन् तिष्ठति। अतः विशुद्धया वास्तविकात्मतत्त्वविषयया बुद्ध्या युक्तः, धृत्या आत्मानं नियम्य, शब्दादीन् विषयान् त्यक्त्वा, रागद्वेषादीन् दुर्गुणान् नाशयित्वा, एकान्तसेवी, अल्पाहारी, एकाभिमुखिकृतकायवाङ्मनोवृत्तिः, ध्यानयोगपरो नित्यम्, वैराग्यसमुपाश्रितः, अहङ्कार–बल–दर्प–काम–क्रोध–परिग्रहादिविमुच्य, निर्ममो भूत्वा, आत्मानुभवैक–सुखः सन् शान्त्या ब्रह्मभावम् आत्मन्यनुभवति। उक्तं हि –

**बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।**
**शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च।।**
**विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।**
**ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।।**

---

[१] श्रीमद्भगवद्गीता-१८/६१

**अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।**
**विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।।**[१]

**ईर्ष्या –**

ईर्ष्या मानवीयविचाराणाम् एका शृङ्खला या क्रोध–घृणा–अपर्याप्तादीनां संयोजनमस्ति। इयं भावनात्मकरूपेण शारीरिकरूपेण च मानवं प्रभावयति। गीतायां भगवता श्रीकृष्णेनोक्तं यत् –

**तानहं द्विषतः क्रुरान्संसारेषु नराधमान्।**
**क्षिपाम्यजस्त्रमशुभानासुरीष्वेव योनिषु।।**[२]

अर्थात् ये मनुष्याः मत्प्रतिं (जीवप्रतिं) द्विषन्ति तान् क्रुरान् नराधमान् अशुभान् अहं जन्ममरणादिषु परिवर्तनमानेषु सन्तानेषु आसुरीषु एव योनिषु निक्षिपामि। अतः हे अर्जुन! यः श्रद्धवान् असूयारहितः च भूत्वा इदं धर्मसंवादं विज्ञाय तदनुगुणं स्वजीवनमार्गं निर्माति सः भक्तिविरोधपापेभ्यः मुक्तस्सन् पुण्यकर्मणां लोकान् प्राप्नोति। उक्तं हि –

**श्रद्धावाननसूयश्च शृणुयादपि यो नरः।**
**सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्।।**[३]

अपि च यः सर्वप्राणिषु अद्वेषभावं स्थापयन्, द्विषत्सु अपकुर्वत्सु च मैत्रीं मतिं कुर्वन्, तेषु दुःखितेषु करुणां प्रदर्शयन्, निरहङ्कारः, समदुःखसुखः, क्षमी, सन्तुष्टः, सततं योगी, नियमितमनोवृत्तिः, दृढनिश्चयः, मय्यर्पितमनोबुद्धिः

---

[१] श्रीमद्भगवद्गीता-१८/५१-५३

[२] तत्रैव -१६/१९

[३] तत्रैव -१८/७१

(भगवदर्पितमनोबुद्धिः) भवति स मे सदा प्रियः भवति। उक्तमपि –

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।**
**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।।**[१]

**लोभः –**

लोभः नाम मानवहृदये विद्यमाना तादृशी तृष्णा या जीवने सुखस्य शान्तेश्च मार्गं पूर्णतया नाशयति। अयं मोहस्य एव भिन्नं रूपं यः भौतिकवस्तूनां धनानां च प्राप्त्यै भूयोभूयः मानवान् प्रेरयति। अनेन मानवस्य स्वाभाविकव्यवहारेऽपि परिवर्तनं दृश्यते येन तस्य जीवनं कष्टमयं भवति। महाभारते चोक्तम् –

**लोभः प्रज्ञानमाहन्ति प्रज्ञा हन्ति हता ह्रियम्।**[२]

अर्थात् लोभेन मानवस्य बुद्धिः नष्टा भवति नष्टबुद्ध्या च लज्जा नष्टा भवति।

अयं च कथमुत्पद्यते चेत् सत्त्वरजतमगुणत्रयेषु रजोगुणाधिक्येन मानवहृदये सांसारिकवस्तुनि स्वर्गादिफलप्राप्तिसु च जायते। उक्तं हि –

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।।**[३]

---

[१] श्रीमद्भगवद्गीता-१२/१३-१४

[२] महाभारतम्/उद्योग - ७२/१८

[३] श्रीमद्भगवद्गीता-१४/१७

एषः लोभ एव कामक्रोधाभ्यां मिलित्वा आत्मनः विनाशे प्रमुखं कारणं भवति। अतः मुमुक्षु सर्वथा एषां त्रयाणामपि त्यागं कुर्यात्। यथा हि –

**त्रिविधं नरकस्यैतद् द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।**[१]

**क्रोधः –**

क्रोधः नाम प्राणिनः तादृशः व्यवहारः येन स आत्मानमनियन्त्रितं कुर्वन् आत्मगताः भवनाः विविधशारीरिकक्रियाभिः बहिः प्रकटयति। अनेन तस्य शारीरिकगतिः तीव्रा भूत्वा तदन्तर्गतं रक्तचापादिकं प्रबलं भवति। वस्तुतः यदा मनुष्यः स्वाभिलषितस्य वस्तूनः प्राप्तौ असमर्थः भवति अथवा सहजरूपेण तन्नाधिकरोति तदा तद्विषये भूयोभूयः चिन्तयन् क्रोधयुक्तो भवति। तेन च स स्वस्य विनाशाभिमुखं गतिं करोति। उक्तं हि गीतायाम्–

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामत्क्रोधोऽभिजायते।।**
**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।**[२]

अतः क्रोधस्य निवारणोपायं कथयता भगवता श्रीकृष्णेनोच्यते – कामक्रोधाभ्यां रहिताणां यत्नशीलानां विजितात्मनां पुरुषाणां ब्रह्मनिर्वाणं सर्वतः वर्तते। यतः संसारेऽस्मिन् काम–क्रोध–लोभरूपं त्रिविधम् आत्मनः विनाशकरं नरकस्य द्वारं भवति। तद्यथा –

---

[१] श्रीमद्भगवद्गीता -१६/२१
[२] तत्रैव -२/६२-६३

**कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।**
**अभितो ब्रह्मनिर्वाणं वर्तते विजितात्मनाम्।।**
**त्रिविधं नरकस्यैतद् द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।**[१]

**आलस्यम् –**

कार्याणां सम्पादने सामर्थ्ये स्थितेऽपि अथवा तेषां कार्याणामभावे दुष्परिणामं सम्यक् विजानन् अपि तेषु अरुचेः प्रदर्शनम् आलस्यं कथ्यते। यथा प्रातर्व्यायामः स्वस्थशरीराय लाभदायी भवति, तथापि कश्चन तद्विस्मृत्य क्षणं सुखाय निद्रामुपैति। इदं मानवस्य तादृशः कश्चन विकारः यः आत्मनः, समाजस्य, राष्ट्रस्य च सर्वनाशे प्रमुखभूमिकां निर्वहति। अतः आलस्यं मनुष्याणां शरीरे विद्यमानः शत्रुवत् कार्यं करोति। उक्तमपि –

**'आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।'**

**'आलस्यं हरति प्रज्ञा धनमायुर्यशोबलम्।**
**यस्मिन्नास्ते तदालस्यं सर्वदोषाकरस्तु सः।।'**

अर्थात् आलस्यं मानवस्य बुद्धिम् अथवा विचारशक्तिं न्यूनीकरोति, धनं च नाशयति, आयुः क्षीणं करोति तथा बलं हरति। यस्य त्वालस्यं नास्ति सः एतेभ्यः दोषेभ्यः मुक्तः भवति इत्यर्थः। अतः एतदालस्यं विहाय कर्मणि आत्मानं नियोक्तुं गीतायां भगवान् श्रीकृष्णः निर्दिश्य कथयति यत् अकर्मणः अपेक्षया कर्म सर्वथा श्रेष्ठं भवति। अतः त्वं कर्म एव कुरु। यतः कर्मणः विना तु तव शरीरयात्रापि पूर्णा न भवति।

[१] श्रीमद्भगवद्गीता-५/२६, १६/२१

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।**[१]

तथा च – **युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।**[२]

अर्थात् मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य जनस्य जीवने बन्धनाशनो योगः सम्पन्नः भवति।

**अवसादः** –

अवसादः नाम मनसः तादृशी काचित् निश्चयात्मिका स्थितिः अथवा चिन्ता यया व्यक्तिः दीर्घसमयपर्यन्तं भावनात्मककरूपेण ग्रसितो भूत्वा अत्यन्तं पीडामनुभवति। अनया न केवलं व्यक्तेः दैनन्दिनजीवनं प्रभावितं भवति अपितु तस्याः निष्पादनं, बुद्धिमत्ता, सर्जनात्मकता इत्यादयः नकारात्मकरूपेण बहिः प्रकाशिताः भवन्ति। इयं चिन्ता व्यक्तेः प्रत्येकमपि कार्येषु प्रभावं जनयति। अत एवोक्तम् –

**चिता चिन्ता समा ह्युक्ता बिन्दुमात्र विशेषतः।**
**सजीवं दहते चिन्ता निर्जीवं दहते चिता।।**

अतः श्रीमद्भगवद्गीतायां भगवता कृष्णेनोच्यते आत्मव्यतिरिक्त–विषयानुभवेषु असक्तमनः अन्तरात्मनि एव यः सुखमनुभवति स एव प्रकृत्यभ्यासं विहाय ब्रह्मयोगयुक्तात्मा अक्षयं सुखं प्राप्नोति। तद्यथा –

---

[१] श्रीमद्भगवद्गीता- ३/८

[२] तत्रैव -६/१७

**बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।**
**स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते।।**[१]

अतः हे अर्जुन! स्वमनसि विद्यमानम् अकीर्तिकरम् अतिक्षुद्रं हृदयदौर्बल्यकृतमवसादं परित्यज्य युद्धाय प्रवृत्तः। तथाहि –

**क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।**[२]

**कामः –**

पुरुषाणां कस्यापि वस्तूनः प्राप्तिं प्रति अत्यन्तमिच्छा एव कामः। मनसाऽविभूतः कामुकः पुरुषः प्रायेण कार्यमकार्यम् अविचार्य एव कार्येषु प्रवर्तते। तस्य अभिप्सितस्य कार्यस्यासिद्धौ क्रोधादिबलेन चाशान्तिं प्राप्नुवन् नानाविधैः मानसिकक्लेशैः पीडितो भवति। अतः तादृशीं स्थितिं नियन्त्रयितुं कः उपाय इति गीतायां निर्दिश्यते –

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।**[३]

अर्थात् ज्ञानयोगे प्रवृत्तस्य पुरुषस्य अयं कामरूपः शत्रुः विषयाभिमुख्यकरणेन आत्मनि वैमुख्यं करोति। तस्मात् हे अर्जुन! त्वमादौ मोक्षोपायारम्भसमये एव इन्द्रियव्यापाररूपे कर्मयोगे इन्द्रियाणि नियम्य आत्मस्वरूपविषयस्य ज्ञानस्य च नाशकं कामरूपं वैरिणं नाशय।

---

[१] श्रीमद्भगवद्गीता-५/२१
[२] तत्रैव -२/३
[३] तत्रैव -३/४१

**अनभिप्रेरणा –**

अनभिप्रेरणा नाम व्यक्तेः मनोभावगतप्रमादः इति। कस्मिंश्चिदपि कार्ये आत्मनः प्रवर्तननिमित्तम् अनभिप्रेरणा बाधकतत्त्वेष्वेकं प्रमुखं भवति। अनया मनुष्यः कार्येषु संलग्नोऽपि अकार्यमिवाचरति। अतः कर्ममयजीवने सांसारिककार्याणि सम्पादयितुं मानवः तादृशस्य वातावरणस्य निर्माणं कुर्यात् येन सुखमयजीवननिर्वाहेण शरीरयात्रापि सुकरं भवेत्। अतः मनुष्यः सहजत्वेन सुकरम् अप्रमादं च कर्म सदोषं सदुःखमपि न त्यजेत्। यतः धूमेन अग्निरव सर्वमपि कर्म दोषावृतं भवति। ज्ञानयोगयोग्यः अपि जनः आत्मानं प्रेरयन् कर्मयोगे एव तिष्ठेत् इत्यर्थः। उक्तं हि गीतायां –

**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।**
**सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।।**[१]

**पापचिन्तनम् –**

अन्तःकरणस्यावज्ञापूर्वकं मानवीयविरुद्धं चिन्तनं भवति पापचिन्तनम्। पापशब्दं परिभाषितुं जनाः धार्मिकविषयाणामेव शरणं गच्छन्ति। अर्थात् विभिन्नधर्मगतमार्गाणां विरुद्धं यदि कश्चन व्यवहरति उत चिन्तयति तर्हि सः पापी भवति। वस्तुतः यदि वयं साधारणभाषया एतं परिभाषयेम तर्हि स्वकर्तव्यविरुद्धाचरणमेव पापं भवति। अनेन यद्यपि व्यक्तिः क्षणिकसुखमनुभवति तथापि पश्चात् नैकप्रकारैः मानसिकक्लेशैः पीडितो भवति। केवलं शीर्णमूलाः द्रूमा इव समाजे तिष्ठन्ति। उक्तं हि –

---

[१] श्रीमद्भगवद्गीता-१८/४८

**न चिरं पापकर्माणः क्रुराः लोके जुगुप्सिता।**
**ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूलाः इव द्रुमाः।।**

अतः एतादृशेभ्यः चिन्तनेभ्यः यः आत्मानं दूरीकृत्य क्रोधलोभमोहाद्यासक्तिं परित्यज्य सर्वाणि कर्माणि ब्रह्मणि समर्पयन् प्रवर्तते स पापेन कमलपत्रे जलमिव लिप्तः न भवति। तद्यथा –

**ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**
**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।।**[१]
**यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।**
**असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते।।**[२]

**एकान्तता –**

एकान्तता नाम सम्बन्धीनां जनानां परिचितानां वस्तूनां वा अभावादुत्पन्नदुःखस्यानुभूतिः। अत्र कश्चन अन्यैः जनैः एकाकीकृतो भवति येन स्वात्मगतानुभावानां विचाराणां च मुक्ततयाऽभिव्यक्तौ असमर्थो भवति। अनेन स जनः नानाविधैः मानसिकक्लेशैः प्रताडितो भवति। अतः यदि कश्चन गीतायाः निर्देशानुसारम् आत्मानं नियोज्य व्यवहारेषु प्रवर्तेत तर्हि सः न कदाचित् तद्गतक्लेशैः पीडितो भवति। तत्र भगवान् श्रीकृष्णः अर्जुनमुद्दिश्य सम्पूर्णं जगत् कथयति, यः सर्वेषु वस्तुषु मामेवानुपश्यति, मयि च सर्वं जगत् पश्यति सः न कथञ्चिदेकाकी भवति। यतः तन्निमित्तं नाऽहमदृश्यो भवामि न च स मत्तः दूरे भवति। अपि च तादृशः योगयुक्तात्मा समदृष्टिसम्पन्नश्च जनः सर्वेषु भूतेषु

---

[१] श्रीमद्भगवद्गीता-५/१०
[२] तत्रैव -१०/३

आत्मानमवलोक्य सर्वाणि च भूतानि आत्मन्येवानुपश्यति। तद्यथा –

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।**
**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।**
**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।।**[१]

**अनियन्त्रणम् –**

जगत्यस्मिन् सांसारिकवस्तूनां प्रति आकर्षणे इन्द्रियाणां संयम एव नियन्त्रणं भवति। तदतिरिच्य आत्मगतानुकूलाधिक्येन लोभेन आकृष्टेन वा इन्द्रियाणां मनसा असंयमः भवति अनियन्त्रणम्। यतः चञ्चलयुक्तं मन एव सांसारिकसुखदुःखानां कारणं भवति। एकतमपि भगवता पराशरेण उक्तं यत् –

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः।।**[२]

अनेन जनाः तद्गताः समस्याः सम्यगनुभूय विभिन्नैः मानसिकक्लेशैः प्रपीडिताः भवन्ति। अतः समेषामप्येन्द्रियाणां प्रमुखं चञ्चलपरायणं मनः बाह्यगतेभ्यः विषयेभ्यः येन नियन्त्रितं भवति अवश्यं हि स जन आत्मन्येव मनसा बन्धुवदाचरति। तेन च निश्चलमनयुक्तः रजोगुणरहितः प्रशान्तमनः पुरुषः ब्रह्मभूतमनन्यं सुखमुपैति। उक्तं च –

---

[१] श्रीमद्भगवद्गीता-६/३०, ६/२९

[२] विष्णुपुराण-६/७/२८

**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**
**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।।**
**बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।**
**अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्।।**
**जितात्मनः प्रशान्तस्य परमात्मा समाहितः।**
**शीतोष्णसुखदुःखेषु तथा मानापमानयोः।।**[1]

**नैराश्यम् –**

वास्तविकपरिस्थतौ आवश्यकानां वस्तूनां सन्तोषजनकम् अप्राप्तिरेव नैराश्यम्। अस्यां स्थितौ मानवः कस्मिंश्चिदपि समये यत्किञ्चिदपि आचरितुं कुण्ठितो न भवति। मानवस्य एतादृशी स्थितिः सम्पूर्णतया मानसिकरूपेण तं प्रभावयति। अतः गीतायामिदमुच्यते –

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।**[2]

अर्थात् मद्विना शरीरधारणाक्षमाः ये भक्ताः मामेव चिन्तयन्तः सर्वकल्याणगुणान्वितं सर्वविभुतियुक्तं मां परित उपासते तेषां नित्याभियोगं काङ्क्षमाणानाम् अहं मत्प्राप्तिलक्षणं युक्तं योगम् अपुनरावृत्तिरूपं क्षेमं वहामि। नाम कथञ्चिदपि तेषां भक्तानां नैराश्यं न सम्भवेदित्यर्थः।

---

[1] श्रीमद्भगवद्गीता-६/२७, ६/६, ६/७
[2] तत्रैव - ९/२२

**प्रियजनवियोगः -**

चराचरजगत्यस्मिन् न किञ्चिदपि तादृशं भौतिकं वस्त्वस्ति यस्य विनाशो न सम्भवति। प्रत्येकमपि वस्तु सजीवः निर्जीवो वा एकदा विनष्टं भवत्येव। परं मनुष्यः तत्तद्वस्तुषु सम्बन्धिषु च मोहकारणात् तादृशः मग्नो भवति येन तेषां वियोगेन मनसा अत्यन्तं पीडामनुभवति। अतः भगवद्गीतायां संसारनियमस्य वास्तविकताम् अर्जुनमनुभावयन् भगवान् श्रीकृष्णः कथयति – हे अर्जुन! संसारेऽस्मिन् न कश्चिदात्मा जनिं लभते न च तस्य विनाशः भवति। यतः नित्योऽयमात्मा शरीरस्य विनाशेऽपि अविनाशी भूत्वा अन्यस्मिन् शरीरे प्रविश्य पुनर्जन्म प्राप्नोति।

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।**
**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।**[१]

इत्थं भगवतः श्रीकृष्णस्य मुखान्निःसृतं परमपावनं गीताग्रन्थस्याध्ययनं मानवजीवनं ज्ञानानन्देन प्लावयति, दुःखमयसंसारसागरात् तारयति, सत्पथं च प्रदर्शयति।

## सहायकग्रन्थसूची

१) श्रीमद्भगवद्गीता तत्त्वविवेचनी, श्रीजयदयालजी गोयन्दका, गीताप्रेस, गोरखपुर, २००९
२) गीता साधक सञ्जीवनी, स्वामी रामसुखदास जी महाराज, गीताप्रेस, गोरखपुर, २०१३

[१] श्रीमद्भगवद्गीता-२/२०, २/२२

३) गीता दर्पण, स्वामी रामसुखदास जी महाराज, गीताप्रेस, गोरखपुर, २०१३

४) गीता–शाङ्करभाष्य, आदिगुरु शङ्कराचार्य, गीताप्रेस, गोरखपुर, २००९

५) श्रीमद्भगवतत्त्वसमीक्षा, डॉ. श्री कृष्णमणित्रिपाठि, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००७

६) भगवत् गीतादर्शन का कर्मसिद्धान्त, एम्.वि वर्मा, न्यू भारतीय बुक् करपोरेसन्, दिल्ली, २०१५

७) महाभारतम्, महर्षि व्यास, गीता प्रेस, गोरखपुर, २०११

❑❑❑

# शाङ्करभाष्यानुसारेण तैत्तिरीये ब्रह्मलक्षणविचारः

**गणेशभट्टः***

यजुर्वेदीयवाङ्मये कृष्णयजुर्वेदः तत्र च तैत्तिरीयोपनिषत् नितरां वेदान्तिभ्यः तच्छास्त्रप्रमेयप्रतिपादकत्वेन उपकरोति। तिसृषु वल्लीषु विभक्ता एषा उपनिषत् तत्र द्वितीयेयं ब्रह्मानन्दवल्ली। तस्मिन् प्रथमानुवाके एव निबन्धस्यास्य विषयः आरभ्यते। इतः पूर्वं शीक्षावल्ल्यां संहितोपनिषदादिविद्यानां प्राप्तौ ये विघ्नाः तेषामुपशमाय "शं नो मित्र"[1] इत्यादिशान्तिमन्त्रः पठितः। इदानीमस्यां वल्ल्यां ब्रह्मविद्यायाः प्राप्तौ ये उपसर्गाः सन्ति तेषां विनाशाय पुनः शान्तिमन्त्रः पठ्यते – **ॐ सह नाववतु इत्यादि ॥**

शीक्षावल्ल्यां या उपासनाः उक्ताः ताः सर्वा अपि कर्मभिरविरुद्धाः। कर्मसमुच्चिताभिः ताभिः उपासनाभिः संसारोपमर्दो नैव सम्भवतीति संसारकारणाज्ञाननिवृत्तये निरुपाधिकात्मदर्शनं निरूपितमस्यां वल्ल्याम्। ननु यथा "आप्नोति स्वाराज्यफलम्[2]" इति अपरविद्यायाः संसारगोचरं फलं पूर्ववल्ल्यामुक्तं तथा "सोऽश्नुते सर्वान्कामान्[3]" इति परविद्याफलस्यापि संसारगोचरत्वं दर्शयिष्यते इति चेन्न, अनया ब्रह्मविद्यया अविद्या-निवृत्तिर्भवति। तेन संसारस्यात्यन्तिकाभावः स्वत एव सिद्ध्यति। अतः परविद्याफलं संसारगोचरमिति वक्तुं न शक्यते। किञ्च, श्रुतावुक्तम् – "विद्वान्न बिभेति कुतश्चन[4]" इति। यदि संसारकारणमस्ति तर्हि अभयप्रतिष्ठयोः प्राप्तिः पुण्यपापयोः अलेपश्च न सम्भवतः। तस्मात् अनया ब्रह्मविद्यया आत्यन्तिकः संसाराभावः भवति इति स्वीकर्तव्यम्।

---

* सहायकप्राध्यापकः, श्री सत्य साई मानव-अभ्युदय-विश्वविद्यालयः, नवनिहाल्, ओक्लि पोस्ट्, कमलापुरम्, कलबुरगि, कर्नाटकम्।

[1] तै. उ. शीक्षावल्ली १/१

[2] तत्रैव, ६/२

[3] तै. उ. ब्रह्मानन्दवल्ली १/१

[4] तत्रैव, ९/१

"श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[1]" इत्यादिश्रुतेः ब्रह्मविद्यायाः फलं श्रवणादि-पूर्वकतया भवति। किन्तु सम्बन्धप्रयोजनयोः ज्ञानाभावे विद्यायाः श्रवणे, ग्रहणे, धारणे अभ्यासे च प्रवृत्तिर्न भवति जनानाम्। उक्तं च –

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥[2]"

तस्मात् प्रथमं सम्बन्धप्रयोजने ज्ञापयितुं ब्रह्मविदाप्नोति परम् इत्यादिमन्त्रः उक्तः। तथाहि मन्त्रः - "ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म"। बृहि वृद्धौ इति धातोः निष्पन्नः ब्रह्मशब्दः वृद्धिमद्वस्तु बोधयति। सा वृद्धिः सङ्कोचकाभावात् निरतिशयमहत्त्वे पर्यवस्यति। यः तद्ब्रह्म वेत्ति स तत् निरतिशयं ब्रह्म प्राप्नोति। यतो हि यस्य विज्ञानं तस्यैव प्राप्तिर्भवति। "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति[3]" इति श्रुतिरपि अत्र प्रमाणम्।

ननु लोके एकस्य परिच्छिन्नस्य अन्येन परिच्छिन्नेन प्राप्तिर्भवति। ब्रह्म तु अपरिच्छिन्नं सर्वगतं च वर्तते। अतस्तस्य प्राप्तिर्नैव सम्भवति इति चेन्न, ब्रह्मणः प्राप्तिः अप्राप्तिश्च क्रमेण ब्रह्मणः दर्शनमदर्शनं च अपेक्ष्य उक्ते। तथाहि – यद्यपि जीवः परमार्थतो ब्रह्मस्वरूप एवास्ति तथापि स पञ्चीकृतापञ्चीकृतभूतांशैः कृता ये आत्मस्वरूपापेक्षया बाह्याः परिच्छिन्नाः अन्नमयादयः कोशाः तेष्वात्मदर्शी तदासक्तचित्ततया कोशाभिमानप्रयुक्तदुःखादिकमनुभवति। तस्माद्यथा प्रकृताया दशसंख्यायाः पूरणे समर्थस्य सन्निकृष्टस्यापि आत्मनः स्वात्मानं विहाय बाह्येषु नवसंख्येयेषु परिगणनव्यासक्तचित्ततया स्वात्मभूतोऽपि "दशमो नास्ति" इति अभावदर्शनं "नवैव वयं वर्तामहे" इति विपर्ययश्च तथा "परमार्थं ब्रह्मस्वरूपं नास्ति" इति अभावदर्शनं "कोशव्यतिरिक्तं परमार्थस्वरूपं न जानामि" इति विपर्ययश्च भवतः। तस्मात् अविद्यया आत्मभूतमपि ब्रह्म अनाप्तं भवति। ततः यथा केनचित् "दशमस्त्वमसि[4]" इति स्मारिते सति

[1] बृ. उ.२/४/५

[2] काव्यप्रकाशः

[3] मु. उ. ३/२/९

[4] लौकिकन्यायकोशः

यद्दशमस्वरूपमविद्यया अनाप्तमासीत् तस्यैव विद्यया प्राप्तिर्भवति तथा श्रुत्युपदिष्टस्य सर्वात्मकस्य ब्रह्मणः आत्मत्वदर्शनलक्षणया विद्यया अनाप्तत्वभ्रमनिवृत्तिरूपा आप्तिर्भवति।

"ब्रह्मविदाप्नोति परम्[1]" इति सम्पूर्णायाः ब्रह्मानन्दवल्ल्याः सूत्रात्मकं वाक्यम्। सर्वतो व्यावृत्तः यः स्वरूपविशेषः तस्य समर्पणे समर्थस्य लक्षणस्य अभिधानेन स्वरूपनिर्धारणार्थं, पूर्वं 'ब्रह्मविद्' इत्यनेन यस्य ब्रह्मणः अविशेषेण वेदनमुक्तं तस्य "यो वेद निहितं गुहायाम्[2]" इत्यनेन प्रत्यगात्मतया वेदनं वक्तव्यमित्येतदर्थं, ब्रह्मविद्यायाः फलं संसारधर्मातीत-ब्रह्मस्वरूपत्वमिति प्रदर्शनार्थं च "सत्यं ज्ञानमनन्तं ब्रह्म" इतीयमृगुदाह्रियते। इदं च वाक्यं ब्रह्मणः स्वरूपलक्षणार्थकम्। अत्र ब्रह्म प्राधान्येन ज्ञानविषयतया वक्तुमिष्टमिति तदेव विशेष्यम्। सत्यं ज्ञानमनन्तं इति त्रीणि पदानितु विशेष्यस्य ब्रह्मणः विशेषणसमर्पकाणि सन्ति। इयं विशेषणविशेष्यभावप्रतीतिः सत्यादिपदानां समानविभक्त्यन्तत्वेन भवति। यथा लोके नीलं महत् सुगन्धि उत्पलमित्यत्र नीलादीनि विशेषणानि इदमुत्पलम् अन्येभ्य उत्पलेभ्यः निवर्तयन्ति तथा प्रकृते सत्यादीनि विशेषणानि अन्येभ्यो विशेष्येभ्यो ब्रह्म व्यावर्तयन्ति।

ननु नीलत्वं व्यभिचरत् उत्पलं रक्तमपि सम्भवतीति नीलस्य विशेषणत्वं सङ्गच्छते। किन्तु सत्यत्वादिकं व्यभिचरत् ब्रह्मान्तरं न सम्भवति। लोके यदा अनेकानि द्रव्याणि एकजातीयानि अनेकविशेषणयोगीनि भवन्ति तदा विशेषणस्यार्थवत्ता भवति। किन्तु ब्रह्म त्वेकमेव। अतः सजातीयेभ्यो ब्रह्मान्तरेभ्यो तत् विशेष्यते विशेषणैः इति वक्तुं न शक्यते। इत्थं सजातीयस्य व्यवच्छेद्यस्याभावात् सत्यादीनां विशेषणानां निरर्थकत्वमिति चेन्न, सत्यादीनां विशेषणानां स्वरूपलक्षणसमर्पकत्वात्। तथाहि– इमानि विशेषणानि लक्षणरूपार्थप्रधानानि, न तु मुख्यविशेषणपराणि। यदि एतेषां मुख्यविशेषणपरत्वं स्वीक्रियते तर्हि सत्यादिविशेषणैः सजातीयेभ्यो व्यावृत्तौ सत्यामपि विजातीयेभ्यो व्यावृत्तिर्न स्यात्। तेन प्रकृते विवक्षिता सर्वतो व्यावृत्तिः न सिद्ध्येदिति स्वरूपविशेषानिर्धारप्रसङ्गः। अतः एतेषां विशेषणानां लक्षणार्थपरत्वं स्वीकर्तव्यम्।

---

[1] तै. उ. ब्रह्मानन्दवल्ली १/१

[2] तत्रैव, १/१

अत्र सत्यादीनां लक्षणत्वमङ्गीकृत्य विशेषणत्वं प्रतिषिध्यते। तस्मात् लक्षणविशेषणयोः को भेद इति जिज्ञासा मनसि समुदेति। तस्य समाधानं भाष्यकाराः स्वयमेव प्रददति – विशेषणानि सजातीयमात्रव्यावर्तकानि भवन्ति, लक्षणानि तु सजातीयविजातीयोभयव्यावर्तकानि भवन्ति इति विशेषः। यथा नीलमुत्पलमित्यत्र नीलत्वं सजातीयेभ्यः रक्ताद्युत्पलेभ्य उत्पलमिदं व्यावर्तयति। तस्मात् नीलमिति विशेषणम्। किन्तु अवकाशप्रदात्राकाशमित्यत्र अवकाशप्रदातृत्वमिति पदं सजातीयेभ्यो महाभूतेभ्यो विजातीयेभ्य आत्मादिभ्यश्च आकाशं व्यावर्तयति। तस्मात् अवकाशप्रदातृत्वमिति लक्षणम्।

सत्यं ज्ञानमनन्तमिति शब्दत्रयस्य सान्निध्यात् परस्परविशेषणविशेष्यत्वमस्तीति न वाच्यम्। यतो हि इमे शब्दाः परस्परनिरपेक्षतया ब्रह्मशब्देन सह सम्बध्यन्ते। तेन सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्म इत्येतानि वाक्यानि उपलभ्यन्ते।

**सत्यं ब्रह्म** - यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत्सत्यम्। यथा रज्जुः रज्जुत्वेन रूपेण निश्चिता कदाचित् रज्जुत्वरूपं न परित्यजतीति रज्जुः रज्जुत्वेन रूपेण सत्यमित्युच्यते। यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरति तदनृतम्। यथा रज्जुः सर्पत्वेन रूपेण निश्चिता कालान्तरे सर्पत्वरूपं परित्यजतीति रज्जुः सर्पत्वेन रूपेण अनृतमित्युच्यते। प्रकृते ब्रह्म सत्यं भवति मृत्तिकावत्, प्रपञ्चस्तु अनृतोऽस्ति मृद्विकारवत्। “वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्[1]” इति श्रुतिरत्र मानम्। इत्थं सत्यं ब्रह्म इति वाक्येन ब्रह्मणः विकारात् व्यावृत्तिर्भवति विकारस्य सत्यत्वाभावात्।

**ज्ञानं ब्रह्म** – ननु सत्यविशेषणेन विकारव्यावृत्तिसिद्धौ ब्रह्मणः कारणत्वं प्राप्तं भवति। ततः कारणत्वेन तस्य कर्त्रादिकारकरूपत्वं मृदादिवद् अचेतनत्वं च प्राप्तम्। अतस्तन्निवृत्त्यर्थं ज्ञानं ब्रह्म इति वाक्यम्। अस्मिन् वाक्ये ब्रह्मणः ज्ञानस्वरूपत्वाभिधानात् कारकरूपत्वमचेतनत्वं वा न सम्भवति। ननु कर्तृसाधनज्ञानपदेन ब्रह्मणः ज्ञानक्रियां प्रति कर्तृत्वमवगम्यते। अतः ज्ञानपदेन ब्रह्मणः कारकत्वनिवृत्तिर्न भवतीति चेन्न, ज्ञानपदेनात्र भावव्युत्पत्तिकः ज्ञानशब्दो

[1] छा. उ. ६/१/४

ग्राह्यः। तस्यार्थः ज्ञप्तिः अवबोधो वा, न तु ज्ञानकर्तृ। यद्यत्र ब्रह्मणः ज्ञानकर्तृत्वमङ्गीक्रियेत तर्हि तस्य विक्रियमाणत्वमपि स्वीकर्तव्यमापतति। तदा तस्य विकारत्वेन अनृतत्वात् सत्यता ज्ञेयज्ञानाभ्यां प्रविभक्तत्वात् अनन्तता च न स्याताम्। तस्मात् सत्यानन्ताभ्यां विशेषणाभ्यां सह पाठात् ज्ञानपदस्य भावसाधनत्वमेव अङ्गीकार्यम्। विषयेऽस्मिन् "यत्र नान्यद्विजानाति स भूमा""अथ यत्रान्यद्विजानाति तदल्पम्[1]" इत्यादयः श्रुतयः प्रमाणभूताः सन्ति।

ननु प्रथमं न विजानातीति ज्ञानकर्तृत्वसामान्यं प्रतिषिद्धम्। ततः अन्यन्न विजानाति इति अन्यविज्ञातृत्वरूपविशेषः प्रतिषिद्धः। तस्मात् विशेषनिषेधः शेषाभ्यनुज्ञाविषयः इति न्यायेन ब्रह्मणः स्वकर्मकज्ञानकर्तृत्वे इयं श्रुतिर्मानम्, न तु द्वैतराहित्ये इति चेन्न, "यत्र नान्यत्पश्यति"इत्यादिश्रुतिः भूमलक्षणविधिपरा। अन्यः अन्यत्पश्यतीति भ्रान्तिसिद्धमेव ज्ञात्रादिद्वैतमुक्त्वा तद्यत्र वस्तुतो नास्ति स भूमा इति भूमलक्षणमत्रोक्तम्। एवमन्यग्रहणस्य प्रतिषेधशेषत्वात् श्रुतेः स्वज्ञातृत्वपरता स्वीकर्तुं न शक्यते। किञ्च, ब्रह्मणि भेदाभावात् स्वकर्मकज्ञानकर्तृत्वं नोपपद्यते। यतो हि एकक्रियानिरूपितं कर्तृत्वं कर्मत्वं च एककालावच्छेदेन एकत्र भवितुं नार्हति। यदि च प्रत्यगात्मरूपस्य ब्रह्मणः ज्ञानकर्मत्वम् अङ्गीक्रियते तर्हि ज्ञात्रभावप्रसङ्गः स्यात्। ननु चिज्जडरूपांशद्वयोपेतत्वात् चिदंशेन ज्ञातृत्वम् अचिदंशेन च ज्ञेयत्वं स्यादात्मनः। तेन न ज्ञात्रभावप्रसङ्गः इति चेन्न, "निष्कलं निष्क्रियं शान्तम्" इत्यादिश्रुतेः सावयवस्यानित्यत्वाच्च आत्मा निरवयव एव। अतस्तस्य अंशकल्पना न युक्ता। किञ्च, आत्मनः घटादिवत् विज्ञेयत्वं स्वीक्रियते चेत् ज्ञानोपदेशो निरर्थकः स्यात्। तस्मात् भावसाधानस्य ज्ञानशब्दस्यैव ग्रहणं कर्तव्यम्।

**अनन्तं ब्रह्म** – ननु ज्ञानपदस्य लोके लौकिकज्ञानमर्थः। लौकिकज्ञानस्यान्तवत्त्वात् ज्ञानं ब्रह्म इति वचनात् ब्रह्मणोऽपि अन्तवत्त्वं प्राप्तम्। अतस्तन्निवृत्तये अनन्तं ब्रह्म इति वाक्यम्। आनन्त्यं त्रिविधं भवति – देशतः कालतो वस्तुतश्च। तत्र देशतः आनन्त्यमाकाशेऽपि वर्तते अवकाशात्मना सर्वत्रावस्थानात्। किन्तु कालत आनन्त्यं न वर्तते आकाशस्य कार्यत्वेन

[1] छा. उ. ७/२४/१

अनित्यत्वात्। वस्तुतोऽपि आनन्त्यं न वर्तते वाय्वादेः आकाशसमसत्ताकस्य वस्तुनः सत्त्वात्। ब्रह्मणस्तु त्रिविधमपि आनन्त्यं वर्तते। तथाहि – कार्यवस्तुनः कालपरिच्छित्तिर्भवति। ब्रह्म त्वकार्यम्। अतस्तस्य कालत आनन्त्यं वर्तते। वस्त्वन्तरबुद्धिः प्रसक्तात् वस्त्वन्तरात् निवर्तते। तस्मात् भिन्नं वस्तु वस्त्वन्तरस्यान्तो भवति। यथा गोत्वबुद्धिः अश्वत्वात् निवर्तते। तस्मात् गोत्वम् अश्वत्वान्तम् अश्वत्वावधिकं वा वक्तुं शक्यते। किन्तु सर्वोऽपि प्रपञ्च ब्रह्माभिन्नः। अतः परमार्थतो ब्रह्मभिन्नवस्त्वभावात् वस्तुतोऽपि आनन्त्यमस्ति ब्रह्मणः। ननु ब्रह्मणः सर्वानन्यत्वं कथं सम्भवतीति चेदुच्यते, कालाकाशादीनाम् आपाततो नित्यत्वेन प्रतीयमानानामपि पदार्थानां कारणं ब्रह्म। तस्मात् सर्ववस्तुकारणत्वेन ब्रह्मणः सर्वानन्यत्वं सिद्ध्यति। ननु ब्रह्मणः सर्वकारणत्वात् तद्भिन्नस्य कार्यस्य सत्त्वात् वस्तुत अन्तवत्त्वमिति चेन्न,यतो हि कार्यस्य वस्तुनः परमार्थतो मिथ्यात्वेन कापि पृथक्सत्ता नास्ति। “वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्[1]” इति श्रुतिरत्र प्रमाणम्। तस्मात् वस्तुतः आनन्त्यं ब्रह्मणः सम्भवति।परिच्छिन्नात् अपरिच्छिन्नस्य उत्पत्तिर्भवति इति न युक्तम्। आकाशे देशतः आनन्त्यमस्ति इति प्रसिद्धम्। तस्मात्तत्कारणे ब्रह्मणि देशतः आनन्त्यं वर्तते इति स्वत एव सिद्ध्यति। इत्थं देशतः कालतो वस्तुतश्च निरतिशयमानन्त्यं ब्रह्मणः वर्तते। तेन च तस्य सत्यत्वं सिद्धं भवति अन्तवद्वस्तुनः रज्ज्वादिवदसत्यत्वदर्शनात्।

ततः शून्यवादिनः शङ्कन्ते, सत्यादीनां विशेषणानां व्यावृत्तिपरत्वात् उत्पलादि-विशेष्यवद् ब्रह्मणः प्रमाणान्तरासिद्धत्वाच्चमृगतृष्णादीनामिव “सत्यं ज्ञानमनन्तं ब्रह्म” इति वाक्यस्यापि असदर्थत्वं प्राप्तम्। तथाहि प्रसिद्धासत्पदार्थनिरूपकः श्लोकः–

“मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः। एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः॥[2]”

तदा **भाष्यकारा** आहुः, सत्यादीनां त्रयाणां विशेषणत्वेऽपि लक्षणारूपार्थप्राधान्यमिति पूर्वमपि प्रतिपादितम्। लक्षणार्थत्वे च तस्य वाक्यस्य शून्यार्थता कल्पयितुं न शक्यते। यतो हि

---

[1] छा. उ. ६/१/४

[2] तै. उ. ब्रह्मानन्दवल्लीभाष्यम्

शून्यं लक्ष्यं चेत्तस्य लक्षणकथनं व्यर्थम्। विशेषणार्थत्वेऽपि वाक्यस्य असदर्थकता वक्तुं न शक्या। यतो हि सत्यादिपदानां व्यावृत्तिप्रयोजनकत्वेऽपि स्वार्थस्य सन्मात्रादेः परित्यागः नास्ति। यदि च सत्यादीनां शून्यार्थत्वेन स्वार्थपरित्यागः अङ्गीक्रियते तर्हि विशेष्यं प्रति नियन्तृत्वमनुपपन्नं स्यात्। यतो हि सत्यादिपदानां सत्याद्यर्थैरर्थवत्त्वे सत्येव तद्विपरीत-धर्मविशिष्टेभ्यः अनृतजडपरिच्छिन्नपदार्थेभ्यः विशेष्यब्रह्मणः नियन्तृत्वं युज्यते। ब्रह्मशब्दश्च बृहि वृद्धौ इति धातोः निष्पन्नः वृद्धौ महत्त्वे वर्तते। तच्च महत्त्वं त्रिविधपरिच्छेदराहित्यात् निरतिशयमहत्त्वे पर्यवस्यति। तस्मात् मृगतृष्णादिशब्दवैलक्षण्यात् ब्रह्मशब्दस्य अप्रसिद्धार्थता वक्तुं न शक्यते। इत्थं सत्यज्ञानशब्दौ सच्चिद्रूपत्व-लक्षणस्वार्थबोधनद्वारेण अनन्तशब्दश्च परिच्छेदाभावबोधनद्वारेण ब्रह्मविशेषणानि भवन्ति।

ननु "तस्माद्वा एतस्मादात्मनः" इत्यादिश्रुतौ ब्रह्मार्थे आत्मशब्दः प्रयुक्तः। आत्मशब्दश्च जीववाचकः। तेन वेदितुर्जीवस्य स्वरूपं ब्रह्म इति गम्यते। "एतमानन्दमय-मात्मानमुपसंक्रामति[1]" इति श्रुतिरपि ब्रह्मात्मनोरभेदं दर्शयति। "तत्सृष्ट्वा तदेवानुप्राविशत्"[2] इति प्रवेशश्रुतिस्तु ब्रह्मणो जीवभावेन शरीरप्रवेशं प्रदर्शयति। एवं यदि जीवात्मा ब्रह्म तर्हि आत्माभिन्नत्वेन ब्रह्मणः ज्ञानकर्तृत्वं प्राप्तम्। यतो हि आत्मा ज्ञानकर्ता इत्यनुभवसिद्धम्। "सोऽकामयत" इति श्रुतिरपि ब्रह्मणः ज्ञानकर्तृत्वमेव साधयति। तस्मात् ज्ञप्तिर्ब्रह्म इति भावसाधनत्वमयुक्तम्। किञ्च, लौकिकज्ञानस्यान्तवत्त्वदर्शनात् तदतिरिक्तनित्यज्ञानाभावाच्च अनित्यत्वं धात्वर्थानां कारकापेक्षत्वात् ज्ञानस्य धात्वर्थत्वाच्च पारतन्त्र्यं वर्तेते ज्ञप्तेः। तस्मात् यदि ज्ञानं ज्ञप्तिरिति भावरूपता ब्रह्मणः अभ्युपगम्यते तर्हि तस्यानित्यत्वं पारतन्त्र्यं च स्वीकर्तव्यमापतति इति चेन्न, यतो हि चैतन्यरूपा इयं ज्ञप्तिः ब्रह्मणः स्वरूपभूता। तस्मात् नित्यात्मस्वरूपत्वात् अस्या अपि नित्यत्वमेव। कार्यवृत्तिसंसर्गात् तस्यां कार्यत्वमुपचर्यते केवलम्। तथाहि - प्रत्यगात्मोपाधिभूता वृत्तिः चक्षुरादीन्द्रियद्वारेण विषयदेशं गत्वा

---

[1] तै. उ. ब्रह्मानन्दवल्ली ८/५

[2] तत्रैव, ६/१

विषयाकारेण परिणमते। तस्या वृत्तेः शब्दाद्यवभासत्वेनप्रसिद्धाः परिणामाः विषयावभासकचैतन्यस्य उपाधिभूताः उत्पद्यमानाः सन्तः आत्मविज्ञानेन व्याप्ता एवोत्पद्यन्ते। तस्मादेव आत्मविज्ञानावभासाः विज्ञानशब्दवाच्याः धात्वर्थभूताः इमे आत्मनो विकारिणो धर्मा इति आपाततः प्रतीयन्ते, न तु परमार्थतस्ते आत्मनो धर्माः।

इत्थं लौकिकज्ञानस्य यद्यपि कारकपारतन्त्र्यमस्ति तथापि ब्रह्मणः स्वरूपज्ञानस्य सवितुः प्रकाशादिकमिव आत्माव्यतिरिक्तत्वात् ब्रह्मस्वरूपत्वमेव। अतः नित्यस्वरूपत्वात् कारणान्तरापेक्षाभावात् स्वतन्त्रमेव तत्। ननु ज्ञानस्य ब्रह्मरूपत्वे तस्याकार्यत्वेन ब्रह्मणस्तत्रकर्तृत्वासम्भवात् सर्वज्ञत्वं नोपपद्यते इति चेन्न, सर्वेषामपि भावानां यौ देशकालौ वर्तेते तौ ब्रह्मणा सह अविभक्तौ स्तः इति सर्वसन्निकृष्टता तस्य। कालाकाशादीनां सर्वेषामपि कार्याणां कारणं ब्रह्म इति सर्वानन्यता तस्य। तच्च ब्रह्म निरतिशयसूक्ष्मं वर्तते इति तदपेक्षया सूक्ष्मवस्त्वभावः। एवम् अविज्ञातस्य कस्यचित् अभावात् ब्रह्मणः सार्वज्ञ्यमुपपद्यते। किञ्च, ब्रह्मणः स्वरूपज्ञानं कारकनिरपेक्षमस्ति इत्यस्मिन् विषये -

“अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः।
स वेत्ति वेद्यं न तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्॥[1]”

“न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति[2]” इत्यादयः श्रुतयः प्रमाणभूताः सन्ति। इत्थं विज्ञात्रभिन्नत्वात् करणाद्यनपेक्षत्वाच्च आत्मस्वरूपं ज्ञानमिति तस्य नित्यत्वमपि सिद्ध्यति। तस्मात् अस्य ज्ञानस्य धात्वर्थता न युक्ता नित्यत्वात् कारकसापेक्षक्रियायाः एव धात्वर्थत्वाच्च। नित्यत्वात् तस्मिन् ज्ञाने ब्रह्मणः कर्तृत्वमपि आपादयितुं न शक्यते। अत एव तत् ज्ञानस्वरूपं ब्रह्म ज्ञानशब्दवाच्यमपि न भवति ज्ञानशब्दवाच्यलौकिकज्ञानविलक्षणत्वात् शब्दप्रवृत्तिहेतुजात्यादिधर्मविरहितत्वाच्च। परन्तु ज्ञानशब्दवाच्यत्वाभावेऽपि ज्ञानाभासवाचकेन ज्ञानशब्देन तत् लक्ष्यते।एवं सर्वविशेषरहित-

---

[1] श्वे.उ. ३/१९

[2] बृ.उ. ४/३/३०

स्वरूपत्वात् सत्यशब्देनापि ब्रह्म नोच्यते। अपि तु, लोकप्रसिद्धं यत् बाह्यं सत्ताजातिस्वरूपं तद्वाचकेन सत्यशब्देन बाधायोग्यं वस्तु लक्ष्यते। एवं वाच्यत्वाभावेऽपि लक्ष्यताधारेण सत्यं ब्रह्म ज्ञानं ब्रह्म इत्यादयः समानाधिकरणप्रयोगाः उपपद्यन्ते। अत्र यद्यपि सत्यादिशब्दानां मुख्यान्वयः ब्रह्मणा सह वर्तते तथापि ते इतरेतरसन्निधौ अन्योन्यस्य वृत्तिनियामकाः सन्ति। तथाहि – ज्ञानशब्दसान्निध्यात् सत्यशब्दो जडे कारणे न वर्तते अनन्तशब्दश्च ज्ञातृव्यतिरिक्ते न वर्तते। सत्यशब्दसान्निध्याच्च ज्ञानशब्दो लौकिकज्ञाने न वर्तते। ततश्च सत्यादिशब्दाः स्वशब्दवाच्यार्थात् ब्रह्मनिवर्तकाः भूत्वा ब्रह्मणः सच्चिदद्वितीयरूपस्वरूपलक्षणस्य समर्पका भवन्ति। तस्मात् वाच्यवाचकसम्बन्धेन बोधानङ्गीकारात् वाच्यत्वं, सकलद्वैतबाधाधिष्ठानत्वेन लक्ष्यत्वाभ्युपगमात् गुणगुण्यादिसंसर्गरूपवाक्यार्थत्वं च ब्रह्मणः न सम्भवतः।

तच्च ब्रह्म गुहायां निहितं वर्तते। संवरणार्थस्य गूहतेः निष्पन्नोऽयं गुहाशब्दः। भाष्ये गुहाशब्दस्य द्विविधोऽर्थः प्रदर्शितः। अस्यां ज्ञानज्ञातृज्ञेयपदार्थाः निगूढा इति गुहा इति एकोऽर्थः। यतो हि बुद्धिनिरोधावसरे ज्ञात्रादिपदार्थाः बुद्धौ भेदेन नोपलभ्यन्ते। अस्यां भोगापवर्गौ निगूढौ इति गुहा इति द्वितीयोऽर्थः। यतो हि भोगः अपवर्गश्च बुद्धिपरिणामत्वात् तत्रैव निगूढौ स्तः। तस्यां गुहायामन्तः परमं व्योम वर्तते। अत्र परमव्योम नाम अव्याकृतमज्ञानम् "एतस्मिन्नु खल्वक्षरे गार्ग्यकाश[1]" इत्यादिश्रुतेः। एवं गुहायां बुद्धौ अनुगतम् अव्याकृताख्यं यत्परमं व्योम तस्मिन् ब्रह्म निहितमिति सप्तमीद्वयं वैयधिकरण्येन व्याख्यातम्। ततः गुहायां व्योम्नि इति सप्तमीद्वयं सामानाधिकरण्येन व्याख्यायते। तदा अव्याकृतमज्ञानमेव गुहा इत्यर्थः आयाति। यतो हि कालत्रयेष्वपि सर्वे पदार्थाः अव्याकृताज्ञाने निगूढाः वर्तन्ते कारणत्वात् सूक्ष्मतरत्वाच्च। तस्मिन् च अव्याकृताज्ञाने ब्रह्म निहितं वर्तते। इत्थं पराभिप्रायेण व्याख्यानं कृत्वा स्वमतमाहुः **भाष्यकाराः–** प्रकृते व्योम्न उपसनाङ्गतया विवक्षितत्वात् हार्दाकाशः एव परमाकाशः इति उचितम्। "यो वै स बहिर्धा पुरुषादाकाशः"[2]"यौ वै सोऽन्तः

---

[1] बृ. उ. ३/८/१९

[2] छा. उ. ३/१२/७

पुरुष आकाशः"[1]"योऽयमन्तर्हृदय आकाशः"[2] इत्यादयः श्रुतयोऽपि हार्दाकाशस्य परमत्वं प्रदर्शयन्ति। तस्मिन् हृदयाकाशे या गुहाख्या बुद्धिर्वर्तते तस्यामेव ब्रह्म निहितं वर्तते। किन्तु तत् ब्रह्म तस्याः बुद्धिवृत्तेः भिन्नत्वेनैव उपलभ्यते। यतो हि सर्वगतस्य निर्विशेषस्य ब्रह्मणः विशिष्टदेशकालादिसम्बन्धो नैव वर्तते।

एतादृशं बुद्धिगुहायां निहितं ब्रह्म यो विजानाति स सर्वविधमपि कामभोगं करोति। यथा वयं लौकिकानां वित्तपुत्रादिकामानां भोगं क्रमेण कुर्मः तथा भोगः ब्रह्मवित्पुरुषस्य न भवति। स बुद्धिवृत्यारूढः सन् ब्रह्मस्वरूपाव्यतिरिक्ततया सर्वानपि कामान् सूर्यप्रकाशवत् एकस्मिन्नेव क्षणे भुङ्क्ते। यथा लोके सांसारिकाः जीवात्मानः धर्मादिनिमित्तानि चक्षुरादिसाधनानि चापेक्ष्य सर्वानपि कामान् भुञ्जते तथा न भुङ्क्ते विद्वान्। अपि तु, सर्वज्ञः सर्वगतः नित्यब्रह्मात्मस्वरूपः स धर्मादिनिमित्तानि चक्षुरादिसाधनानि चानपेक्ष्य सर्वमपि कामभोगं करोति। तस्य विपश्चित्पुरुषस्य वैपश्चित्यं नाम ब्रह्मणः सर्वज्ञत्वमेव। यतो हि तेन सर्वज्ञस्वरूपेण अयं सर्वकामभोक्ता भवति। एवं हि संक्षेपेण तैत्तियीयोपनिषदः प्रकारेण भगवत्पादानां वाक्यानि मनसि निधाय ब्रह्मलक्षणविचारः अकारि॥

## सन्दर्भसूचिः

१. वेदान्तसारः, New Bharatiya Book Corporation,New Delhi
२. वेदान्तपरिभाषा, Swami Madhavanand, Avaita Ashrama Kolkata
३. तैत्तिरीय-उपनिषत्, Edited by Dr. Mani Dravid, Shri Dakshinamurthy Matha Prakashana, Kolkata
४. ब्रह्मसूत्रम्, Motilal Banarasidas, ISBN – 8120805259, First Edition 1980
५. सिद्धान्तलेशसङ्ग्रहः, Chaukhamba Prakashan, 2007 Edition

❑❑❑

[1] छा. उ. ३/१२/८
[2] तत्रैव, ३/१२/९

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२०  **सम्पुटम् :** संयुक्तम् (१,२)

# श्रीमद्भक्तिविवेके पौराणिकः प्रभावः - एकं विशिष्टमध्ययनम्

**डा. भेषराजशर्मा***

अस्मद्देशीयपूर्वोत्तरराज्येषु नव वैष्णवधर्मप्रवर्तकेषु तत्प्रचारकेषु प्रसारकेषु च पण्डितप्रवरो भट्टदेवः अन्यतमः। कविरत्न-वैकुण्ठनाथ-भागवत-भट्टाचार्यस्तस्य पूर्णमभिधानम्। लोके भट्टदेवसंज्ञयैव संज्ञितः सर्वथा प्रसिद्धश्चासौ एको महान् कविरभिनवः कथाकारः, विचक्षणो व्याख्याता, नववैष्णवधर्मस्य च निष्ठावान् प्रचारक आसीत्। तेन संस्कृतभाषया प्रणीतेषु ग्रन्थेषु श्रीमद्भक्तिविवेकः प्रथितमो ग्रन्थः। तस्यायं ग्रन्थो न केवलं दामोदरीवैष्णवधर्मस्य वेदसंहितारूपः अपि तु सर्वभारतीयमेकमनवद्यं वैष्णवसाहित्यं एको महीयान् निधिः।

प्रसङ्गक्रमेण अत्रेदं वक्तुमभिलषामो यत् विष्णुपुरीसन्यासिना विरचिता भक्तिरत्नावली, श्रीमता शङ्करदेवेन प्रणीतो भक्तिरत्नाकरः, श्रीमता हरिदेवेन विरचिता भक्तिरसतरङ्गिणी, श्रीजीवगोस्वामिना प्रणीतः भक्तिसन्दर्भः चापि संस्कृते समुपनिबद्धाः भक्तितत्त्वप्रतिपादिकाः श्रीमद्भक्तिविवेक इवान्ये प्रमुखाः संग्रहग्रन्थाः भवन्ति।

श्रीमद्भक्तिविवेकस्य प्रतिपाद्यं विषयवस्तु भवति भक्तितत्त्वम्। भक्तिविवेकः इति नाम्नैव प्रसिद्धस्यास्य ग्रन्थस्य रचनाकालः ई. 1621 शततमे वर्षे निर्धार्यते। अस्मिन् ग्रन्थे द्वादशाधिकाष्टशतं श्लोकाः सङ्कलिताः प्राप्यन्ते। तत्रापि चत्वारः श्लोकाः द्विधा आवृताः सन्ति। अवशिष्टेषु प्रस्तावनायाः त्रयः, अन्तिमस्य पञ्चदशपरिच्छेदस्य प्रथमः सर्वान्तिमश्च श्लोकः, समवेतया पञ्चश्लोकाः भट्टदेवेन विरचिताः सन्ति। अन्ये च त्र्यधिकाष्टशतं श्लोकाः विभिन्नेभ्यः शास्त्रेभ्यः संगृहिताः विषयानुसारं पञ्चदशपरिच्छेदेषु उपन्यस्ताः दृश्यन्ते।

---

* सहायकाचार्यः, वनस्थलीविद्यापीठम्।

अस्य ग्रन्थस्य पञ्चदशपरिच्छेदेषु प्रथमपरिच्छेदे भक्तिस्थाननिर्णयः, द्वितीये गुरुशिष्यनिर्णयः, तृतीये शरणनिर्णयः, चतुर्थे नाममाहात्म्यं, पञ्चमे भगवद्भक्तिमहात्म्यम्, षष्ठे सत्सङ्गिर्णयः, सप्तमे श्रवणकीर्तनादिनिरूपणभूमिका, अष्टमे श्रवणनिर्णयः, नवमे कीर्तननिर्णयः, दशमे स्मरणमाहात्म्यम्, एकादशे पादसेवनमाहात्म्यम्, द्वादशे पूजानिर्णयः, त्रयोदशे नमस्कारमाहात्म्यम्, चतुर्दशे दास्यनिर्णयः, अन्तिमे पञ्चदशे च परिच्छेदे भगवन्मूर्तेः सत्यत्वं प्रतिपादितमस्ति –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येधीतमुत्तमम्।।[1]

श्रीमद्भागवतपुराणोक्तेयं नवधा भक्तिः सुप्रसिद्धा। श्रीमद्भक्तिविवेके भक्तेः नवप्रकारकेषु एषु सख्यमात्मनिवेदनञ्च विहायान्येषां सप्तप्रकाराणां सन्निवेशो वर्णनं वा संलक्ष्यते। ग्रन्थमेनमाधृत्य भट्टदेवेन काचित् टीकाऽपि विरचिता विद्यते। किन्तु तट्टीकायाः काऽपि संज्ञा तेन नैव निर्दिश्यते। भागवताधिकरणम् इत्याख्या काऽपि पाण्डुलिपिरधिगताऽस्ति। किन्तु साऽपि ग्रन्थकारटीकाकारनामादिविरहिता एवास्ति। तदेतत् भागवताधिकरणमेव तट्टीकायाः संज्ञा भवितुमर्हतीति केषाञ्चित् समालोचकानामितिहासज्ञानाच्च तत्रभवतामनुमानम्। परन्त्वेतत् सत्यं यत् श्रीधरस्वामिनो भागवतभावार्थदीपिकायाः प्रचुरः प्रभावस्तदस्यां टीकायां दृष्टिपथमायाति।

अत्रेदं प्रणिधानयोग्यं यत् संस्कृतभाषया प्रणीतं यत् भक्तिसाहित्यमुपलभ्यते तत्सर्वस्य वर्ण्यविषयो भवति भक्तितत्त्वनिरूपणम्, अपि च सर्वस्यापि प्रमुखतम आधारग्रन्थो भवति श्रीमद्भागवतमहापुराणम्। किञ्च विष्णुपुरीसन्यासिनः भक्तिरत्नावल्याः साकल्येन त्रय

[1] भागवतपुराणम्, 7/5/23-24

एवाधारग्रन्थाः सन्ति – श्रीमद्भागवतम्, श्रीधरीटीका, हरिभक्तिसुधोदयश्च। महापुरुष-शङ्करदेवस्य भक्तिरत्नाकरस्य षड्विंशतिः आधारग्रन्थाः दृश्यन्ते। तत्रैव श्रीमतो भट्टदेवस्य श्रीमद्भक्तिविवेकस्य षष्ठ्यधिकाः आधारग्रन्थाः परिगण्यन्ते। एष्वपि षष्ठ्यधिकग्रन्थेषु सर्वाधिका संख्या पुराणानामेव भवति। श्रीमद्भक्तिविवेकस्याध्ययनेन एतदवगम्यते यत् विंशतेः पुराणेभ्यः श्लोकाः अत्र संगृह्योपस्थापिताः वर्तन्ते। उदाहरणार्थं वक्तुं युज्यते यत् श्रीमद्भागवतपुराणात् सर्वाधिकाः एकविंशत्यधिकद्विशतं श्लोकाः, अग्निपुराणात् षड्, कूर्मपुराणात् द्वौ, आदिपुराणात् अष्टौ, गरुडपुराणात् पञ्चाशत्, नरसिंहपुराणात् षोडशः, नारदीयपुराणात् षड्सप्ततिः, पद्मपुराणात् षष्ठिः, वराहपुराणात् द्वौ, हरिवंशपुराणात् एकः, भविष्यपुराणादपि एकः, वामनपुराणात् चत्वारः, वायुपुराणात् अष्टौ, विष्णुधर्मोत्तरपुराणात् चतुर्दश, विष्णुपुराणात् द्वाविंशतिः ब्रह्मपुराणात् चत्वारः, ब्रह्मवैवर्तपुराणात् पञ्च, ब्रह्माण्डपुराणात् दश, मार्कण्डेयपुराणात् द्वौ, स्कन्दपुराणाच्च एकचत्वारिंशत् श्लोकाः ग्रन्थेऽस्मिन् समुद्धृताः विद्यन्ते। तदित्थं विंशतिपुराणेभ्यः साकल्येन त्रिपञ्चादशधिकपञ्चशतं श्लोकाः ग्रन्थकारेणात्र संगृहीताः सन्ति। स्पष्टार्थमधो निर्दिष्टा तालिका द्रष्टुं शक्यते –

| | | |
|---|---|---|
| ○ श्रीमद्भक्तिविवेकस्य समग्राः श्लोकसंख्या | = | 812 |
| ○ द्विधा आवृताः श्लोकाः चत्वारः | = | 4- |
| | | ------------------------- |
| | = | 808 |
| ○ ग्रन्थकारेण रचिताः श्लोकाः पञ्च | = | -5 |
| | | -------------------------- |
| | = | 803 |
| ○ विंशतिपुराणेभ्यः संगृहीताः श्लोकाः | = | 553- |
| | | --------------------------- |
| ○ अपरग्रन्थेभ्यः संगृहीताः श्लोकाः | = | 250 |

आधारग्रन्थाः षष्ठिसंख्यकाः। तेषु पुराणानां संख्यैव भवति विंशतिः इति। अवशिष्टानामाधारग्रन्थानां संख्या जायते चत्वारिंशत्। तदेव विंशतिपुराणेभ्यः त्रिपञ्चाशदधिकपञ्चशतं श्लोकाः, अपि च चत्वारिंशतः इतरग्रन्थेभ्यः पञ्चशदधिकद्विशतं श्लोकाः श्रीमद्भक्तिविवेके समुपनिबद्धाः वर्तन्ते। अनेन हि ग्रन्थेऽस्मिन् पौराणिकः प्रभावः सहजतयाऽनुमातुं शक्यते।

श्रीमद्भक्तिविवेकस्य रचनायाः अस्त्येकं विशिष्टं कारणम्। तच्च ग्रन्थकारेण ग्रन्थस्य प्रस्तावनायां स्वरचितद्वितीय-तृतीयपद्योर्विनिर्दिश्यते यत् भगवद्भक्तिविषयकं वर्णनं भगवत्सेवायाः शाश्वतधर्मविषयिणी कथा च केवलं श्रीमद्भागवतपुराणे एवास्तीति नोद्भावनीयम्। अत एवासौ श्रीमद्भागवतपुराणेन सह षष्ठ्यधिकग्रन्थेभ्यः भक्तिविषयकं भक्तितत्त्वजातं वाक्यसमुच्चयं श्लोकसमूहं वा संगृह्य प्रीतये वैष्णवानामाश्रयलाभाय च गोविन्दश्रीचरणयोर्ग्रन्थमेनं विरचयामास। यथोक्तं तेन –

**श्रीमद्भागवतोक्तमेव भगवत्सेवाव्रतं शाश्वतं**
**नान्यत्रोक्तमितीरितं परिनुदन् श्रुत्यर्थवच्छास्त्रतः ।**
**सारं सारमुपहारन् प्रकुरुते गोविन्दपादाश्रयात्**
**श्रीमद्भक्तिविवेकसंग्रहमलं सद्वैष्णवप्रीतये ।।**
**श्रीमद्दामोदरपदरजः प्राप्य भाग्यैरनल्पै-**
**र्देशं कालं सुजनहृदयं तन्मतं लोकशक्तिम् ।**
**सम्यग्ज्ञात्वा विलिखति मुदा भक्तिमच्छ्लोसंघान्**
**नानाग्रन्थात् कविपदपुरो रत्नसंज्ञो द्विजातिः ।।**[1]

श्रीमद्भक्तिविवेकस्य प्रथमः परिच्छेदो हरिस्थाननिर्णयाख्यः। ग्रन्थकारो ह्यत्र भक्तिस्थाननिरूपणाय विभिन्नेभ्यः पुराणेभ्यः नैकानि समुद्धरणानि समुदाहरन् विशेषतो भारतवर्षस्य श्रेष्ठत्वं प्रतिपादयति।

---

[1] श्रीमद्भक्तिविवेकः श्लोक 3-2

तथाहि –

**अहो भुवः सप्तसमुद्रवत्या, दीपेषु वर्षेष्वधिपुण्यमेतत् ।**
**गायन्ति यत्रत्या जना मुरारेः, कर्माणि भद्राण्यवतारवन्ति ।।[1]**

स्वर्गापवर्गयोरास्पदहेतुभूतं खलु भारतवर्षम्। अस्मिन् भारतवर्षे आत्मसत्त्वगुणाद्धेतोः ये जायन्ते तेऽवश्यमेव धन्याः। यथोच्यते –

**गायन्ति देवा किल गीतिकानि**
**धन्यास्तु ये भारतभूमिभागे।**
**स्वर्गापवर्गास्पदहेतुभूते**
**भवन्ति भूयः पुरुषाः सुरत्वात् ।।[2]**

कीदृशाः जनाः धन्याः इत्याकांक्षायां श्रीमद्भक्तिविवेककारः निम्नलिखितं पद्यमवतारयति –

**कर्माण्यसंकल्पित तत्फलानि, समर्प्य विष्णौ परमात्मभूते ।**
**अवाप्य तां कर्ममहीमनन्ते, तस्मिंल्लयं ये त्वमलाः प्रयान्ति ।।[3]**

गुरुशिष्यलक्षणनिर्णयात्मके द्वितीयपरिच्छेदे नानापुराणसंगृहीतैः द्विपञ्चाशता श्लोकैः गुरुशिष्यलक्षणमुपन्यस्तमस्ति। सद्गुरुचरणशरणमन्तरेणोत्तमस्य श्रेयसः प्राप्तिरसम्भवा। भक्त्याभावे सर्वशास्त्रवेत्ताऽपि गुरुर्भवितुं नार्हति। तद्यथा –

**महाकुलप्रसूतोऽपि सर्वयज्ञेषु दीक्षितः ।**
**सहस्रशाखाध्यायी च न गुरुः स्यादवैष्णवः ।।[4]**

---

[1] भा.पु. 5/6/13

[2] विष्णुपुराणम्, 3/3/24

[3] तत्रैव, 2/1/25

[4] पद्मपुराणम्, उत्तरखण्डः

गुरुश्चासौ त्रिविधः। इह संसारे यत्र सम्भवो जन्ममात्रं सः पिता उत्पादकस्तावदाद्य। ब्रह्मदो द्विजातेः पुंसः सत्कर्मसंपादकः दीक्षामन्त्रप्रदः उपनयनपूर्वकवेदाध्यापको द्वितीयः हरिभक्तिधर्मवक्ता ज्ञानप्रदस्तृतीयः। एतेषाञ्च तृतीयो हरिभक्तिधर्मवक्ता परमो गुरुः। यथोक्तं –

**अध्यापकश्च वेदानां मन्त्रव्याख्यानकृत् तथा।**
**पिता च धर्मवक्ता विशेषगुरुवः स्मृताः।।**
**एतेषामपि भूपाल श्रृणुष्व प्रवरं गुरुम्।**
**पुराणार्थं वदति यो धर्मवक्ता च पण्डितः।।**
**संसारपरिविच्छेदकारणाच्च स उत्तमः।।**[1]

एवं विविधैः पौराणिकवाक्यैर्गुरोः कार्याकार्यमुक्त्वा भागवतपुराणोक्तदिशा शिष्यलक्षणमुपस्थाप्यते –

**अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः।**
**असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक्।।**[2]

नवाधिकशतसंख्यकपद्यान्वितस्य तृतीयपरिच्छेदस्य शीर्षकं भवति 'शरण-निर्णयः' इति। ''परमात्मनि श्रीकृष्णे शरणं तत् प्रचक्षते'' इति धिया भगवतः श्रीकृष्णस्य पादमूले समाश्रयणमेव शरणम्। मदेक शरणो भव। मद्भक्त्यैव सर्वं सेत्स्यति। मयि वर्तमानः कर्मत्यागनिमित्तं पापं स्यादिति शोकं मा कार्षीः। यत् त्वां मदेकशरणमहं सर्वपापेभ्यो मोक्षयिष्यामीति निखिलजनमायापशमनाय कृतावतारस्य भगवतः श्रीकृष्णस्योक्तिः। तद्यथा –

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।**[3]

---

[1] नारदीयपुराणम्, 9/98-100

[2] भा.पु., 11/10/5

[3] गीता, 18/66

मामेकं शरणं व्रजेति भगवता श्रीकृष्णेन निगदितम्। कथमिति जिज्ञासायां ग्रन्थकारो भगवतः एकत्वप्रतिपादकानि श्रुति-स्मृतिवचनानि समुपस्थापयन् विनिर्दिशति यत् विधाता, हरिर्हरो वा भवतु, त्रयोऽपि अभिन्नाः। तस्मात् भट्टदेवः श्रुति-स्मृत्युक्तवचनानि पुराणवाक्यैरेव पुनः समर्थयति। तथाहि –

**अहमेवासमेकोऽग्रे नान्यत् किञ्चनान्तरं बहिः।**
**पश्चादहं यदेतञ्च योऽवशिष्यते सोऽस्म्यहम्।।**[1]
**हरिं हरं विधातारं यः पश्येदेकरूपिणम्।**
**स याति परमानन्दं शास्त्राणामेष निर्णयः।।**[2]
**हरिशङ्करयोर्मध्ये ब्रह्मणश्चापि यो नरः।**
**भेदकृन्नरकं भुङ्क्ते यावदाचन्द्रतारकम्।।**[3]

सप्तनवत्यधिकशतलोकसमायुक्ते चतुर्थे परिच्छेदे भगवतोऽपरिमितं नाममाहात्म्यं वर्णयता पौराणिकैः नानार्षेयवाक्यैर्ग्रन्थकारेणाभिधीयते यत् केवलं विष्णोर्नामैव पुंसां शकलं पापमपहरेदिति। तद्यथा –

**स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः।**
**स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे।**
**सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्।**
**नामव्याहरणं विष्णोर्यतस्तद्विषयामतिः।।**[4]
**अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत्।**
**सङ्कीर्तितमघं पुंसो दहेदेधो महानलः।।**[5]

---

[1] भा.पु., 2/6/32
[2] बृहन्नारदीयपुराणम्, 6/46
[3] तत्रैव, 6/45
[4] भा.पु., 6/2/9-10
[5] तत्रैव, 6/2/68

द्विपञ्चाशता श्लोकैः समुपनिबद्धे पञ्चमे परिच्छेदे भगवद्भक्तिमाहात्म्यं निरूपितं वर्तते। नारदीयपुराणोक्तं वाक्यमुदाहरन् भट्टदेवोऽभिधत्ते यत् जनार्दने निश्चला भक्तिरेव मुक्तिः। विष्णुभक्ताश्च सर्वदा मुक्ताः। तथाहि –

निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जनार्दने।
मुक्ता एव हि ते भक्तास्तव विष्णोर्यतो हरे।।

जनार्दनाश्चायं भक्त्यैव तोषयितुं शक्यते। न पुनः विविधदानपुष्पानुलेपनैः। यथोक्तं –

**न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः।**
**तोषमेति महात्माऽसौ यथा भक्त्या जनार्दनः।।**[1]
**न दानं न तपो नेज्या न शौचं न व्रतानि च।**
**प्रियतेऽमलया भक्त्या हरिरन्यद् विडम्बनम्।।**[2]

ननु को वा भक्तः? इति जिज्ञासायामुच्यते –

**कथं विना रोमहर्षं द्रवता चेतसा विना।**
**विनानन्दाश्रुकलया शुद्ध्याद् भक्त्या विनाशयः।।**[3]

गारुडेऽपि उक्तम् –

**ते भक्ता लोकनाथस्य नामकर्मादिकीर्तने।**
**मुञ्चत्यश्रूणि संहर्षाद् ये प्रहृष्टतनुरुहाः।।**

''भक्तिश्च भगवद्भक्तसङ्गतः परिजायते'' इत्युक्तं पञ्चमे परिच्छेदे। अतोऽधुना षष्ठे परिच्छेदे चतुषष्ठिसंख्यकैः नानाशास्त्रसंकलितैः पद्यैः सत्सङ्गनिर्णयोऽकारि ग्रन्थकृता भट्टदेवेन।

---

1 गरुडे, पूर्वखण्डे, 231/33
2 भा.पु., 7/7/52
3 तत्रैव, 11/14/23

कृष्णभक्तानां दर्शनस्पर्शनालापसहवासादयः अधमादिनिखिललोकान् पुनन्ति। यथोक्तं ब्रह्माण्डे –

दर्शनस्पर्शनालापसहवासादिभिः क्षणात्।
भक्ताः पुनन्ति कृष्णस्य साक्षादापुक्कसं जगत्।।

सन्ताः रवेरपि श्रेष्ठाः प्रेष्ठाश्च। यतोहि दिवाकरस्तु रश्मिभिर्वाह्यं जगदेव प्रकाशयति, किन्तु सन्ताः सद्वाक्यैरान्तरिकमन्धकारमपि अपनयन्ति। बृहन्नारदीयपुराणे उच्यते –

रविश्च रश्मिजालेन दिवा हन्ति बहिस्तमः।
सन्तः सूक्तिमरीच्यौघैरन्तर्ध्वान्तं हि सर्वदा।।

एवं क्रमेणात्र बहुभिर्वाक्यैः सत्सङ्गमाहात्म्यमुपवर्ण्य तद्ग्रहणे भागवतोक्तविधिवाक्यमुद्धरति–

**ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान्।**
**सन्त एवास्यच्छिन्दन्ति मनोव्यासङ्गमुक्तिभिः।।**[1]

कीदृशाश्च ते सन्तः इत्यपेक्षायां नारदवाक्येन तल्लक्षणं प्रस्तौति –

यत्र भागवता राजन् साधवो विशदाशयाः।
भगवद्गुणानुकथनश्रवणव्यग्रचेतसः।।
सत्कथाश्रवणे येषां वर्तते सात्त्विकी मतिः।
तद्वक्तरि च भक्तिश्च ते वै भागवतोत्तमाः।।
अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः।।
येऽभिनन्दन्ति नामानि हरेः श्रुत्वातिहर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः।।

---

[1] भा.पु., 11/4/23

मन्मानसाश्च मद्भक्ता मद्भक्तजनलोलुपाः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः।।

श्रवणकीर्तनादिनिरूपणभूमिकारूपः सप्तमः परिच्छेदः। एकविंशतिः श्लोकाश्चात्र संचित्योपन्यस्ताः। यद्यपि अष्टमे परिच्छेदे नानाशास्त्रसंकलितैः अष्टादशश्लोकैः श्रवणनिर्णयः, नवमे परिच्छेदे त्रिंशता पद्यैः कीर्तननिर्णयः कृतोऽस्ति। दशमे च परिच्छेदे सप्तचत्वारिंशता श्लोकैः स्मरणमाहात्म्यं प्रतिपादितमस्ति । तथापि पूर्ववर्तिषु परिच्छेदेषु भगवद्भक्तेः कर्तव्यतां तत्महिमानञ्च निरूप्यास्मिन् सप्तमे परिच्छेदे भगवद्भक्तिभेदाः श्रवणादयः समकालमेव वर्णिताः विद्यन्ते। नवमे परिच्छेदे कीर्तनं निरूपयता भट्टदेवेनोच्यते – ''तत्र कीर्तनं तावच्चतुर्विधम्। कृतिसंशब्दने इत्यस्माद्धातोः 'कीर्तन' इति शब्दः निष्पद्यते। कीर्तनं नामोच्चारणं स्तुतिपाठः कथा-व्याख्या गीतञ्च। उच्चारणपदेनैव मूलाधारादुच्चारणाव्यभिचाराद् वचनाच्च मानसोपांशोरपि ग्रहणम्।'' यथोक्तं नारसिंहपुराणे –

त्रिविधः जपयज्ञः स्यात् तस्य भेदं निबोधत।
वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः।।
त्रयाणां जपयज्ञानां श्रेयः स्यादुत्तरोत्तरः।।

त्र्याणां चात्र कथितानां कीर्तनानां लक्षणं यथा तत्रैव –

यदुच्चनीचस्वरीतैः स्पष्टशब्दवदक्षरैः।
मन्त्रमुच्चारयेद् युक्तो जपयज्ञः स वाचिकः।।
शनैरुच्चारयन् मन्त्रमीषदोष्ठौ प्रचालयेत्।
किञ्चित् स्पष्टं स्वयं विद्यादुपांशुः स जपः स्मृतः।।
धिया यदक्षरश्रेण्यो वर्णात्वर्णं पदात्पदम्।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः।। इति।

एकादशे परिच्छेदे विविधशास्त्रसमुद्धृतैरेकपञ्चाशता श्लोकैः विष्णोः 'पादसेवनमाहात्म्यं' वर्णितम् । पादसेवनं परिचर्येति भक्तिविवेककारः। तच्च द्विविधं फलरूपं साधनरूपञ्च। निजं चिन्मयं रूपमाधाय बहुधा विभूतिभिः लक्ष्म्या विष्णोचरणयुगलस्य परिचर्यया यत् परमं मङ्गलं साध्यते तत् फलरूपं पादसेवनम्। फलरूपस्य पादसेवनस्य साधनभूतानां प्रतिमादिकानां सेवनमर्चनञ्चेति साधनरूपं पादसेवनम्। आनुषङ्गिकफललाभ-दृष्ट्या पादसेवायाः अनेकान् प्रकारान् दर्शयितुकामेन ग्रन्थकारेण अग्निपुराणादधोलिखितं श्लोकद्वयं समुद्धृतमस्ति। तथाहि –

पूजितं पूज्यमानं वा यः पश्येत् भक्तितो हरिम्।
श्रद्धया मोहयेद् यस्तु सोऽपि यज्ञफलं लभेत्।।
दृष्ट्वा संपूजितं कृष्णं नृत्यमानोऽनुमोदते।
स संयममतिः शुद्धः परं ब्रह्माधिगच्छति।।

अस्य परिच्छेदस्यान्ते देवालयशुश्रूषायाः भगवतः स्नानस्य अभिषेकस्येति, पुष्पार्पणस्य तथा च शङ्खोदक-पादोदक-निर्माल्यग्रहण-फलानि विवृतानि वर्तन्ते। तुलसीदलस्य महत्त्वं तच्चयनस्य निषेधकालादिकमपि नानापुराणसंकलितवचनैरत्र विवेचितमस्ति । उदाहरणार्थं यथा स्कान्दे अवन्तिखण्डे –

संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे।
तुलसीं ये विच्छिन्दन्ति छिन्दन्ति हरेः शिरः।।
द्वादश्यां श्रवणे चैव रोहिण्यां ग्रहणे तथा।
भुक्त्वा रजन्यामाशौचे मृतके सूतके त्यजेत्।।
देवपादोदकं चैव गङ्गातोयं तथैव च।
तथा समुद्रतोयं च विप्रपादोदकं तथा।।
नैकत्र योजयेत् प्राज्ञः संकरे विकलं यतः।

पूजानिर्णयात्मकः खलु द्वादशः परिच्छेदः। पञ्चषष्ठिः श्लोकाश्चात्र प्राप्यन्ते। भगवदर्चनप्रभावोऽत्र विवेचितः। तत्रार्चनञ्च द्विविधम्। साधनरूपं फलरूपञ्चेति। ग्रन्थकारः द्विविधमपि भगवदर्चनं सम्यक् समीक्ष्य भगवदर्चनस्य प्रभावं तत्फलञ्च विवृत्यान्ते स्वाभिमतं प्रकटयनभिधत्ते –

**मानुष्यं दुर्लभं प्राप्य यो हरिं नार्चयेत् सकृत्।**
**मूर्खस्तु तत्परः कोऽस्ति कोऽन्यस्तस्मादचेतनः।।**[1]

त्रयोदशे परिच्छेदे विविधपुराणेभ्यः समुद्धृताः एकचत्वारिंशच्छ्लोकाः लभ्यन्ते। सविस्तरं नमस्कारमाहात्म्यम्, एकाङ्ग-दण्डवदष्टाङ्ग-पञ्चाङ्गिक-त्र्यङ्गादयो नमस्कारभेदाश्चात्र विश्लेषिताः सन्ति।

दास्यनिर्णयनामाभिधस्तावत् चतुर्दशः परिच्छेदः। श्लोकसंख्या चात्र द्वाविंशतिः। दासस्य भावो दास्यं कर्मार्पणञ्चेति भट्टदेवः। उदाहरणार्थं भागवतपुराणात् समुद्धृतं कर्मार्पणविषयकं वचनमिदमुल्लेखमर्हति –

**कायेन वाचा मनसेन्द्रियैर्वा**
**बुद्ध्यात्मना वानुसृतस्वभावात्।**
**करोति यत् यत् सकलं परस्मै**
**नारायणायेति समर्पयेत् तत् ।।**[2] इति।

श्रीमद्भक्तिविवेकस्य पञ्चदशपरिच्छेदस्य प्रतिपाद्यविषयो भवति 'भगवन्मूर्तेः सत्यत्त्वम्' 'ईश्वरनिर्णयो' वेति। भट्टदेवेन भगवतः साकारमुर्तेनिरूपणार्थं नानाशास्त्रेभ्यः एकादशश्लोकाः संकलिताः सन्ति। तदनुसारम् ईश्वरः साकारः मूर्तियुक्तश्च। साधारणोऽपि सः असाधारणः। असौ परमपुरुषः। भक्तिश्च साकारं पुरुषोत्तमं प्रति सम्भवतीति भक्तेर्मुख्यं

---

[1] श्रीमद्भक्तिविवेकः, 12/65

[2] मा.पु., 11/6/36

रहस्यम्। भगवतः सन्तुष्ट्यर्थे कायादीनामात्मनो वा यत् कर्म तत् सकलं परस्मै परमेश्वराय नारायणाय समर्पयेत। तथा सति सर्वमपि कर्म भगवतः धर्मो भवतीति पुराणसम्मतं तथ्यं चतुर्दशे परिच्छेदे प्रतिपादितम्। अत एव ग्रन्थकारः तत्रभवान् भट्टदेवः अन्तिमस्य पञ्चदशपरिच्छेदस्य चादौ अन्तिमे पद्ये स्वरचिते श्रीमदभक्तिविवेकइत्याख्यं निजं ग्रन्थमपि भगवत्सन्तुष्ट्यर्थं भगवते एव समर्पयन् प्राह –

श्रीकृष्ण त्वन्निदेशेन कृतो ग्रन्थः समुज्वलः।
त्वमत्र परितुष्टः स्याः साधुभिस्त्वत्परायणैः।।
श्रीमद्दामोदरवरसदो मण्डपे साधुजुष्टे
कृष्णादेशादनुगतरतौ सर्वशास्त्रानुसारात्।
श्रीमद्भक्तिविवेकपद्यमकरोत् शाकेऽग्निवेदेषुभि-
श्चन्द्रे माघदिने दिनेशदिवसे तेनैव तुष्येद्हरिः।।

पूर्वोत्तरभारते भक्तिवादस्य प्रचिलतेषु सम्प्रदायेषु द्विविधः सम्प्रदायः प्रमुखतमः। महापुरुषशंकरदेवेन प्रतिष्ठापितः शंकरीसम्प्रदायः तथा च श्रीदामोदरदेवेन प्रतिष्ठापितः दामोदरीसम्प्रदायः। अनयोः सम्प्रदाययोः संस्कृते अनेके ग्रन्थाः प्रकाशिताः सुप्रथिताश्च सन्ति। श्रीमद्भक्तिविवेकस्य परिशीलनेन एतद् विज्ञायते यत् प्रागुक्तयोः सम्प्रदाययोर्मध्ये यद्यपि भक्तेः मूलतत्वक्षेत्रे अपि च भक्तेरुपजीव्यत्वेन समुद्धृतानां स्वीकृतानाञ्च ग्रन्थानां क्षेत्रे किमपि पार्थक्यं नासीत्, तथापि व्यावहरिकजीवने पूजादीनां प्रयोजनक्षेत्रे, ब्राह्मणादीनां कर्तव्यनिर्णयक्षेत्रे शंकरदामोदरग्रन्थानां मध्ये कश्चन मतभेदः आसीत्। द्वयोराचरणपद्धतावपि क्वचित् वैषम्यमासीत्। अत एव ग्रन्थकारेण वैकुण्ठनाथभट्टाचार्येण निजगुरोः श्रीदामोदरस्य स्वकीयं किमपि विशिष्टं मतजातं वीक्ष्य देश-काल-पात्रगतञ्च भेदं स्वीकृत्य ग्रन्थोऽयं विरचित आसीत्। अयं ग्रन्थः न केवलं दामोदरमतानुयायिनां कृते एव अपितु सुविपुलस्य संस्कृतवाङ्मयस्य एकोऽनुपमः उल्लेखनीयश्च संग्रहग्रन्थः अस्ति।

## सहायकग्रन्थसूची

१) गरुडपुराण - गीताप्रेस, गोरखपुर, १९९९
२) भक्तिविवेक - भट्टदेवशर्मा सत्येन्द्रनाथ, एनसाइक्लोपीडिया आफ इण्डिया लिटरेचर, साहित्य अकेडमी, न्यूदेहली, १९८७
३) नारदीयपुराण - गीताप्रेस, गोरखपुर, २०००
४) विष्णुपुराण - गीताप्रेस, गोरखपुर, २०००
५) श्रीमद्भागवतमहापुराण - आचार्यशिवप्रसादद्विवेदी, चौखम्भासुरभारतीप्रकाशन, वाराणसी, २०१९

❑ ❑ ❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२०    **सम्पुटम् :** संयुक्तम् (१,२)

# अधिगीतं मोक्षस्वरूपविचारः

**आवीरलाल गङ्गोपाध्यायः***
**डा. जे.एस्.आर्. प्रसादः**♣

लोके सङ्गीतशब्देन गीतस्यैव ग्रहणं भवति,[1] न तु तच्छास्त्रे। तत्किल गीतस्य वाद्यस्य नृत्यस्य च।[2] तस्मात् सङ्गीतपदं पारिभाषिकम्। अतोऽत्र निबन्धे गीतपरकतया विचारे प्रवर्तमाने शीर्षकेऽपि गीतपदस्य ग्रहणम्। न तु सङ्गीतपदस्य।

मोक्षः खलु चतुर्विधपुरुषार्थेषु चरमः। गीतेन चतुर्वर्गफलप्राप्तिर्बहुधा श्रूयते। तत्र पुनः त्रिवर्गाणां सिद्धिस्तु लोके भूयशो दृश्यते। कल्लिनाथेनैव सङ्गीतरत्नाकरटीकायां श्रुतिप्रमाणेन तत्सर्वं साध्यते।[3] तद्यथा धर्मावाप्तिः **ब्राह्मणौ वीणागाथिनौ गायतो ब्राह्मणोऽन्यो गायेत्** इति श्रुतेः। देवतावन्दनादिष्वपि गीतप्रयोगो लोकतो दृश्यते इति अर्थसिद्धिः। सम्पत्तिपरकत्वेन तु लोके बहुधा दृश्यते एव अर्थसिद्धिः। कामप्राप्तिस्तु **तस्माद्गायन्तं स्त्रियः कामयन्ते** इति श्रुतेः। मोक्षसिद्धिश्च –

**वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः।**
**तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति** ॥[4]इति।

---

* शोधच्छात्रः, संस्कृताध्ययनविभागः, हैदराबादविश्वविद्यालयः।

♣ प्राध्यापकः, संस्कृताध्ययनविभागः, हैदराबादविश्वविद्यालयः।

1 समित्युपसर्गस्तु गीतशब्देन सह प्रयुज्यमानो गीते स्वेन आधेयातिशयाभावाद् गीतस्य अन्ययोगं द्योतयन् शब्दत्वसामान्येन वाच्यस्य तदुभयाभिव्यञ्जकत्वेन नृत्तस्य च गीतेन सम्बन्धं विशिनष्टि इति कलानिधौ कल्लिनाथः, पृ.६

2 गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते इति सङ्गीतरत्नाकरे शार्ङ्गदेवः (१.१.२१)

3 कलानिधिटीकायां कल्लिनाथः, पृ.८

4 याज्ञवल्क्यस्मृतिः ३.११५

किन्तु चरमार्थस्य प्राप्तौ को वा विचारः? कथं वा मोक्षः सिद्धः स्यात्? कीदृशश्च स मोक्षः? वस्तुतो लोके बहुधा श्रूयते शास्त्रेष्वपि दरीदृश्यते सङ्गीतसोपानेन मोक्षाधिगमचिन्ता। किन्तु सर्वं प्रायः क्षिप्रं बिन्दुरूपेणैव नेत्रपथं भजते। तत्रापि सङ्गीतरत्नाकरादयः केचन ग्रन्थाः प्राथम्यं भजन्ते। किन्तु तदपर्याप्तमिति बुद्ध्या कौतुकाद् निबन्धने इयं प्रवृत्तिः शास्त्राभिव्यक्तिप्रकटनात्मिका एव।

वक्ष्यमाणो यो मोक्षः सः अद्वैतपरक एव। तत्र प्रवृत्तस्य पुरुषस्यापि अद्वैतसिद्धान्तपराधिकारित्वमेव ग्राह्यम्। तस्मात् नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोग-विरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वं चेति अधिकारित्वे नियामकम्।[1] लोकतः अपि एतेषामुदाहरणं दृश्यते। तत्र अल्लाउद्दीनखानत्यागराजादीनां चरितात् तु नियमिता-धिकारिलक्षणाधिगमः। अपि च विशिष्टशास्त्रकारणात् तत्राधिकारवैशिष्ट्यं तु भवत्येव। तस्मात् नित्यानित्यादीनां पूर्वमपि गीतविद्यार्थित्वं तस्य साध्यम्। परमेव बोधपुरःसरं नित्यानित्यादिरूपसम्पत्तिमतः परब्रह्माधिगमनं प्रवर्तते। तथा च श्रुतिः - **नादासक्तं सदा चित्तं विषयं न हि काङ्क्षति** इति।[2]

कथमत्र ब्रह्मचिन्ता इति चेत् -

**चैतन्यं सर्वभूतानां विवृतं जगदात्मना।**
**नादब्रह्मामृतानन्दमद्वितीयमुपास्महे॥** इति।[3]

**चैतन्यं सर्वभूतानां विवृतं जगदात्मना।**
**नादब्रह्म तदानन्दमद्वितीयमुपास्महे॥** इति।[4]

---

[1] ब्रह्मसूत्रशाङ्करभाष्यम्

[2] नादबिन्दूपनिषत्, ४२

[3] नारदीयं चत्वारिंशच्छतरागनिरूपणम् ७

[4] सङ्गीतरत्नाकरः १.३.१

**अशेषभूतेषु च चित्स्वरूपं विवर्तभावेन जगत्स्वरूपम्।**
**सदेव सर्वं प्रतिभाति यत्र ब्रह्मात्मकं तं प्रणमामि नादम्॥** इत्यादयश्च।[1]

तत्र को नाम नाद इति चेत् **नामरूपात्मकप्रपञ्चव्याकरणनिदानभूतः शरीरे प्रकाशमानः परमात्मस्वरूपः** इति तुलजेन्द्रः।[2] कल्लिनाथस्तु **नादो हि स्फोटात्मना समस्तपदार्थ-प्रकाशकत्वसाधर्म्येण चैतन्यारोपविषयत्वात् चैतन्यम्** इति।[3] तत्र **णदँ - अव्यक्ते शब्दे** इति नद्-धातोर्भावे घञि सुपि नादः इति रूपम्। तेन सामान्यतो नादो नाम अव्यक्तः शब्द एव। माधवीयधातुवृत्तौ शब्दे इति अर्थे कृते नादस्य शब्दार्थो वा स्वीकार्यः।

प्रकृतशास्त्रानुगुण्येन स द्विविधः अनाहताहतभेदात्। षड्जादिस्वरा आहते एव अन्तर्यान्ति।[4] आहतानां तु इन्द्रियग्राह्यत्वात् न तेन परमार्थसिद्धिः। न च नित्यः। सर्वे एव सङ्गीतग्रन्थाः आहतपरकाः। ननु सर्वेषाम् अविद्यापरकत्वात् कथं मोक्षविचारे सन्नद्ध इति चेत् न तथा, सङ्गीतस्य लोके मुख्यत्वेन प्रयोगरूपत्वात् नात्र कदाचिद् ग्रन्थकर्तृदोषः, उक्तं च शार्ङ्गदेवेन **सोऽपि रक्तिविहीनत्वान्न मनोरञ्जको नृणाम्** इति[5] तच्छब्देन अनाहतनादः परामृष्टः। ननु प्रयोगपरशास्त्राणाम् अर्थशास्त्रादीनां प्रयोगान्त्यत्वात् तत्र मोक्षविचारस्यापि सम्बद्धत्वानवगाहित्वमिति चेत् न, त्यागराज-मुत्तुस्वामिदीक्षित-कमलाकान्तभट्टाचार्य-रामप्रसादसेनादीनाम् उपासनाङ्गत्वेन सङ्गीतस्वीकारस्य लोकतो दर्शनात्। अत्र मोक्षार्थित्वेन आगतस्य पुरुषस्य तु गीतोपासनया अन्तःकरणशुद्धिः। न खलु यशोऽर्थादिकामेन क्रियते

---

[1] सङ्गीतसुधा ९३

[2] सङ्गीतसारामृतम्, पृ.४

[3] कलानिधिटीका, पृ.३१

[4] आहतनादस्य श्रुत्यादिद्वारतोऽखिलम्॥
गेयं वितन्वतो लोकरञ्जनं भवभञ्जनम्। इति सङ्गीतरत्नाकरे १.२.१६७

[5] सङ्गीतरत्नाकरः १.२.१६५

यदिति प्रष्टव्यम्। तत्र मोक्षसम्भावना नास्ति।[1] गीतसाधनेन पण्डिते च सति अर्थादीनां स्वयं प्राप्तिस्तु लोकतो दृश्यते त्यागराजादीनाम्। किन्तु तत्र लोभादिकं नास्ति, क्वचिच्च प्रत्याख्यानमपि दृश्यते। अतो नित्यानित्यादिसाधनचतुष्टयसम्पन्नसङ्गीतविद एव मोक्षे अधिकारित्वम्। न च सङ्गीतस्य व्यसनान्तर्गतत्वं भाव्यम्। उक्तं किल मुनिना **सामभ्यो गीतम्** इति।[2] गीतं नूनं ब्राह्मी विद्या। अपि चोक्तम् अभिनवगुप्तपादैः **नाट्यमेव वेद** इति।[3] ननु सङ्गीतस्य वैदिकत्वे सिद्धेऽपि कर्मत्वात् मोक्षसाधने अनङ्गीभूतता **कर्मणा बध्यते जन्तुः** इत्यादिस्मृतेः[4] इति चेत् न, तदुक्तम् अहोबलेन–

**अग्निहोत्रं यथा कार्यं गानकार्यं तथैव हि।**
**वेदोक्तत्वात् स्मृतिप्रोक्तात् कर्तव्यत्वान्मनीषिभिः॥** इति।[5]

अपि च **योगस्थः कुरु कर्माणि** इति स्मृतेः।[6] योगोऽत्र समत्वबुद्धिः। तस्माद् भाषितं श्रीमच्छङ्करभगवत्पादैः **फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः तद्विपर्ययजा असिद्धिः तयोः सिद्ध्यसिद्ध्योः अपि समः तुल्यो भूत्वा कुरु कर्माणि** इति।[7] किञ्चाह **प्राक् ज्ञाननिष्ठाधिकारप्राप्तेः कर्मणि अधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम्** इति।[8]

---

[1] यो वित्तलोभेन सुखेन वापि हठेन वा गायति गीतमात्रम्।
स वर्तते वर्षसहस्रमीश पुरोगमः सर्वगणाग्रणीशः॥ इति पञ्चमसारसंहितायां नारदः (२.३)। तेन सुगतिस्तु दृश्यते एव।

[2] नाट्यशास्त्रम् १.१७

[3] तदेव, पृ.१४

[4] महाभारतम्, शान्तिपर्व २४१.७

[5] सङ्गीतपारिजातः, ४

[6] श्रीमद्भगवद्गीता, २.४८

[7] गीताशाङ्करभाष्यम्, पृ.६१

[8] तदेव, पृ.६०

ननु चरकादिषु सत्त्वप्रकृतिनिरूपणप्रसङ्गे यत् गान्धर्वप्रकृतिः उच्यते तत्र स्त्रीविहारकामादीनां[1] निवेशाद् गीतपरतया मोक्षाधिगमे नितरां बाधैव इति चेद् बाढं, को वा मार्गः सत्यगमनपरः निष्कण्टकः **क्षुरस्य धारा** इत्यादिश्रुतेः।[2] अत्र खलु गान्धर्वकायवतः सर्वथा तथात्त्वं स्यादिति नास्ति विपश्चिताम् आशयः। तथात्वे तु चरकादिभिर्महर्षिभिः गान्धर्वप्रकृतेः सात्त्विकप्रकृतौ अन्तर्भावो नाकरिष्यत। अपि च चरकेनैवोक्तं **मोक्षो रजस्तमोऽभावाद्** इति।[3]**सत्त्वदोषौ रजस्तमश्च** इति चरके।[4] तस्मात् राजसिकप्रकृतौ तामसप्रकृतौ तु मोक्षसम्भावना नास्तीति समयः। शुद्धे सत्त्वे मानसे एव मोक्षसम्भावनारम्भः। तदुक्तं **शुद्धसत्त्वसमाधानात्तत्सर्वमुपजायते** इति।[5] किञ्च, कफादिप्रकृतिगुणनिरूपणप्रसङ्गे कफप्रकृतिकपुरुषस्य कृते ये गुणा उक्तास्तेषां सर्वेषामेव एकस्मिन् श्लेष्मले काये सद्भावः स्यात्। न तथा शक्यं, तस्य लोकप्रतीयमानाभावात्। तस्मात् अधिकतया ब्राह्मकायवत ऋषिकायवतोऽपि वा गान्धर्वकायानुगगीतवादित्रपरायणत्वं न स्यात् इति वक्तुं न शक्यते। किमधिकमिति सत्यपि स्त्रीविहारादिमोक्षविपरीतगुणसत्त्वे नैवं शक्यं चिन्तयितुं यत् गीतेन सम्भावनैव नास्तीति। तस्मात् किल नित्यानित्यवस्त्वादिसाधनानां सन्निवेशः।

अथ तावत् यदाह नादब्रह्मेति बहुग्रन्थोद्धारपरः सन् तद् ब्रह्म किंस्वरूपकम् इत्याह **नादो हि स्फोटात्मना समस्तपदार्थप्रकाशकत्वसाधर्म्येण चैतन्यारोपविषयत्वात् चैतन्यम्** इति। स्फोटस्तु वर्णातिरिक्तः वर्णाभिव्यङ्गः अर्थाभिप्रायकः नित्यः शब्दः इति।[6] किन्तु इदं नित्यत्वं न त्रिकालाबाधितत्वम्। तस्माद् आह चैतन्यारोपविषयत्वात् चैतन्यमिति लक्षणे। सङ्गीते तु नादः परावाक्पर्यायः ब्रह्मशक्तिः। न तु वैयाकरणानाम्। नाद एव पश्यन्तीमध्यमास्थानगतः अव्यक्तः

---

[1] चरकसंहिता, शारीरस्थानम् ४.३७

[2] कठोपनिषत्, १.३.१४

[3] चरकसंहिता, शारीरस्थानम्, १.१४२

[4] तदेव, ४.३४

[5] तदेव, १.१४१

[6] सर्वदर्शनसङ्ग्रहः, पृ.५०८

शब्दः। व्यक्तः सन् वैखरीपर्यायः ध्वनिरिति विशिष्टसंज्ञां लभते।[1] तदा स एव नादः षड्जादिरूपेण विवर्तते। अतः किल शब्द इति नादपर्यायस्य स्वीकारे न दोषः। स्फोटात्मना इत्यस्य परावागात्मनेत्यर्थः। समस्तस्य जगतः पदार्थप्रकाशकः स नाद एव। प्रायशस्तु साङ्गीतका अद्वैतमेव स्वीकुर्वन्ति। अत्र प्रायपदं सङ्गीतसमयकारादीनामग्रहणार्थम्। तस्मात् सर्वे स्वरा ध्वनयश्च तस्यैव विवर्तरूपाः। न तु परिणामाः। ननु स्वरादि विहायापि जगदस्ति, न किल स्वरादिना एव जगत् इति चेद् बाढम्। तस्माद् वदामः नादस्तु सर्वत्रैव विराजमानः **परं चापरं च ब्रह्म यदोङ्कारः** इत्यादिश्रुतेः।[2] तदेव ब्रह्म परम् अपि ओङ्कारः प्रणवस्वरूपः, अपरमपि तथैव। ननु **प्रणवो धनुः** इत्यादौ **ब्रह्म तल्लक्ष्यम्** इत्युच्यते[3] तेन ब्रह्म साध्यं प्रणवश्च साधकः; अतो न भवति ओङ्कार एव ब्रह्म इति चेद् बाढम्, एनमेव प्रश्नं पुरस्कृत्य साधनप्रपञ्चम् अनुसरामः। अत्र वस्तुतः न कश्चिद् भेदः। तत्र श्रुतिद्वयमेव प्रमाणम् –

**एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।**
**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥**
**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥** इति।[4]

एतयोः ब्रह्मणः एव स्वरूपत्वेन तथा च तत्प्राप्तौ आलम्बनत्वेन स्वीकृत ओङ्कार एव। वस्तुतः अतत्त्वतोऽन्यथाभूते किं वा परभिन्नं भवेत्। तस्माद् आलम्बनमपि तदेव ब्रह्म। अपि च माण्डुक्ये **ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव** इत्यादिना[5] त्रिपादात्मकं ब्रह्म, तुरीयं च शुद्धब्रह्म इति

---

1 नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिम्॥ इति सङ्गीतरत्नाकरकृत्, १.३.४

2 प्रश्नोपनिषत्, ५.२

3 मुण्डकोपनिषत्, २.२.४

4 कठोपनिषत्, १.२.१६-१७

5 माण्डूक्योपनिषत्, १

सर्वम् ओङ्कारस्वरूपम् इति व्यक्तम्। सङ्गीतपरम्परायामपि ब्रह्मणः त्रिपादात्मकत्वं यथाशक्ति स्वीकृतम्।[1] नास्तीहात्र सन्देहलवो यत् सङ्गीतविषयिणी ब्रह्मचिन्ता तु उपनिषत्परा एवेति। किञ्च, यदुक्तं श्रीमच्छङ्करभगवत्पादैः **तस्मादेवं विद्वान् एतेनैव आत्मप्राप्तिसाधनेनैव ओङ्काराभिध्यानेन एकतरं परमपरं वा अन्वेति ब्रह्मानुगच्छति; नेदिष्ठं ह्यालम्बनमोङ्कारो ब्रह्मणः** इति[2] तद् वस्तुतो नादोपासनया एव सुलभम्। नेदिष्ठस्य अतिशयनैकट्यार्थः। नादे रुचिमत ओङ्कारालम्बनेन परब्रह्माधिगमः सुकर इति कस्य वा विमतिः। तदुक्तं संवादि-भ्रमन्यायमवलम्ब्य कल्लिनाथेन विदुषा – **परावाक्पर्यायस्य ब्रह्मशक्तेर्नादस्य ब्रह्मणोऽत्यन्त-प्रत्यासन्नत्वात्तदुपासनायां कृतायां ब्रह्मप्राप्तिर्मणिप्रभाप्रवृत्तस्य मणिलाभवद् भवेद्** इति।[3] तस्माद् मूलतः यो नाद उक्तः स किल तटस्थलक्षणकः। शुद्धं ब्रह्म तु **अशब्दम्** इति[4],

**बीजाक्षरं परं बिन्दुं नादं तस्योपरि स्थितम्।**
**सशब्दं चाक्षरे क्षीणे निःशब्दं परमं पदम्** इति[5],

यद्वा **यस्मिन् विलीयते शब्दस्तत्परं ब्रह्म गीयते** इत्यादिभिश्च[6] श्रुतिभिः प्रतिपादितम्।

अथ पूर्वप्रपञ्चपोषकत्वेन परम्परानुगुण्यप्रमाणतया च उद्ध्रीयन्तेऽत्र श्लोकाः –

**तत्र स्यात् सगुणध्यानाद्भुक्तिर्मुक्तिश्च निर्गुणात्॥**
**ध्यानमेकाग्रचित्तैकसाध्यं न सुकरं नृणाम्।**
**तस्मादत्र सुखोपायं श्रीमन्नादमनाहतम्॥**
**गुरूपदिष्टमार्गेण मुनयः समुपासते।** इति।[7]

---

[1] सूक्ष्मभूतेन्द्रियप्राणेत्यादितो (पृ.१२) रत्नाकरे प्रसङ्गतो दृश्यते।
[2] प्रश्नोपनिषद्भाष्यम्, ५.२
[3] कलानिधिटीका, ३१
[4] कठोपनिषत्, १.३.१५
[5] ध्यानबिन्दूपनिषत्, २
[6] ब्रह्मविद्योपनिषत्, १३
[7] सङ्गीतरत्नाकरः,१.२.१६३-१६५

एतावत्तु समासेन तत्त्वालोचनैव संवृत्ता। किन्तु वस्तुतः साधनप्रकारः योगत एव परम्परायां स्वीकृतः। तद्यथा सङ्गीतरत्नाकरे आदिमे मङ्गलश्लोके एव योगप्रक्रिया काचिन्निविष्टा–

**ब्रह्मग्रन्थिजमारुतानुगतिना चित्तेन हृत्पङ्कजे**
**सूरीणामनु रञ्जकः श्रुतिपदं योऽयं स्वयं राजते।**
**यस्माद्ग्रामविभागवर्णरचनालङ्कारजातिक्रमो**
**वन्दे नादतनुं तमुद्धुरजगद्गीतं मुदे शङ्करम्॥** इत्यत्र।

अस्य अर्थविस्तारः कल्लिनाथसिंहभूपालानुरोधेन एवं भवति – ब्रह्मग्रन्थिर्नाम नाभिकन्दः। सूरीणां पण्डितानां हदयपङ्कजे अनाहताश्रये द्वादशदलचक्रे नाभिकन्दतो जातस्य वायोः अनुगमनं यस्य तेन चित्तेन श्रुतिपदं प्रणवम् अनु अनन्तरम् अव्यवहितेन रञ्जकः स्वव्यतिरिक्तं स्वात्मनि अन्तर्भावयन् योऽयं आगमवेद्यः स्वयं स्वेनैव प्रकाशते। विशेषेणोक्तं कल्लिनाथेन – **साक्षात्कारे सति वृत्त्युपाध्युच्छेदे स्वस्वरूपेण नित्यं प्रकाशते** इति।[1] यस्माद् ब्रह्मणः ग्रामविभागादिक्रमः सृष्टिः भवति। अत्र कल्लिनाथस्तु **एतेन ईश्वरं प्रति नमतस्तटस्थलक्षणत्वं दर्शितम्** इति।[2] तं नादतनुं नादविग्रहं नादस्वरूपमिति यावत्। उद्धुरजगद्गीतम् उद्धटेन जगता गीतं स्तुतं शङ्करं मुदे आनन्दाय वन्दे स्तौमि। तत्र शङ्करमिति ईश्वरम् इति भूपालः। तेन तु **शं करोतीति शङ्करः निरपेक्षतया सुखदायक ईश्वर एव। अत एव सापेक्षतया सुखदायकानां राजादीनां व्युदासः** इति।[3] अत्र पुनः अङ्गुष्ठमात्रादिश्रुतेः हृदयपङ्कजे व्यापकस्यापि तस्य विशेषाभिव्यक्तिः। किञ्च, त्यागराजोऽपि प्रणमति **नादतनुमनीशं शङ्करं नमामि मे मनसा शिरसा** इति।

---

[1] कलानिधिटीका, पृ.३

[2] तदेव

[3] सुधाकरटीका, पृ.८

अत्र या यौगिकप्रक्रिया उक्तास्तास्तु योगयाज्ञवल्क्य-नादबिन्दूपनिषद्-ध्यानबिन्दूपनिषद्-ब्रह्मविद्योपनिषदादिषु अनुसन्धेया। नेदं स्थलं तद्विचारस्य।

अथो प्रस्तुते मोक्षतत्त्वविचारे निष्कर्षस्तु आहतनादादिभिः चित्तशुद्धिः, नित्यानित्यादिसम्पत्तिमतः अधिकारित्वं, तथा च अनाहतनादवर्त्मनि एव परब्रह्माधिगमः। अत्र विशिष्टतया एवं वक्तव्यं यत् भक्तिज्ञानसंवलितमार्गेणैव अस्मिन् वर्त्मनि प्रसारः। विना भक्तिं सङ्गीताधिगमासम्भवात् आदावेव बाधा। उक्तं च सङ्गीतजगद्गुरुश्रीत्यागराजपादैः–

**संगीत ज्ञानमु भक्ति विना**
**सन्मार्गमु कलदे मनसा॥**
**भृंगि नटेश समीरज घटज**
**मतंग नारदादुलुपासिञ्चे॥**
**न्यायान्यायमु तॆलुसुनु जगमुलु**
**मायामयमनि तॆलुसुनु दुर्गुण**
**कायजादि षड्-रिपुलु जयिञ्चु**
**कार्यमु तॆलुसुनु त्यागराजुनिकि॥** इति।

अस्यायमर्थः – **मनसा** हे मनः, **संगीत ज्ञानमु** सङ्गीतज्ञानं **भक्ति विना** भक्तिं विना **सन्मार्गमु कलदे** सन्मार्गं न ईश्वरप्राप्तये न सहायकं भवतीत्यर्थः। **भृंगि** स्वनामख्यात-शिवानुचरः, **नटेशः** स्वयम् ईश्वरः, **समीरज** वायुपुत्र आञ्जनेयः, **घटज** अगस्त्यः, **मतङ्गः** स्वनामख्यातो भरतमुनिपुत्रः सङ्गीतविद् मुनिः, **नारद** स्वनामप्रख्यातो देवर्षिः, तथा च **आदुलु** अन्ये **उपासिञ्चे** भक्त्या उपासितवन्तः सङ्गीतमिति वाक्यशेषः। **त्यागराजुनिकि** मम त्यागराजस्य समीपं **न्यायान्यायमु** न्यायं च अन्यायं च **तॆलुसुनु** ज्ञानविषयीभूतम्। **जगमुलु** चराचरमिदं सर्वं **मायामयमनि** मायामयम् इत्येतत् सत्यम् इति अहं त्यागराजो जाने। **दुर्गुण** दुर्गुणा ये **कायजादि**

**षड्-रिपुलु** कामादिषड्रिपवः तेषां **जयिञ्चु** जयार्थं **कार्यमु** यत् कर्म तत् जाने अहं त्यागराजः इत्यर्थः। यद्वा भक्तियुतसङ्गीतज्ञानेनैव न्यायान्यायमायावृतजगज्ज्ञानकामादि-रिपुजयरूपकर्माणि साधयितुं शक्यते इति मम त्यागराजस्य समीपं सुज्ञातमिति। अत्र तु न्यायान्यायस्थले नित्यानित्यवस्तुविवेकस्वीकारे, मायामयादिषु इहामुत्रादिस्वीकारे, कायजादिषु शमादि-सम्पतिस्वीकारे च प्रस्तुतप्रसङ्गस्वारस्यम्।

अपि च तैरेव त्यागराजैर्गीयते **नाद लोलुडै ब्रह्मानन्दमन्दवे मनसा** इति। अस्यार्थः - हे मनः नादैक्येन ब्रह्मानन्दं प्राप्नुहि इति।

वस्तुतः गीतस्य लक्ष्यैकवेद्यत्वाद् एवं विचारात्मकविश्लेषणे सत्यपि नित्यानित्यादि-साधनानां प्रयोगविषयादिकं चरितावलोकनपरं भवति सुष्ठु प्रतीयमानम्। एवञ्च साधनादीनामपि तदा बहुविस्तारो भवितुमर्हति चर्चायाम्। तस्मादिदं निश्चप्रचं यत् इदं तु आरम्भः एव। अस्मिन् प्रसङ्गे कार्यविस्ताराय सन्ति विविधा बिन्दव इत्यलमतिपल्लवितेनेति शिवम्॥

## तथ्यसूचीपरिपाटी

1. (n.d.). From अद्वैतशारदा: https://advaitasharada.sringeri.net/
2. Concordance of Pāṇinian Dhātuvṛttis. (n.d.) - From Samsaadhanii: http://scl.samsaadhanii.in/scl/dhaatupaatha/index.html
3. Sangeethapriya. (n.d.) - From http://www.sangeethapriya.org: http://www.sangeethapriya.org/tributes/thyagaraja/ThyagarajaKritis.pdf
4. Thyagaraja Vaibhavam. (n.d.) - From http://thyagaraja-vaibhavam.blogspot.com.

5. अहोबलपण्डितः, सङ्गीतपारिजातः, रावजीश्रीधरगोंधळेकरः, पुण्यपत्तनम्, १८१९ शालिवाहनशकः

6. तुलजेन्द्रभूपालः, सङ्गीतसारामृतम्, शास्त्री, पण्डित एस्. सुब्रह्मण्य (Ed.), मद्रापुरीसङ्गीतविद्वत्सभा, मद्रपुरी, १९४२

7. पण्डितजगदीशशास्त्री (Ed.), उपनिषत्संग्रहः, मोतीलाल बनारसीदास, संस्करणम् ७, २०१७

8. पण्डितदत्तात्रयकेशवजोशी (Ed.), नारदीयं चत्वारिंशच्छतरागनिरूपणम्, आर्यभूषणा, पुण्यनगरम्, १९१४

9. याज्ञवल्क्यस्मृतिः, आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम्, १९०३

10. रविशंकर नागर & के. एल. जोशी (Eds.), नाट्यशास्त्रम्, भागः १, परिमल पब्लिकेशन्स, दिल्ली, २०१२

11. वेदव्यासः, (n.d.), महाभारतम् (भागः ६), गीताप्रेस, गोरखपुरः

12. वैद्य जादवजी त्रिकामजी आचार्य (Ed.), चरकसंहिता, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१५

13. शास्त्री, पण्डित एस्. सुब्रह्मण्य (Ed.), सङ्गीतरत्नाकरः, भागः १, द अद्यर् लैब्रेरी ऍण्ड रिसर्च सेन्टर्, मद्रापुरी, १९९२

14. श्रीमद्भगवद्गीता शांकरभाष्य हिन्दी-अनुवादसहित, गीताप्रेस, गोरखपुरः, २०६६ संवत्सरः

15. श्रीमन्माधवाचार्यः, सर्वदर्शनसङ्ग्रहः, डॉ. उमाशङ्करशर्मा (Ed.), चौखम्बा विद्याभवन, २०१६, वाराणसी

16. श्रीरघुनाथभूपतिः, सङ्गीतसुधा, सुन्दरार्यः, पी. एस्. & शास्त्री, पण्डित एस्. सुब्रह्मण्य (Eds.), मद्रपुरीसङ्गीतविद्वत्सभा, मद्रपुरी, १९४०

17. श्रीशार्ङ्गदेवः, कल्लिनाथकृतकलानिधिटाकासंवलितः सङ्गीतरत्नाकरः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११

18. सिंह, ग. व. (Ed.), नारदकृतपञ्चमसारसंहिता तथा दामोदरसेनकृतसङ्गीतदामोदरः, डा. तिवारी (Trans.), मणिपुरीनर्तनालयः, कलिकाता, १९८४

19. स्वामिचिद्घनानन्दपुरी (Ed.), वेदान्तदर्शनम्, भागः १, स्वामिविश्वरूपानन्दः (Trans.) उद्बोधन, कलिकाता, 2014

❑❑❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# फक्किकाप्रकाशे लघुशब्देन्दुशेखरप्रभावः

**अनिलकुमारद्विवेदी***

**शोधसारांशः**

सर्वोऽपि मानवः साध्वसाधुशब्दान् ज्ञातुं यतते। यतः साधुशब्दप्रयोगे धर्मः, असाधुशब्दप्रयोगे अधर्मः इति प्रसिद्धिः। उक्तञ्च महाभाष्ये "एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति"[1] इति। सर्वं शास्त्रजातं व्याकरणमूलकमिति सर्वैः विदितमेव। न हि व्याकरणज्ञानमन्तरा कस्मिंश्चिदपि शास्त्रे प्रवेशः सम्भाव्यते। शब्दानां तात्त्विकज्ञानपुरस्सरम् इष्टार्थेषु तत्प्रवृत्तिमूलत्वमवबुध्यते । तथा चोक्तं भर्तृहरिणा –

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥[2]

व्याकरणपरम्परायाम् आचार्यैः पाणिनीयसूत्राणाम् उत्तरोत्तरं ग्रन्थेषु व्याख्यानं व्यधायि। प्रौढग्रन्थेषु लघुशब्देन्दुशेखरादिषु पङ्क्तीनामर्थस्य क्लिष्टत्वात् तासां पङ्क्तीनां सरलार्थबोधनम् अस्मिन् ग्रन्थे वरीवर्ति। इत्थञ्च सूत्रस्य निष्कर्षार्थः कः ? तथा च फक्किकाप्रकाशग्रन्थे लघुशब्देन्दुशेखरस्य प्रभावः कथं दरीदृश्यते इति विषयः अस्मिन् शोधे वर्ण्यते।

**प्रस्तावना**

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागेन शब्दाः अनेनेति व्याकरणम्। व्याकरणमाश्रित्यैव पदपदार्थबोधः वाक्यवाक्यार्थनिर्णयश्च जायते। अत एव षड्वपि वेदाङ्गेषु व्याकरणस्य प्राधान्यमब्रवीत् महर्षिपतञ्जलिः "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो

---

* शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

1 महाभाष्यम्, पस्पशाह्निकम्

2 वाक्यपदीयम्, ब्रह्मकाण्डम्, १३ श्लोकः

ज्ञेयश्च। प्रधानं च षड्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति"।[1] व्याकरणपरम्परायां श्रीमद्भट्टोजिदीक्षितविरचितः वैयाकरणसिद्धान्तकौमुदी इत्याख्यः ग्रन्थः सुप्रथितः। वैयाकरणसिद्धान्तकौमुद्याः पङ्क्त्यर्थबोधनाय बह्व्यः टीकाः लिखिताः। तद्यथा – वासुदेवदीक्षितविरचिता बालमनोरमा, ज्ञानेन्द्रसरस्वतीविरचिता तत्त्वबोधिनी, भट्टोजिदीक्षित-प्रणीता प्रौढमनोरमा, नागेशभट्टप्रणीतः लघुशब्देन्दुशेखरः इत्यादयः सुप्रसिद्धाः। वैयाकरणसिद्धान्तकौमुद्या एव पङ्क्तीनामर्थप्रकाशायऽऽचार्यैः फक्किकापरम्परा समारब्धा। तस्यामेव श्रेण्यां वैयाकरणसिद्धान्तकौमुद्याः दुर्बोधाः याः फक्किकाः तासामर्थप्रकाशनाय "फक्किकाप्रकाशः" इत्यमुं ग्रन्थं वैयाकरणकेसरी आचार्य इन्द्रदत्तोपाध्यायः निर्ममे। अस्मिन् ग्रन्थे लघुशब्देन्दुशेखरात् प्रौढमनोरमायाः महाभाष्याच्च तत्र तत्र विशेषांशानां समुद्धरणं संदृश्यते। तथा च क्वचित् शब्दकौस्तुभादपि समुद्धरणं व्यधायि। इत्थञ्च एकस्मिन्नेव सूत्रे अपेक्षितांशानां संग्रहो दृश्यते । विभिन्नाचार्याणां सिद्धान्तावगमाय अत्यन्तं छात्रोपयोगि ग्रन्थः।

**फक्किकाप्रकाशशब्दस्य व्युत्पत्तिः** – फक्कनीचैर्गतौ इति धातोः ण्वुलि, टापि, इत्वे च फक्किकाशब्दः निष्पद्यते। फक्किकानां प्रकाशः फक्किकाप्रकाश इति षष्ठीतत्पुरुषः समासः। फक्कति शनैः गच्छति = अवगच्छतीति फक्किका। शनैः बुद्धिगम्या इत्यर्थः। गद्यात्मकः प्रश्नोत्तररूपः कारकान्तोऽयं ग्रन्थः वरीवर्ति।

**आचार्य इन्द्रदत्तोपाध्यायः** – फक्किकाप्रकाशकार आचार्य इन्द्रदत्तोपाध्यायः स्वग्रन्थे स्वकीयं परिचयमधिकं न विलिलेख।

**गर्गवंशावतंसो यो वैय्याकरणकेसरी।**
**उपाध्यायोपनामेन्द्रदत्तस्तस्यैवसत्कृतिः ॥**[2]

अस्मात् श्लोकाज्ज्ञायते यदयमाचार्यः गर्गवंशे प्रादुर्बभूव। 'वैयाकरणकेसरी' इति अस्यविशेषणम्, पुनश्च एतस्योपनाम् 'उपाध्याय' इति। आचार्य इन्द्रदत्तोपाध्यायः

[1] महाभाष्यम्, पस्पशाह्निकम्

[2] फक्किकाप्रकाशः, २ श्लोकः

अष्टादशशताब्द्यां समजनि। तत्र प्रमाणमस्यैव कृतिः। यतोहि अस्मिन् ग्रन्थे आचार्यैः नागेशभट्टभट्टोजिदीक्षितयोर्मतानां समुद्धरणं व्यधायि। आचार्यः नागेशभट्टस्तावत्सप्तदश-शताब्द्यां सञ्जातः। तस्मात्तदुत्तरकालिक अयमाचार्य इन्द्रदत्तोपाध्यायेति सुनिश्चीयते। आचार्योऽयं मिथिलाप्रदेशीय आसीत्। अधुना फक्किकाप्रकाशे शेखरप्रभावितानां केषाञ्चन स्थलानां समुल्लेखो विधीयते – तत्रादौ परिभाषाप्रकरणे **षष्ठी स्थाने योगा**[1] इति सूत्रे कौमुदीकारः आह – "अनिर्धारितसम्बन्धविशेषा षष्ठी स्थाने योगा बोध्या" इति। यस्याः षष्ठ्याः सम्बन्धविशेषः न निर्धारितः, सा षष्ठी स्थानपदार्थनिरूपित-सम्बन्धार्थिका भवति।

**मुख्यः विषयः**

**फक्किकाप्रकाशे तावत् विषयः** – ननु **"इको यणचि"**[2] इत्यादौ अनिर्धारितषष्ठीविषये "षष्ठी स्थाने योगा" इति परिभाषायाः उपस्थितेः इकः स्थाने यण् अर्थात् इकं विनाश्य यण् स्यादिति सूत्रार्थः सम्पद्यते, तेन शब्दनित्यताहानिरित्यत आह – **स्थानं च प्रसङ्गः इति।** स्थीयते इति स्थानम्। भावे ल्युट्प्रत्ययः। स्थानशब्दस्य प्रसङ्गः इत्यर्थः। अयमर्थः कथं प्राप्यते इति चेदुच्यते – यागक्रियासु दर्भाणां स्थाने शरैः प्रस्तरितव्यम् इत्यादौ स्थानशब्दस्य प्रसङ्गः इत्यर्थदर्शनात्। प्रसङ्गश्च सति सम्भवे अर्थवतः एव, यतो हि अर्थबोधनार्थं शब्दप्रयोगः क्रियते। एवं च अच्परकस्य इकारघटितशब्दस्य अर्थबोधनाय प्रसङ्गे अच्परकः यकारघटितशब्दः प्रयोक्तव्यः इत्यर्थः पर्यवसितः। एवमेव "एरुः"[3] इत्यस्य तेस्तुः अर्थात् लोट्लकारे इकारस्य उच्चारणप्रसङ्गे उकारस्य उच्चारणं करणीयम् इत्यर्थः। स्थानशब्दस्य प्रसङ्गः इत्यर्थ स्वीकारात् न शब्दनित्यता हानिः। अयं विचारः लघुशब्देन्दुशेखरे समानतया वर्णितो वर्तते । फक्किकाप्रकाशे इतोऽपि सरलीकरणं व्यधायि।

**धातोस्तन्निमित्तस्यैव**[4] इति सूत्रेण यादिप्रत्यये परतः यादिप्रत्ययनिमित्तकस्य धात्ववयवस्य

---

[1] अष्टाध्यायी, १.१.४९

[2] तत्रैव, ६.१.७७

[3] तत्रैव, ३.४.८६

[4] तत्रैव, ६.१.८०

एचः वान्तादेशः भवति। "वान्तो यि प्रत्यये"[1] इति सूत्रेण सिद्धे अस्य नियमार्थत्वेन एवकारार्थे लब्धे किमर्थम् एव इति ग्रहणम् इति चेत् शेखरकारः वदति – यथा शुद्धनियमः भवति तथैव विपरीतनियमोऽपि सम्भवति। विपरीतनियमस्तावत् यादिप्रत्ययनिमित्तकस्य एचः वान्तादेशः तर्हि धातुसम्बन्धी एचः भवति। एतेन "बाभ्रव्यः" "माधव्यः" इति न सिध्येत। कथमिति चेत् उच्यते – मधोरपत्यं माधव्यः, बभ्रोरपत्यं बाभ्रव्यः अत्र मधु तथा च बभ्रु शब्दाभ्यां "मधुबभ्र्वो-र्ब्राह्मण-कौशिकयोः"[2] इति सूत्रेण यञ् प्रत्यये, तदनन्तरं तद्धितनिमित्तकगुणे तथा च आदिवृद्ध्यां सत्यां "माधो + य, बाभ्रो + य" इत्यस्यां स्थितौ यादिप्रत्ययनिमित्तकस्य ओकारस्य वान्तादेशः न भवति, यतो हि अयम् ओकारः धातोरवयवः नास्ति। अतः नियमेनैव एवकारार्थे लब्धे एवकारग्रहणं विपरीतनियमवारणाय तथा च इष्टनियमाय भवति इति। इष्टनियमस्तु यादिप्रत्ययनिमित्तकस्य प्रातिपदिकावयवस्य ओकारस्य वान्तादेशः इति, अनेन एते प्रयोगाः सिध्यन्ति। उदाहरणम् - लव्यम् इति। तथा हि लू इत्यस्माद्धातोः "अचो यत्"[3] इति सूत्रेण यत्प्रत्यये तथा च "सार्वधातुकार्धधातुकयोः"[4] इति सूत्रेण गुणे सति "लो + यम्" इति स्थितिः, अत्र प्रश्नः अस्यां स्थितौ "वान्तो यि प्रत्यये" इति सूत्रेण वान्तादेशः सिद्धः, पुनः अस्य सूत्रस्य का आवश्यकता ? व्यर्थं सत् नियमयति "यादि प्रत्यये परतः यदि धातोः एचः वान्तादेशः तर्हि तन्निमित्तस्यैव (यादिप्रत्ययनिमित्तस्यैव) इति। अस्य नियमस्य फलं तावत् "ओयते" इत्यत्र वर्तते। तथा हि आङ्उपसर्गपूर्वकात् वेञः कर्मणि लट्लकारे, यकि, सम्प्रसारणे, पूर्वरूपे, दीर्घे तथा च "आद्गुणः"[5] इति गुणे सति सिध्यति। आ तथा च धातोः ऊकारं मेलयित्वा गुणे ओकारः सञ्जातः, अत्र वान्तादेशः प्राप्तः, न भवति। फक्किकायां योऽयं विचारः सः शेखरेऽपि समानतया वर्णितः अस्ति। तत्र तत्र सूत्रेषु अधिकः अपि विषयः

---

[1] अष्टाध्यायी, ६.१.७९

[2] तत्रैव, ४.१.१०६

[3] तत्रैव, ३.१.९७

[4] तत्रैव, ७.३.८४

[5] तत्रैव, ६.१.८७

समुपलभ्यते। फक्किकाप्रकाशे सरलीकृत्य अर्थः निरूपितो वर्तते।

**न पदान्ताट्टोरनाम्**[1] इति सूत्रम्। सिद्धान्तकौमुद्याम् अस्य वृत्तिः – पदान्तात् टवर्गात् परस्य अनामः स्तोः ष्टुर्न स्यात् इति । अनेन सूत्रेण ष्टुत्वस्य निषेधः क्रियते। **शब्देन्दुशेखरे** विचारः – न पदान्ताट्टोरनाम् इति सूत्रस्थं "पदान्ताट्टोः" इत्यस्य स्थाने "न पदाट्टोः" इति क्रियते चेदपि कार्यं चलिष्यति। एवं न्यासे सति "टोः" इति विशेषणं "पदात्" इति पदं विशेष्यं भवति, विशेषणत्वात् तदन्तविधौ स एव अर्थः फलति। अनेन एव षट् सन्तः इत्यादि प्रयोगाः सिध्यन्ति। अतः सूत्रे अन्तग्रहणं स्पष्टार्थम्। अयं विषयः फक्किकाप्रकाशे न चर्चितः। सूत्रे "टोः" इति ग्रहणं किमर्थमिति अधुना प्रश्नः वर्तते – "ष्टुना ष्टुः"[2] इति सूत्रात् "टुः" इत्यस्य अनुवृत्तौ विभक्तिविपरिणामे च कृते "टोः" इति पदं लभ्यते। अतः "टोः" इति ग्रहणं किमर्थम् ? इति शेखरे विचारम् अकरोत्। तदुपरि फक्किकाप्रकाशे प्रश्नः क्रियते – अस्ति तावत् परिभाषा "एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः"[3] इति। तत्र वाशब्द एवकारार्थे वर्तते। परस्परान्वितार्थकपदानां सहैव प्रवृत्तिनिवृत्ती भवतः इति तदर्थः। एवञ्च एतत्प्राग्वर्तिष्टुनाष्टुः इत्यस्मात् "ष्टुना" इत्यनुवर्त्य पदान्तात् इति सामानाधिकरण्येन पञ्चमी कल्प्यते, ततश्च पदान्तात्षकारटवर्गात् स्तोः ष्टुर्न स्यादिति अर्थः संपद्यते। एवं सति सर्पिष्टमम् इत्यादौ पदान्ते षकारसत्वात् निषेधप्राप्तावपि "ह्रस्वात्तादौ तद्धिते"[4] इत्यनेन जातस्य षस्य "झलाञ्जशोऽन्ते"[5] इत्यनेन जश्त्वे रूपं सिध्यतीति न काऽप्यनुपपत्तिरिति प्रश्नः।

उत्तरति अतिशयितं सर्पिः सर्पिष्टमम् इत्यत्र पदान्ते षकारः सम्भवति, सुबन्तात् च तद्धितोत्पत्तिः भवति। अतः प्रत्ययलक्षणेन सर्पिष् इति पदम् अस्ति। पूर्वं यदुक्तं षकारस्य

---

[1] अष्टाध्यायी, ८.४.४२

[2] तत्रैव, ८.४.४१

[3] परिभाषेन्दुशेखरः, १७ परिभाषा (बालबोधिनी-चन्द्रिकाव्याख्योपोतः), श्रीपादसत्यनारायणमूर्तिः, राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपतिः।

[4] अष्टाध्यायी, ८.३.१०१

[5] तत्रैव, ८.२.३९

जश्त्वेन डकारः भवति, तत् असाधु यतो हि सर्पिष्टमम् इत्यत्र "ह्रस्वात्तादौ तद्धिते" इति षत्त्वस्य जश्त्वं प्रति असिद्धत्त्वात् जश्त्वमेव न प्रवर्तते इति। अतः एतत् वक्तुं न शक्यते यत् पदान्ते षकारस्य असम्भवात् "ष्टुना ष्टुः" इति सूत्रात् षकारः नानुवर्तते। सम्पूर्णस्य "ष्टुः" इत्यस्य अनुवृत्तौ तु सर्पिष्टमम् इति रूपं न सिध्यति। अतः सूत्रे "टोः" इति पदग्रहणं व्यधायि। एतेन षकारस्य अनुवृत्तिः न भवति। सर्पिष्टमम् इति रूपं सिध्यति।

यदि तु उच्यते "एकयोगनिर्दिष्टानाम् एकदेशोऽप्यनुवर्तते" इति परिभाषान्तरम्। एकदेशे स्वरितत्वप्रतिज्ञाबलात् लब्धमिदम्। एकत्रार्थे योगः सम्बन्धस्तेन निर्दिष्टयोः समुदायाभिधायिद्वन्द्वनिर्दिष्टयोः इति तदर्थः इति "पक्षात्तिः"[1] इति सूत्रे पञ्चमे कैयटः। अत एव "अलुगुत्तरपदे"[2] इत्येकयोगनिर्दिष्टत्वेऽपि "अलुगधिकारः प्रागानङः, उत्तरपदाधिकारस्तु प्रागङ्गाधिकाराद्" इति सङ्गच्छते। किञ्च "दामहायनान्ताच्च"[3] इत्यत्र संख्यादेरित्यनुवर्तते, अव्ययादेरिति निवृत्तम् इत्युपपद्यते। स्पष्टं चेदं "दामहायनान्ताच्च" इति सूत्रे चतुर्थे भाष्ये। एवं च ष्टुनेत्यसमस्तमेव ततोऽपि टोरेवानुवृत्तिः। तस्मात् पदान्ताट्टवर्गात् इत्येवार्थः संपद्यते। अतः सर्पिष्टमम् इत्यादौ दोषाभाव इत्युच्यते। तदा तु "टोः" इति यद्ग्रहणं कृतं तत् अदृष्टफलकमेव इति केषाञ्चन वैयाकरणानां मतम्, इति फक्किकाप्रकाशः।

**इदुदुपधस्य चाऽप्रत्ययस्य**[4] इति सूत्रस्य वृत्तिः – इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः। फक्किकाप्रकाशे विचारः "इदुदुपधस्य चाप्रत्ययस्य" इति सूत्रे इदुतावुपधे यस्य समुदायस्य तस्यावयवो यो विसर्गः इति तु नार्थः। किमर्थमिति चेत् सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्। पुनश्च अप्रत्ययो यो विसर्ग इत्यपि नार्थः। प्रत्ययविसर्गस्य अलाभात्। ननु अग्निः करोति इत्यादौ स्थानिवद्भावेन प्रत्ययविसर्गस्य लाभः, इति चेत् न विसर्गस्य स्थान्यल्-रूपरेफवृत्तिप्रत्ययत्वस्य स्थान्यल्धर्मत्वेन "अनल्विधौ" इति

---

[1] अष्टाध्यायी, ५.२.२५

[2] तत्रैव, ६.३.१

[3] तत्रैव, ४.१.२७

[4] तत्रैव, ८.३.४१

निषेधात्। तस्मात् सूत्रे प्रत्ययपदं प्रत्ययसम्बन्धिपरम्। तेन इकारोकारोपधस्य प्रत्ययसम्बन्धिभिन्नविसर्गान्तस्य षत्वं स्यादिति वर्तुले सूत्रार्थे अलोऽन्त्यपरिभाषया अन्त्यस्य षत्वे निष्कृतं दुष्कृतमित्यादि रूपाणि सिध्यन्ति। कविभिः कृतम् इत्यादौ तु न दोषः, भिसः यः विसर्गः सः प्रत्ययस्थः एव विसर्गः न तु प्रत्ययभिन्नः विसर्गः। अतः अत्र न षत्वम् इति भावः।

एवंरीत्या मातुः कार्यमित्यादावपि दोषाभावाद्भाष्ये मूले च ज्ञापनं तत्फलं चासङ्गतमिति तु न वाच्यम्। अत्र रेफस्थानिकस्य विसर्गस्य प्रत्ययत्वाभावात्। तद्यथा मातृशब्दात् ङसि "ऋत उत्"[1] इत्यनेन ऋकारस्य ङसः अकारस्य च स्थाने उत्वे रपरत्वे च "रात्सस्य"[2] इति सूत्रेण सस्य लोपे, रेफस्य विसर्गे मातुः इति रूपं सिध्यति। तत्र सकारसन्निधौ अकारे नास्ति प्रत्ययत्वम्, प्रत्ययसंज्ञायाः समुदायनिवेशिनीत्वात् इति तस्य स्थाने उरः प्रत्ययत्वाभावेन विसर्गस्य तावत् प्रत्ययसम्बन्धित्वाभावः। कैयटाचार्यस्य मते उत्वे कृते अवशिष्टः सकारः प्रत्ययसंज्ञकः सः लुप्तः एवेति भावः।

ननु "अन्तादिवच्च"[3] इत्यनेन पूर्वस्य परस्य वा समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्रत्ययादयः ते एकादेशविशिष्टस्यापि सम्भवन्ति इत्यर्थलाभात् उर्+स् इत्यत्र प्रत्ययत्वस्य सुलभत्वाद् "एकदेशविकृतमनन्यवद्"[4] इति एकदेशस्य विकारे सति अन्यत्वं नोपपद्यते इत्यर्थकेन न्यायेन उर इत्यस्य प्रत्ययतया न दोष इति न वाच्यम् । त्रिपाद्या असिद्धत्वेन तत्र "अन्तादिवच्च" इत्यस्य अप्रवृत्तेः। अस्तु स्थानिवद्भावेन तावत् प्रत्ययत्वमाश्रयामहे इति चेत्, न स्थानिवद्भावेनापि न प्रत्ययत्वम् । उपात्तः यः स्थानी अकारः तस्य प्रत्ययत्वाभावात्। प्रत्ययत्वं नास्तीत्यतः प्रत्ययसम्बन्धित्वमपि न स्थानिवद्भावलभ्यम् अशास्त्रीयत्वादिति दिक्।

एतदुक्तम् – "मातुः करोति"। अप्रत्ययस्येति षत्वं प्रसज्येत, अप्रत्ययविसर्जनीयस्येत्युच्यते

---

[1] अष्टाध्यायी, ६.१.१११

[2] तत्रैव, ८.२.२४

[3] तत्रैव, ६.१.८५

[4] परिभाषेन्दुशेखरः, ३७ परिभाषा

प्रत्ययविसर्जनीयश्चायम्, लुप्यतेऽत्र प्रत्ययो रात्सस्येति" प्रकृतोरग्रपरसूत्रयोर्भाष्ये। आचार्यैः रात्सस्य इति सूत्रे भाष्ये चर्चा अकारि यत् अप्रत्ययस्य इति षत्वं प्राप्नोति। तदा उच्यते अयं प्रत्ययस्थः विसर्गः अतः षत्वं न भवति इति चेत् न प्रत्ययस्तु रात्सस्य इत्यनेन लुप्यते। "इदुदुपधस्य चाप्रत्ययस्य" इति सूत्रस्थस्य अप्रत्ययस्य इति पदस्य प्रत्ययभिन्नस्य इत्यर्थः प्राचीनानां मते, नवीनानां मते प्रत्ययावयवभिन्नस्य इत्यर्थः।

एवं चात्र प्रत्ययभिन्नविसर्जनीयत्वात् षत्वं स्यादिति सकलमभिसन्धायाह– "एकादेशशास्त्रनिमित्तकस्य न षत्वम्" इति। अर्थात् एकादेशशास्त्रं निमित्तं यस्य विसर्गस्य तस्य विसर्गस्य षत्वं नेति भावः। अत्र दीक्षितैः प्रमाणत्वेन कस्कादिगणे पठितः भ्रातुष्पुत्रशब्दः स्वीक्रियते। तदुक्तम् – "एवं तर्हि भ्रातुष्पुत्रग्रहणं ज्ञापकम् एकादेशनिमित्तात् षत्वप्रतिषेधस्य, कथं कृत्वा ज्ञापकम्, यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तस्माज्ज्ञापयत्याचार्यः एकादेशनिमित्तात् षत्वं न भवति" इति तत्रैव भाष्ये। तथाहि यदि एकादेशशास्त्रनिमित्तकस्य विसर्गस्य षत्वम् "इदुदुपधस्य चाप्रत्ययस्य" इत्यनेन अभविष्यत्, तर्हि यथा मातुः कृपा इत्यत्र षत्वं स्यात्, तथैव "भ्रातुष्पुत्रः" इत्यत्रापि षत्वम् अभविष्यत्। पुनः भ्रातुष्पुत्रः इत्यत्र षत्वं विधातुं कस्कादिगणे अस्य पाठः किमर्थः ? व्यर्थं सत् ज्ञापयति यत् एकादेशनिमित्तात् षत्वं न भवति इति। "ऋत उद्" इत्येकादेशविधायकं शास्त्रं तद् निमित्तं प्रयोजकं यस्य विसर्गस्येत्यर्थः। विसर्गस्य एकादेशशास्त्रनिमित्तकत्वं कथमिति चेदुच्यते – विसर्गस्य एकादेशशास्त्रनिमित्तकत्वं तु एकादेशशास्त्रसम्पन्नरेफस्थानिकत्वाद् बोद्धव्यम्।

इत्थञ्च चतुर्णां सूत्राणामुपरि व्याख्यानम् अस्मिन् शोधे वरीवर्ति। सर्वत्रापि फक्किकाप्रकाशे यः विषयः वर्णितः सः लघुशब्देन्दुशेखरेऽपि चर्चितः। केचन नूत्नांशाः अपि फक्किकाप्रकाशे समुल्लिखिताः वर्तन्ते । अस्मिन् ग्रन्थे आधिक्येन शेखरप्रभावः वरीवर्ति।

❑❑❑

# भारतीयसंस्कृतौ ब्रह्मचर्याश्रमः

**सचिनद्विवेदी***

**शोधसारांशः**

विदितमेवैतत् किल महत्यविद्याकामकर्मप्रभवात्मकसंसारात् निवृत्तिकामयमानाः मनुष्याः दरीदृश्यन्ते। एतद्दोषापकर्षणाय नितरां यतमानाः यदि वर्णधर्मात् आश्रमधर्माद्वा विमुखाः भवन्ति तर्हि "पुनः पुनर्वशमापद्यते मे" इति श्रुत्यनुरीत्यास्य जगतो भवत्यनुवर्तनम्। तस्मान्मुक्तये प्रवृत्तिलक्षणाख्यो धर्मः अस्मदृषिभिः प्रणीतः यश्च वर्णाश्रमान् उद्दिश्य विहितः। अतस्तत्र भवति जिज्ञासा कस्मिन् वर्णे कस्मिंश्चिदाश्रमे कथमनुष्ठेयतेति। तदर्थं बोधायनजैमिनिबादरायणादयो नैके आचार्याः स्वस्व मतानि सयुक्तिकानि सप्रमाणानि च उपस्थापयामासुः। अस्मिंश्च शोधलेखे श्रीमद्भागवतपुराण-बोधायनस्मृति-मनुस्मृति-याज्ञवल्क्यस्मृत्यादीनां ग्रन्थानां मतावलोकनेन ऐक्यमत्यं सामरस्यं च चिकीर्ष्यते।

**प्रस्तावना**

भारतीयशास्त्रकाराणां मतानुसारं तस्यैव मनुष्यस्य जन्मसफलम् अभूत् यः स्वकीयजन्मनि धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु प्राप्तकौशलः अस्ति। आश्रमव्यवस्थायां मानवानां कर्तव्यानाम् उत्तरदायित्वं सम्मेल्यते। तदन्तरगततया च समग्रासु चतुरवस्थासु संविभाज्यते। तेषां च नामानि ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमः वर्तन्ते। प्रत्येकस्मिन् अपि आश्रमे भिन्नभिन्नकर्माणि नियमाश्च आख्यायन्ते। यैश्च मनुष्यः स्वकीयं बौद्धिकं शारीरिकम् आध्यात्मिकं विकासम् अलभत्। मनुष्यस्य प्रथमाश्रमः ब्रह्मचर्याश्रमः एतस्य अन्तर्गततया इन्द्रियाणां निग्रहपूर्वकं विद्याध्ययनेन शिक्षां प्राप्नुयात्। शिक्षां प्राप्य विवाहं विधाय जीवनस्य द्वितीयाश्रमे प्रविशेत् अर्थात् गृहस्थाश्रमे। तत्र च प्रविश्य सः स्वकीयसमाजस्य कर्तव्यं निर्वहेत् परिवारस्य कुटुम्बस्य वा यत् उत्तरदायित्वं तत्

*शोधच्छात्रः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरू।

सम्यक् रूपेण परिपालयेत्। तत्समाप्य पलितकेशाः पौत्रस्य मुखं च वीक्ष्य वने प्रविश्य कठोरं तपः आचरन् साधनैः स्वेन्द्रियाणां निग्रहे यत्नं कुर्यात्। यदा हि इन्द्रियनिग्रहः सुलभो भवति तदा जीवनस्य चतुर्थे मार्गे प्रविश्य मोक्षार्थं विहितसाधनानाम् अनुष्ठानेन सन्यासी भवेत्।

भारतीयमनुष्याणां जीवनं तावत् न केवलं भौतिकसंसाधनैः जायमानसुखेषु उद्देश्यपूर्णम् आसीत्, अपितु अध्यात्मिकोन्नतिं सम्प्राप्य जननमरणचक्रात् दूरीभवितुम् आसीत्।[1] एतादृशावस्थाम् एव मोक्षम् इत्याहुः शास्त्रविदः तत् तत्पुरुषेभ्यः विहितानि यानि आश्रमेषु कर्तव्यानि तेषां विधिवत् अनुष्ठानेन मनुष्यः चित्तशुद्धिं प्राप्नोति स्म।[2] मनुस्मृत्यनुसारेण "यः मनुष्यः आश्रमाणां यथाविधि पालनं कृत्वा होमादिकं निर्वतयन् जितेन्द्रियः सन् भिक्षाटन-बलिकर्म इत्यादिकर्मसु सदा प्रवृत्तो भवति सः मोक्षं विन्दते''।[3] महाभारतानुसारेण आश्रमव्यवस्था नाम चतुराश्रमो नाम चतुः सोपानयुक्तं लक्ष्यप्राप्तपन्थाः यः क्रमशः मनुष्यान् ब्रह्म प्रापयति। यः कश्चित् यदि तत्सोपानमारुरुक्षुः सोऽपि क्रमेण मोक्षं प्राप्य आत्यन्तिकं सुखं लभते।[4] एवं प्रकारेण ज्ञायते यत् एषा आश्रमव्यवस्था मानवस्य जीवनस्य उन्नतिं साधयितुं जीवनं नियन्त्रयितुं एका पद्धति आसीत् येन च मानवः स्वकीयं जीवनम् आनन्देन यापयन् भौतिकं च आनन्दं अनुभवति अन्ते च मोक्षं प्राप्नोति।

प्राचीनभारते आश्रमव्यवस्थायाः अवधारणा मुख्यतः सिद्धान्तद्वये आधारिता आसीत् एकं पुरुषार्थं द्वितीयं त्रिऋणञ्च। यदि कस्यचित् सम्बन्धः अवलोक्यते तर्हि आश्रमे पुरुषार्थे च अत्यन्तं घनिष्ठः सम्बन्धः आसीत्। पुरुषार्थानां पूर्णरूपेण क्रियान्वयः आश्रमव्यवस्थां विना भवितुं न अर्हति स्म। धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः मनुष्यस्य आधारस्तम्भभूताः स्थिताः यदनुसारं च मनुष्यः स्वजीवनस्य व्यवस्थां करोति स्म। ब्रह्मचर्यावस्थायां ब्रह्मचारी चारित्रिकदोषात् व्यक्तिगतदोषात् दूरं भूत्वा अनुशासितं संयमितं जीवनं यापयन् धर्मशास्त्र-

---

1 बृहदारण्यकोपनिषत्, ६/२/१५

2 बोधायनधर्मसूत्रम्, २/१०/१७/१५

3 मनु. ६/३४

4 महा भा. १२/२४२१५

शस्त्रशास्त्र इत्यादि अनेकाः विद्याः अभ्यसन् आसीत्। अस्मिन् वयसि च सः ब्रह्मचारी विद्याग्रहणसामर्थ्यम् आप्नोति, अथ च तस्य अनुभवं वा अनुसन्धातुं च समर्थः भवति तस्य मानसस्य अकालुष्यात्। अतः धर्मख्यः पुरुषार्थः कथं प्रसाधनीयः इत्याख्या बुद्धिः ब्रह्मचर्याश्रमे एव अवगम्यते स्म। अथ ब्रह्मचर्याश्रमं विधाय सः यदा गृहस्थाश्रमं प्रविशति तदा सः अर्थाख्यं कामाख्यं पुरुषार्थम् अनुभवन् तेन सह सांसारिकदायित्वम् अपि अनुभवन् जीवनं यापयति स्म। कामेन स्वानन्दः अर्थोपार्जनेन सह पारिवारिकं सामाजिकं कर्तव्यं निर्वहन्, काममाध्यमेन सन्तानोत्पत्तिं वंशोच्छेदः मा भवतु इति धिया प्रवर्तते स्म। एतत् प्रवर्तने तैत्तिरीया श्रुतिः प्रामाणिका भवति। “प्रजा च स्वाधाय प्रवचने च प्रजनश्चस्वाध्याय प्रवचने च प्रजातिश्चस्वाधाय प्रवचने च”।। अर्थे च कामे च मनुष्याणां प्रवृत्तिः स्वयमेव भवति इति कृत्वा तत्र उन्मत्तेव प्रवृत्तिः न स्यात् इति कारणात् तत्प्रति अपि नियमाः विधीयन्ते। न च एतयोः द्वयोः प्रवृत्तिः अवशिष्टेषु त्रिषु आश्रमेषु च निषिध्यते। तस्य अनन्तरं वानप्रस्थाश्रमे प्रविश्य तत्र च गृहं त्यक्त्वा वनं गत्वा इन्द्रियाणां निग्रहणं विधाय तपः प्रभावात् सांसारिकवृत्तिनां निग्रहं कृत्वा मोहमायाभ्यः दूरं भूत्वा जीवनं यापयेत्।

अस्मिन् आश्रमे मनुष्यः धर्मानुष्ठानं कुर्यात् अर्थं कामं च विहाय। अन्ते सन्यासाश्रमे प्रविष्य यत्र समस्तसांसारिकाणां विषयाणां त्यागं कृत्वा सांसारिकबन्धनात् ममत्वभावं विहाय मोक्षं प्राप्तुं यतेत। एवं च पुरुषार्थस्य यदि क्रियान्वयः करणीयः तर्हि तत्र आश्रमव्यवस्थायाः बहु महत्वम् अस्ति। आश्रमव्यवस्थायाः द्वितीयः आधारस्तम्भः भवति त्रयाणाम् ऋणानाम् अवधारणा। भारतीयानाम् ऋषीणां मुनीनां पुराणां शास्त्राणां प्रकारेण मनुष्येन त्रिभि ऋणैः सर्वदा बन्धनीयं भवति। त्रिभ्यः अपि ऋणेभ्यः तदा एव मुक्तिः भवति यदा स आश्रमाणां विधिवत् अनुष्ठानं करोति।

तानि च त्रीणि ऋणानि एवं प्रकारकाणि भवति - प्रथमं तावत् ऋषिऋणं, द्वितीयं देवऋणं, तृतीयं पितृऋणम् इति। कथमेतेभ्यः ऋणेभ्यः मुक्तिः इति आकाङ्क्षायाम् आह यदा मनुष्यः विधिवत् शास्त्राध्ययनं वेदाध्ययनं करोति स्म तदा सः ऋषिऋणात् विमुक्तो भवति स्म। एतस्य च प्राथमिकम् उद्देश्यं तावत् भवति स्म यत् ऋषिभ्यः यत् ज्ञानं प्राप्तं तस्य

अपाकरणम् इति। अत एव ब्रह्मचर्याश्रमे सः ज्ञानं लब्ध्वा वानप्रस्थाश्रमे च अन्येभ्यः ब्रह्मचर्याश्रमे विद्यमानेभ्यः जनेभ्यः वटुभ्यः विद्याम् अध्याप्य ऋषिऋणात् विमुक्तो भवति। अथ च ग्रहस्थे आश्रमे प्रविश्य यथाविधि पुत्रं च उत्पाद्य पितृऋणात् विमुक्तो भवति। अत एव पितृऋणस्य मुक्त्यर्थं गृहस्थाश्रमे प्रवेशः अनिवार्यम् आसीत् यतः सः तस्मिन् आश्रमे प्रविष्य धर्मेण प्रजाः उत्पाद्य सन्तानविच्छेदं हित्वा वंशपरम्परां च पालयन् पितृऋणात् विमुक्तो भवति स्म। महाभारतानुसारेण यः मनुष्यः त्रिभिः ऋणैः अविमुक्तः सन् यदि सन्यासं धत्ते तर्हि सः वेदविरुद्धमार्गम् उपाश्रयते।[1] मनुस्मृति-अनुसारेण यदि कश्चित् मनुष्यः त्रिभिः ऋणैः अविमुक्तः सन् यदि मोक्षार्थं यतते तर्हि सः अवश्यम् अधोगतिमेव लभते।[2]

एवं प्रकारेण आश्रमव्यवस्था प्राचीनभारतीयविज्ञानिनाम् अद्वितीयज्ञानस्य प्रतीकभूतम् आसीत्। यत्र च लौकिकस्य अलौकिकस्य धर्मस्य ज्ञानस्य त्यागस्य तपसः भोगस्य च अद्भूतरूपेणसमन्वयः आसीत्।

**आश्रमशब्दस्यार्थः**

आश्रमशब्दस्तावत् पाणिनीयधातुपाठानुसारेण श्रमु धातोः उत्पन्नः यस्य च सामान्यार्थः भवति प्रयत्नं परिश्रमः। शब्दकल्पद्रुमे अस्य शब्दस्य व्युत्पत्तिः आङ् उपसर्गपूर्वक श्रमु धातोः घञ् प्रत्यये सति निष्पद्यते। तत्र च शास्त्रोक्तधर्म विशेषः इत्यर्थः समुपलभ्यते।[3] वाल्मीकिरामायणाधारेण आश्रमशब्दः कुट्यर्थं प्रयुक्तः यत्र मनुष्यः कश्चित् तपस्वी वा तपपूर्णं जीवनं यापयति स्म सः आश्रमः।[4] पी. वी. काणे महोदयानुसारम् आश्रमशब्दस्य व्युत्पत्तिः अर्थो वा एवं भवति "आश्रम्यन्ति अस्मिन् इति आश्रमः" अर्थात् तादृशं जीवनं यत्र च मनुष्यः मुक्त्यर्थं यथेष्टं प्रयत्नं करोति स्म।[5] मनुस्मृत्यनुसारेण आश्रमव्यवस्थायाः प्रथमं प्रयोजनं यत्

---

[1] महा भा. १/११/१७२

[2] मनु. ६/३३

[3] शब्दकल्पद्रुमः

[4] वाल्मीकिरा. ३/१२/५, ३/१५/२०,२५,२६

[5] धर्मशास्त्र का इतिहास १/२६७

मनुष्यस्य जीवने कश्चित् तादृशः क्रमः आगच्छेत् येन च मनुष्यस्य सर्वाङ्गीणविकासः भवेत्। स च विकासः मुक्त्यर्थकः।[1] एवं प्रकारेण अवगम्यते यत् आश्रमव्यवस्था नाम भारतीयसंस्कृतेः अद्वितीयं वैशिष्ट्यम्। धर्मशास्त्रकाराणां दूरदर्षिता व्यावहारिकता च स्पष्टं प्रतीयते।

प्रायः सर्वैः अपि धर्मशास्त्रकारैः विशिष्टाश्रमे विद्यमानानां जनानां विशिष्टकर्मविधानार्थं कश्चित् यत्नः अवश्यम् अकारि। यस्य पालनं प्रत्येकं व्यक्तेः अनिवार्यम् आसीत्। महर्षिगौतमानुसारेण आश्रमधर्मेणहीनाः जनाः पतिताः जनाः इत्युच्यन्ते स्म एभिः व्यवहारोऽपि निषिध्यः गम्यते स्म सम्माने च अनधिकारी[2]।

**ब्रह्मचर्याश्रमः**

भारतीयधर्मशास्त्रकारैः स्वकीयस्मृतिग्रन्थेषु मानवजीवनस्य प्रारम्भावस्था या सा ब्रह्मचर्याश्रमत्वे परिगणिता। तदेव वयः ब्रह्मचर्याश्रमस्य योग्यमिति। यदा हि बालकस्य विद्याध्ययनयोग्यता सम्पद्यते तदा तस्य आश्रमव्यवस्थायाः आरम्भो भवति। ब्रह्मचर्यावस्थायाः प्राक् सर्वेऽपि संस्काराः पितृभिः अनुवर्तन्ते स्म किन्तु यदा सः गुरुकुलं प्रविशति ततः परं अग्रिमसंस्काराः तदाचार्यैः सुसंस्कृतेन तेन स्वयमपि कर्तुं शक्यन्ते स्म। अस्मिन् आश्रमे निवसन् स्वकीयशक्तिः सञ्चयन् भौतिकसुखात् दूरे भवन् संयमितम् अनुशासितं जीवन् यापयन् गुरुकुले विद्यार्थीरूपेण शिक्षां गृह्णाति। आध्यात्मिकविकासार्थम् अपि यतते। एवं प्रकारेण अयं जनः इन्द्रियसंयमेन, चरित्रनिर्माणेन, कठोरतपसा, अध्ययनेन, अनुशासनेन च स्वकीयं चारित्रिकं अनुशासिकं जीवनं निर्माति स्म। प्रयोजनञ्च एतावत् कठिनतायाः किमिति चेत् यदा हि सः ब्रह्मचर्याश्रमं समाप्य गृहस्थाश्रमे प्रविशति तदा सः तदाश्रमं सम्यक् परिपालयन् अन्याश्रमेषु सः योग्यः सम्पद्येत्। 'ब्रह्मचर्य'शब्दः शब्दद्वयस्य योजनेन उत्पन्नः ब्रह्म इत्येकं चर्यम् इत्यपरम्। ब्रह्म इति पदस्य अर्थः वेदः अथवा महान् इति पदस्य अर्थः विचरणम्।

---

[1] मनु. ६/८८

[2] गौ.ध.सू. १/९.७

किन्तु ब्रह्मचरति इति यत्र ब्रह्मचर्यम् अर्थात् यस्मिन् आश्रमे प्रविश्य मनुष्यः वेदाध्ययनादिकं करोति सः आश्रमः ब्रह्मचर्याश्रमः। गत्यर्थक-धातोः ज्ञानार्थे अन्वयः इति नियमात्।[1] एवं प्रकारेण नियमेन संयमनेन च जीवनं पालयन् वेद-वेदाङ्गानाम् अध्ययनं ब्रह्मचारिणः प्रमुखं कर्तव्य इति गम्यते स्म। एतस्य आश्रमस्य आरम्भः उपनयनात् अनन्तरं आरभ्यते स्म।[2] धर्मशास्त्रेषु त्रिभ्यः वर्णेभ्यः एव उपनयनसंस्कारस्य योग्यता प्रत्यपादि। शूद्रस्य कृते च उपनयनसंस्कारस्य निषेधः कृतः। ब्राह्मणवर्णबालकस्य उपनयनसंस्कारः गर्भात् अष्टमे क्षत्रियस्य एकादशे वैश्यस्य त्रयोदशे संस्कारः करणीयः। समानः सन्दर्भः श्रीमद्भागवत्महापुराणे एवं प्राप्यते यत् गर्भाधानादि संस्काराणां क्रमानुसारं यदा यज्ञोपवीतसंस्कारः संप्रवर्तते यदा मनुष्यस्य द्वितीयं जन्मभवति। तस्मिन् च द्वितीये जन्मनि प्रविश्य बालकः गुरुकुलं प्रविशेत्।[3] 'उपनयन'शब्दस्य सामान्यार्थः इत्युक्ते "कुमारस्य आचार्यस्य समीपं नयनम्'' इति अर्थात् तादृशं कर्म येन बालकः आचार्यस्य समीपं गच्छति। तथा च अनेन संस्कारेण सः द्वितीयं जन्म प्राप्नोति।[4] तदा एव द्विजशब्दः सार्थकताम् आप्नोति। अर्थात् संस्कारैः द्वितीयं जन्म यस्य सः द्विजः। अथवा प्रथमं जन्म मातुः गर्भात् द्वितीयं मुञ्जस्य धरणेन गुरुकुलं गर्भः सावित्री माता आचार्यश्च पिता रूपेण भवति।[5] स्मृतिकालीनः ब्रह्मचर्याश्रमः सम्पूर्णतया वैराग्ययुक्तः एवासीत्। मन्वादिस्मृतिषु विस्तारपूर्वकं तस्य वर्णनं लभ्यते। यदन्तर्गततया च उपनयनसंस्कारेण युक्तः बालकः गुरुकुलं प्रविश्य विध्यनुसारेण वेदाध्ययनं कुर्यात्।[6] ब्रह्मचारी च स्ववर्णानुसारेण चर्मसूत्रं मेखला दण्डम्

---

[1] अमरकोशः

[2] मनु. २/१७३

[3] भागवत. ११/१७/२२

[4] तत्रैव, ११/१७/२२

[5] मनु. २/२०, या.१/३९

[6] तत्रैव, २/१७३

इत्यादिकं धरेत्।[1] स च इन्द्रियनिग्रहपूर्वकं तपसः नियमान् पालयेत्।[2] नित्यकर्माणि यानि स्नानादीनि देवऋषिपितृतर्पणं देवार्चनं समिधाधानम् इति तत् श्रद्धया अनुष्ठीयात्।[3]

**ब्रह्मचारिणः निषिद्धकर्मणां वर्णनम् –**

मधुमांसानां सुगन्धिद्रव्यानां लेपनं, अतिकटु-अम्ल-मधुर-लवणादिरसयुक्तं भोजनं, मालाधारणं, स्त्रीभिः सम्बन्धः, प्राणिनां हिंसा, तैलादिना शरीरमर्दनम्, अञ्जनलेपनम्, उपानहधारणं, छत्रधारणं, कामः, क्रोधः, लोभः, नृत्यं, गानं, वादनं, द्यूतक्रीडा, वाद-विवादः अन्येषां दोषानां कथनम् असत्यभाषणं, मैथुनं, मैथुनेच्छया स्त्रियः दर्शनम्, श्वस्पर्शः वा, वीर्यस्खलनम् इत्यादि - कर्माणि ब्रह्मचारिवर्गेण कदापि न अनुष्ठेयानि। निषिद्धानि हि इमानि ब्रह्मचारिभ्यः।[4]

**गुरुं प्रति आचाराः**

गुरोः पार्श्वे यदा ब्रह्मचारी तिष्ठति तदा तेन केचन आचाराः पालनीयाः भवन्ति ते च आचाराः अधस्तात् प्रस्तूयन्ते।

गुरोः समीपे मनोबुद्धिवाक्शरीराणि च संयम्य नमस्कारमुद्रायां गुरुं पश्येत्।[5] ब्रह्म वस्त्रे च स्यात्। गुरुणा आस्यताम् इत्युक्ते सः गुरुमुखाभि सन् उपविशेत।[6] प्रतिदिनं गुरोः जागरणात् प्राक् जागरितो भवेत शयनादनन्तरमेव शयनं कुर्यात्।[7] वस्त्रभोजनादिकमपि गुरोः अपेक्षया न्यूनं स्वीकुर्यात्।[8] स च ब्रह्मचारी गुरोः अनुगमनं कुर्यात्। गुरोः प्रतिश्रवणम् उत्थाय

---

[1] मनु. २/१७४

[2] तत्रैव, २/१७५

[3] तत्रैव, २/१७६

[4] तत्रैव, २/१७७-१८०, या.१/३३

[5] तत्रैव, २/१९२

[6] तत्रैव, २/१९३

[7] तत्रैव, २/१९४

[8] तत्रैव, २/१९६,१९७

एव कुर्यात्। गुरोः प्रतिश्रवणं तस्य अभिमुखः सन् एव कुर्यात् न तु प्रतिमुखः तन्निषिध्यते। गुरुणा सह सम्भाषणम् अत्यन्तं विनयपूर्वकं कुर्यात्। शिष्यस्य आसनं शय्या वा गुरोः अपेक्षया निम्नस्तरे एव भवेत्।[1] गुरोः नामोच्चारणं न कुर्यात् तथा च सर्वकार्याणाम् अनुसरणम् अपि न कुर्यात्।[2] गुरोः दोषमपि न श्रूयेत्।[3] एवं प्रकारकाणि हि गुरोः प्रतिषिध्यस्य आचरणानि स्मृत्यादिग्रन्थेषु वर्णितानि।

तथा विधानि हि ब्रह्मचारिभ्यः भिक्षा, आचमनम्, भोजनस्य नियमः, वेदाध्ययनस्य विधिः, गुरुवन्दनविधिः, प्राणायामः, सावित्रीजपः, अग्निकार्यम्। शौचाचाराः, इन्द्रियसंयमाः, सन्ध्योपासनम्, अभिवादनम्, नित्यनैमित्तिकं कर्म, इत्यादि अनेके विधयः श्रूयन्ते येषां च अनुष्ठानेन ब्रह्मचारी कृतकृत्यो भवति।

श्रीमद्भागवतमहापुराणान्तर्गततया ब्रह्मचर्याश्रमस्य वर्णनं सप्तमे स्कन्धे तथा च एकादशे स्कन्धे प्राप्यते। यत्र ब्रह्मचारिणः मुख्यः धर्मः आचार्यस्य सेवा इति प्रतिपादितम्।[4] इन्द्रयाणां निग्रहं कुर्वन् गुरुकुले निवसेत्। तथा गुरुचरणारविन्दयोः अनुरागं स्थापयेत् तथा च गुरुहितम् एव कार्यम् अनुष्ठीयात्।[5] गुरुकुले वसन् सन् वेदवेदाङ्ग-उपनिषदादीनां सम्यक् अध्ययनं कुर्यात्।[6] सायंकाले प्रातश्च गुरुं सूर्यम् अग्निम् एव विशिष्टदेवताः अपि आराधयेत्। तथा च उभयसन्ध्यासु मौनेन एकाग्रचित्तेन सन्ध्योपासन-अङ्गतया गायत्रीछन्दोबद्धं सवितृदेवतात्मकं मन्त्रं जपेत्।[7] गुरोः आह्वानकाले अध्ययनं कुर्यात्। अध्यनारम्भे अन्ते च गुरोः

---

[1] मनु. २/१९८
[2] तत्रैव, २/१९९
[3] तत्रैव, २/२००
[4] भागवत. ११/१८/४२
[5] तत्रैव, ७/१२/१
[6] तत्रैव, ७/१२/१३, ११/१७/२२
[7] तत्रैव, ७/१२/२, ११/१७/२६

नमस्कारं कुर्यात्।[1] ब्रह्मचारी मेखला, कमण्डलं, मृगचर्म वस्त्रं, जटां, दण्डं, यज्ञोपवीतं तथा हस्ते कुशं धरेत्।[2] सायंकाले प्रातः काले च भिक्षाटनं कुर्यात्, तच्च सर्वं गुरवे निवेदयेत्। आज्ञानुसारेण एव हि भिक्षां गृह्णीयात्, यदि आज्ञा नास्ति तर्हि भोजनं विना एव वसेत्।[3] शीलादिगुणानां पालनं कुर्यात्, अल्पाहारी भवेत्, श्रद्धावान् स्यात्, जितेन्द्रियः स्यात्, स्त्रीवर्गे ये वसन्ति तै सह, पुनः स्त्रीवर्गे च आवश्यकतानुसारमेव हि व्यवहारं कुर्यात्।[4] सः ब्रह्मचारी निरीक्षणात्मकदृष्ट्या स्त्रियः दर्शनं स्पर्शः वार्तालापः, मिथुनवन्तौ पुरुषौ न पश्येत्, तत्र दृष्टपातमपि न कुर्यात्।[5] बलपूर्वकं स्वकीयेषु इन्द्रियेषु संयमं विदध्यात्।[6] पुमान् ब्रह्मचारी गुरुपत्न्याः सद्भावे स्वकीयकेशप्रसाधनम् अथ च शरीरस्य मर्दनम् अङ्गेषु लेपनादिकं न कुर्यात्, अभावे तु यथा समयं यथा अपेक्षाबुद्धिद्वारा व्यवहरेत्।[7] एतत् प्रति इदं कारणं भवति यावत् पर्यन्तम् अहं पुमान् सा स्त्री इत्याकारकभावः द्वैतप्रपञ्चः वर्तते एव। अतः यदि पुरुषाः स्त्री संसर्गे भवन्ति तर्हि तावत् पर्यन्तं तेषां भोग्यविषयिणी बुद्धि अनुवर्तते एव।[8] ब्रह्मचारिणः अङ्गेषु सौन्दर्यप्रसाधनस्य लेपनं स्त्रियः चित्र निर्माणं, मधुमांसादिभक्षणं, सुगन्धद्रव्योपयोगः, गुप्तेन्द्रियाणां केषकर्तनं नखकर्तनादिकं च निषिद्धं कर्म।[9] ब्रह्मचारी स्वप्रयत्नेन वीर्यस्खलनं न कुर्यात् यदि जातं तर्हि स्नानं कृत्वा प्राणायामं विधाय गायत्रीजपं कुर्यात्।[10] अग्निगुरुसर्वप्राणिषु

---

1 भागवत. ७/१२/३
2 तत्रैव, ७/१२/४, ११/१७/२३
3 तत्रैव, ७/१२/५, ११/१७/२८
4 तत्रैव, ७/१२/६
5 तत्रैव, ११/१२/५३
6 तत्रैव, ७/१२/७
7 तत्रैव, ७/१२/८,९
8 तत्रैव, ७/१२/१०
9 तत्रैव, ७/१२/१२, ११/१७/२४
10 तत्रैव, ११/१७/२५

ईश्वरदर्शनेन तत्र च स्वात्मत्वं पश्यन् यदि जीवति तर्हि सः सकलपापात् प्रमुच्यते।[1] आचार्यः अथवा गुरुः सर्व देवमयो भवति, स च देवतुल्यः भवति। आचार्यस्य अनुगमनं तस्य शुश्रूषा च ब्रह्मचारिणः मुख्यं कर्म।[2] यदि ब्रह्मचारिणः तत्काले एव उत्पन्ना ब्रह्मविषयक जिज्ञासा तर्हि सः आजीवनं ब्रह्मचारी भवितुम् अर्हति।[3] शौचम्, आचमनं, स्नानं, सन्ध्योपासनं, स्वभावसरलता, तीर्थसेवा, जपः, तपः, मनसः वाण्याः संयमः, अस्पृश्यवस्तूनां अस्पर्शः, भक्ष्याभक्ष्यविचारः, वाणी प्रयोगे विवेकः इमे सर्वेऽपि आचाराः ब्रह्मचारिवर्गं मिलित्वा सर्वेभ्यः वर्गेभ्यः सर्वेभ्यश्च आश्रमेभ्य आचारत्वेन चोदिताः।[4] गुरुदक्षिणा विषये च श्रूयते यत् यदि शिष्यः सामर्थ्यवान् तर्हि गुरोः अनुकूलं दक्षिणां दद्यात्।[5]

एवं च श्रीमद्भागवतमहापुराणावलोकनेन मनुयाज्ञवल्क्यस्मृत्यवलोकनेन च इदमवगम्यते यत् उभयत्रापि ब्रह्मचर्याश्रमस्य विषये समाना व्यवस्था समुपलभ्यते अथ च ब्रह्मचारिणः आश्रमस्य विषयसौक्ष्मेण अध्ययनेन इदम् अवगम्यते यत् - ब्रह्मचारिणः प्रमुखोद्देश्यं तु गुरुकुले भूत्वा वेदादिसकलविद्याः अध्ययनं कुर्वन् आश्रमस्य विविधक्रियाकलापेषु च भागं गृह्णन् व्यावहारिकं ज्ञानं प्राप्नुयात्। भिक्षाटनेन अन्येषु विषयेषु अहङ्कारेषु च विजयं प्राप्नुवन् विनयादिगुणैः सुसम्पन्नो भवेत्। निषिद्धकर्मणां परित्यागं कुर्यात्। मनः एकाग्रं भवेत्। बाह्यविषयेषु च अनासक्तबुद्धिः स्यात्। एवं रूपेण हि ब्रह्मचारी स्वकीयं विकासं कर्तुं शक्नोति इति।

❑❑❑

---

1 भागवत. ७/१२/१५, ११/१७/३२

2 तत्रैव, ११/१७/२७-२९

3 तत्रैव, ११/१७/३१

4 तत्रैव, ११/१७/३४-३५

5 तत्रैव, ७/१२/१४, ११/१७/३४

5 मनु. ३/४०५

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२० **सम्पुटम् :** संयुक्तम् (१,२)

# प्रत्ययेषु इत्संज्ञायाः फलम्

**हरिपदवेरा***

पदं प्रकृतिप्रत्ययसंयोगेनैव सिद्ध्यति। पदस्यैव लोके प्रयोगार्हत्वम् "अपदं न प्रयूञ्जीत" इत्युक्तत्वात्। किञ्च "एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयूक्तः स्वर्गे लोके कामधूग्भवति"[1] इति श्रुतिरप्यत्र मानम्। यतोहि अर्थज्ञानाय पदप्रवृत्तिः। प्रकृतिप्रत्यययोः मध्ये प्रत्येकस्य अर्थः विद्यतेऽथापि इष्टार्थसिद्धिस्तु प्रकृतिप्रत्यययुक्तस्य पदस्य प्रयोगेणैव इति तु निश्चप्रचम्।

प्रतीयते विधीयते इति प्रत्ययः इति "अणुदित्सवर्णस्य चाप्रत्ययः"(१/१/६९) सूत्रे कथयति। "प्रत्ययः"(३/१/१) इति तृतीयाध्यायस्यादिमं सूत्रमिदम्। इतः ऊर्धमापञ्चमाध्यायस्य परिसमाप्तेः प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते। "परश्च"(३/१/२) अयमपि योगः आपञ्चपरिसमाप्तेः अधिकारः। प्रकृतेः परः प्रत्ययः प्रवर्तत इत्यर्थः।

**पाणिनीयानुसारेण प्रत्ययपदनिर्वचनम् –**

पाणिनिना प्रत्यतत्वेन कल्पितानां सनादीनां चतुश्शतादधिकानां पदांशानां प्रत्ययसंज्ञासिद्ध्यर्थं "प्रत्ययः"[2] इत्याधिकारसूत्रं कृतम्। एतच्च "गुप्तिज्किद्भ्यः सन्"[3] इत्यादयुत्तरसूत्रैः एकवाक्यतामापद्य तद्विहिकानां सनादीनां प्रत्ययसंज्ञां विधत्ते। इयं च अन्वर्थसंज्ञा। तथाहि प्रतीत्युपसर्गपूर्वकात् इण् धातोःअन्तर्भावितण्यर्थात् कर्तरि कर्मणि च 'अच्' प्रत्यये कृते निष्पन्नयोःप्रत्ययशब्दयोः अत्र तन्त्रेण निर्देशः। अत एव "प्रत्ययः"

---

*शोधच्छात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[1] व्य.म.भा. ३.३.१

[2] अष्टाध्यायी ३.१.१

[3] तत्रैव, ३.१.५

(३/१/१) इति सूत्रेभाष्ये प्रत्यययतीति प्रत्ययः, प्रत्याय्यते इति प्रत्ययः उभयसाधनोऽयम् इत्याशयः प्रकटितः।[1]

तत्र कर्तृप्रत्ययान्तेन प्रत्ययशब्देन स्वार्थप्रत्यायकानाम् इच्छार्थकसनादीनाम्, कर्मप्रत्ययान्तेन प्रत्ययशब्देन प्रकृत्या प्रत्यय्यमानार्थकानाम् अत्यन्तस्वार्थिक**कन्** प्रभृतीनां च ग्रहणम्। "प्रत्ययः" इति अधिकारान्तर्गतसूत्रैः विहितानामपि षुक् इत्याद्यागमानाम्, श्न-इत्याद्यादेशानां च न प्रत्ययसंज्ञा। प्रकृति-प्रत्यययोरिव आगमानाम् अर्थवत्वस्य शास्त्रकृद्भिः अपूर्वोपदेशत्वाभावेन प्राधान्याभावात् प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः इति न्यायेन न प्रत्ययसंज्ञा।

एवं च – एतदधिकारान्तर्गतसूत्रविहितानाम् आगम-आदेशादिभिन्नानां प्रत्ययत्वेन अभिमतानां सनादीनामेव प्रत्ययसंज्ञा भवति इति सिद्धम्। तथा च प्रत्ययशब्दः, प्रत्ययाधिकारविहितः आगम-आदेशभिन्नः स्व-स्वप्रकृत्यन्यतरार्थप्रत्यायकः यः पदावयवः तमेव योगरूढिशक्त्या बोधयति – इति सिद्धम्।

तथा च – प्रत्ययाधिकारस्थशास्त्रविहितत्वे सति, आगमादेशभिन्नत्वे सति, स्वस्वप्रकृत्यन्यतारार्थप्रत्यायकत्वं पाणिनीयसर्वप्रत्ययसङ्ग्रहकं लक्षणं भवति।

**शब्दशक्तिप्रकाशिकोक्तोप्रत्ययलक्षणम् –**

'शब्दान्तरमपेक्ष्यैव स्वार्थबोधकृत् सार्थकः शब्द – **प्रकृतिः, प्रत्ययः, निपातः,** इति त्रेधा' इत्युक्त्वा 'यादृशार्थकप्रकृतिनिपातभिन्न यादृशांर्थे शक्तिनिरूढलक्षणान्यतरात्मक-प्रशस्तवृत्तिमान् यादृशः शब्दः सः तादृशार्थकः प्रत्ययः' इत्युक्तं शब्दशक्तिप्रकाशिकायाम्।[2]

सुप्तिङादयः प्रत्ययाः शक्त्या वा निरूढलक्षणया वा कर्तृकर्मद्यर्थप्रतिपादिकाः प्रकृतिनिपातभिन्नाश्चेति तेषां प्रत्ययत्वम्। 'शुक्ल' प्रभृतिशब्दानां 'स्था' प्रभृतिधातूनां 'च'

---

[1] व्य.म.भा.तृ.ख., पृ.६,७

[2] श.प्र., पृ.२९

प्रभृतिशब्दानां च शक्ति-निरूढलक्षणान्यतरवृत्तिद्वारा अर्थबोधकत्वेऽपि प्रकृतिनिपात-भिन्नत्वाभावात् न प्रत्ययत्वम् - इति तद्ग्रन्थस्य सारः ।[1]

एवं तत्रैव, यः शब्दः शब्दान्तरार्थाविशेषिते यादृशस्वार्थे विशेष्ये तिङर्थस्य अन्ययबोधने असमर्थः यः निभाद्यन्यः, सःप्रत्ययः ।

**एवमन्यैः कैश्चित् उक्तस्य प्रत्ययलक्षणम् –**

यः शब्दः (प्रत्ययत्वेन अभिमतः पदांशः) स्वतरार्थाविशेषितस्वार्थस्य अन्यत्र विशेषणतया अन्वयबोधजनने असमर्थः, सः प्रत्ययः। 'पाचक-दाशरथिप्रभृतिषु कृत्तद्धितान्तेषु कृत्-तद्धितार्थः कृत्-तद्धितेतर-स्वप्रकृत्यर्थ-विशेषितस्सन्नेव अन्यत्र विभक्त्यर्थादिषु प्रकारतया अन्वेतुं प्रभवतीति तेषां प्रत्ययत्वम्' इति।

तथा च अर्थपुरस्कारेण शब्दानां निर्वचनमिति प्रसिद्धमेतत्। विना ह्यर्थं न कोऽपि शब्दः साधुरसाधुर्वा न ज्ञायते। यथा अस्वशब्दो निर्धने साधुः अश्वेत्वसाधुः। एवं सर्वत्र अर्थ पुरस्कृत्य प्रत्ययाः विधीयन्ते। एवञ्च प्रत्ययोऽर्थस्य प्रत्यायक इत्यत्र नास्ति संशयलेशः।

**प्रत्ययप्रकाराः -**

“प्रत्ययः” इत्याधिकारसूत्रेण येषां सनादीनां प्रत्ययसंज्ञा विहिता ते पञ्चधा विभज्यन्ते। तद्यथा –

१. विभक्तिप्रत्ययाः
२. धात्वंशप्रत्ययाः
३. तद्धितप्रत्ययाः
४. कृत्प्रत्ययाः
५. स्त्रीप्रत्ययाः

---

[1] श.प्र., पृ.२९

प्रसङ्गेऽस्मिन् आचार्याः जगदीशतर्कालङ्कारा आहुः -

**विभक्तिश्चैव धात्वंशस्तद्धितः कृदिति क्रमात्।**
**चतुर्धा प्रत्ययः प्रोक्तः टाबादिभिः पञ्चधाऽथवा।।** इति।

एकैकशः प्रत्येकं प्रकारः प्रतिपाद्यते अधः।

**विभक्तिप्रत्ययाः**

"विभक्तिश्च"(१/४/१०४) इत्यनेन हि सूत्रेण येषां विभक्तिसंज्ञा विधीयते ते एव विभक्तिसंज्ञकप्रत्ययाः भवन्ति। तथा चात्र विभक्तिपदेन एकविंशति सुप्प्रत्ययाः तथा च अष्टादश तिङ्प्रत्ययाः गृह्यन्ते। एतेषु प्रत्ययेषु इत्संज्ञाप्रयोजनविचारः अधः क्रियते।

**धात्वंशप्रत्ययाः**

"प्रत्ययः" इत्याधिकारे पठितेभ्यः विभक्तिकृत्तद्धितस्त्रीप्रत्ययेभ्यो अतिरिक्ताः प्रत्ययाः धात्वंशप्रत्ययाः भवन्ति। एते धात्वंशप्रत्ययाः सनादयः द्वादशसङ्ख्यकास्सन्ति । तद्यथा–

**सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाचारक्विब्णिज्यङौ तथा।**
**यगाय – ईयङ्- चेति द्वादशामी सनादयः ॥**[1]

**तद्धितप्रत्ययाः**

पाणिनीयाष्टाध्याय्यां "तद्धिताः" (४/१/७६) इत्यधिकारसूत्रं कृत्वा "यूनस्तिः" (४/१/७७) इति तिप्रत्ययात् आरभ्य "शेषाद्विभाषा" (५/४/१५४) इति कप्प्रत्ययपर्यन्तं सार्धशतद्वयाधिकाः प्रत्ययाः विहिताः एते एव तद्धितसंज्ञकाः भवन्ति। इतरप्रत्ययसङ्ख्यापेक्षया तद्धितप्रत्ययसङ्ख्या अत्यन्तं गरीयसीति।

---

[1] वैयाकरणसिद्धान्तकौमुद्याः बालमनोरमाटीका, पृ.११२

**कृत्प्रत्ययाः**

"धातोः" (३/१/९१) इत्यधिकारे धातोः विधीयमानेषु प्रत्ययेषु "कृदतिङ्" (३/१/९३) इत्यनेन सूत्रेण विहिताः तिङ्प्रत्ययभिन्नाः प्रत्ययाः कृत्प्रत्ययाः भवन्ति। एते कृत्प्रत्ययाः प्रामुख्येन दशोत्तरशतसङ्ख्याकाः भवन्ति। किञ्च "उणादयो बहुलम्" (३/३/१) इति सूत्रानुसारेण उणादयः प्रत्ययाः अपि कृत्संज्ञकाः भवन्ति।

**स्त्रीप्रत्ययाः**

"स्त्रियाम्" (४/१/३) इत्यधिकारे प्रोक्ताः सर्वे टाबादयः प्रत्ययाः स्त्रीप्रत्ययत्त्वेन गृह्यन्ते। अधिकारेऽस्मिन् टाप्, चाप्, डाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति - इति भेदेन आहत्य अष्टौ प्रत्ययाः पाठिताः।

साम्प्रतम् विभक्तिप्रत्ययेषु इत्संज्ञाप्रयोजनविचारः स्थालीपूलाकन्यायेन प्रदर्श्यते। तद्यथा –

**प्रत्ययेषु इत्संज्ञाफलम्**

समान्येन प्रतिप्रत्ययमनुबन्धसन्निवेशो भवति। तथापि र, असे, इत्र, अ, उ, च्लि, तवै, तव्य, वु, से, स्य इत्येतेषाम् अनुबन्धाः न भवन्ति। कारणम् एतेषु इत्संज्ञकवर्णप्रयुक्त-कार्याभावः इति। इतरेषु प्रत्ययेष्वित्संज्ञकवर्णा भवन्ति। अतः इत्संज्ञाया फलं तत्तत्प्रत्ययेषु समान्यतो निरूप्यते। तद्यथा–

**उगित्फलम्–** "उगिदचां सर्वनामस्थानेऽधातोः"(७/१/७०) इति नुमागमः उगित्वफलम्। क्वसु शत्रादिप्रत्ययः उगित्प्रदेशाः भवन्ति।

**कित्फलम्-** "क्ङिति च"(१/१/५) इति सूत्रेण गुणवृद्धिनिषेधः, "आतो लोप इटि च"(६/४/६४) इति सूत्रेण आलोपश्च कित्वफलम्।

**खित्फलम् -** "अरुर्द्विषदजन्तस्य मुम्"(६/३/६७) इति सूत्रेण मुमागमः भवति खित्वफलम्। खश, खच्, ख्युन्, खिष्णुच्, खुकञ् इत्यादयः खित्प्रदेशाः भवन्ति।

**घित्फलम् -** “चजोः कु घिण्यतोः”(७/३/५२) इति कुत्वम्, “छादेर्घेऽद्व्युपसर्गस्य”(६/४/९६) इत्यत्र विशेषणार्थश्च घित्फलम्। घ, घञ्, घिनुण्, घुरच् इत्यादयः भवन्ति घित्प्रदेशाः।

**ङित्फलम् -** “अनुदात्तङित आत्मनेपदम्”(१/३/१२) इत्यात्मनेपदम्, “क्ङिति च”(१/१/५) इति सूत्रेण गुणवृद्धिनिषेधः ङित्वफलम्। ङित्प्रदेशाः क्यङ्, यङ्, ईयङ्, चङ्, अङ्, नङ्, इत्यादायः भवन्ति।

**चित्फलिम् -** “चितः”(६/१/१६३) इति सूत्रिण इत्याद्युदात्तः एव चित्वफलम्। क्यच्, काम्यच्, णिच्, सिच् इत्यादयः चित्प्रदेशाः भवन्ति।

**ञित्फलम् -** वुञ्, उकञ्, घञ्, इञ्, खुकञ्, वुञ्, इत्यादयो ञित्प्रदेशाः। एतेषु प्रदेशेषु “ञ्नित्यादिर्नित्यम् इत्याद्युदात्तः”(६/१/१९७), “तद्धितेष्वचामादेः”(७/२/११७), “अचो ञ्णिति”(७/२/११५), “अत उपधायाः”७/२/११६ इत्यादिभिस्सूत्रैर्यथायोगं वृद्धिः ञित्वफलम्।

**टित्फलम्-** “टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः”(४/१/१५) इति ङीप्, “विड्वनोरनुनासिकस्यात्”(६/४/४१) इत्यात्वम्, “टेः”(६/४/१४३) इति टिलोपश्च अस्य प्रयोजनम्। ट, टक्, विट्, ण्युट् इत्यादयष्टित्प्रदेशाः इति।

**डित्फलम् -** “टेः”(६/४/१४३) इति ङित्वसामर्थ्यादभस्यापि टेर्लोपः डित्वस्य फलम्। यथा डु प्रत्ययः।

**तित्फलम् -** “तित्स्वरितम्”(६/१/१८५) इति स्वरितत्वम् अस्य प्रयोजनम्। तव्यदादयस्तित्प्रदेशाः इति।

**णित्फलम्** - "अचो ञ्णिति"(७/२/११५) इति, "अत उपधायाः"(७/२/११६) इति च सूत्राभ्यां यथायोगं वृद्धिः, "आतो युक्चिण्कृतोः"(७/३/३३) इति युगागमश्च णित्वफलम्। चिण्, ण्वच्, ण्युट् इत्यादयो णित्प्रदेशाः भवन्ति।

**नित्फलम्** - "ञ्नित्यादिर्नित्यम्"(६/१/१९७) इत्याद्युदात्तः अस्य प्रयोजनम्। यथा- श्यन् प्रत्यये।

**पित्फलम्** - "अनुदात्तौ सुप्पितौ"(३/१/४) इत्यनुदात्तत्वम् अस्य प्रयोजनम्। तिप्, सिप्, मिप्, इत्यादयः पित्प्रदेशाः भवन्ति।

**मित्फलम्** - "मिदचोऽन्त्यात्परः"(१/१/४७) इत्यन्त्यादचः परत्वम्। यथा- श्यन् प्रत्यये।

**रित्फलम्** - "उपोत्तमं रिति"(६/१/२१७) इति सूत्रेण मध्योदात्तः रित्वस्य फलम्। यथा- अनीयर् प्रत्यये।

**लित्फलम्** - "लिति"(६/१/१९३) इति सूत्रेण प्रत्ययात्पूर्वमुदात्तत्वं लित्वफलम्। यथा- ण्वुल् प्रत्यये।

**शित्फलम्** - "तिङ्शित्सार्वधातुकम्"(३/४/११३) इति सार्वधातुकत्वम्। यथा- शबादयः।

**षित्फलम्** - "षिद्गौरादिभ्यश्च"(४/१/४१) इति सूत्रेण ङीष् षित्वफलम्। ष्ट्रन्, ष्वुन्, षाकन्, इत्यादयः षित्प्रदेशाः भवन्ति।

**सर्वलोपिप्रत्ययाः** – एषाम्प्रत्ययानां सर्वात्मना लोपो भवति ते सर्वलोपिप्रत्ययाः भवन्ति। तेषां सर्वलोपित्रत्ययानां तु "कृत्तद्धितसमासाश्च"(१/२/४६) इति सूत्रेण प्रातिपदिकसंज्ञा मुख्यम्प्रयोजनम्। क्विन्, क्विप्, ण्वि, विट् इत्यादयः सर्वलोपिप्रत्ययाः भवन्ति।

**गुरोरनुग्रहो मूलम्**

यद्यत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे न हि।
यद्यत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि॥

## परिशीलितग्रन्थसूची

१. अष्टाध्यायी - पाणिनिः, व्याख्याकारः डा. नरेश झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी

२. काशिकावृत्तिः वामनजयादित्यविरचिता - व्याख्याकारः डा. रघुवीरवेदालंकारः, राधा प्रेस, दिल्ली

३. काशिकावृत्तिः न्यासपदमञ्जरीसहीता (तृ.च.भागौ) - जयादित्यवामनौ, सुधी-प्रकाशनम्, वाराणसी, १९८४

४. वैयाकरणसिद्धान्तकौमुदी तत्त्वबोधिनीव्याख्यासंवलिता

५. व्याकरणमहाभाष्यम् - (द्वितीयखण्डः) - सम्पादकः डा. आत्मदेवमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी

६. शब्दशक्तिप्रकाशिका जगदीशतर्कालंकारभट्टाचार्यकृता - Published by Jayakrishnadas, Haridas Gupta, The Chaukhamba Sanskrit Series Office, Benaras City, 1934

❑❑❑

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी – डिसेम्बर २०२०        सम्पुटम् : संयुक्तम् (१,२)
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# Implementing and evaluation of Computer based speechification for Sanskrit Text Corpus

**Dr. B. Chandrasekharam***

**Abstract:** National Sanskrit University has created a rich Sanskrit text corpus with search tools and made it available at http://sansknet.ac.in. To enhance and extend the functionality of the website it is thought of integrating speechification facility with the website. Hence a study was undertaken to identify evaluate existing python based open source modules. This paper discusses implementation of Speechification/TTS system for Sanskrit Text Corpus using python modules developed by various institutions/individuals under different projects. This paper also evaluates tangibility, nativity, roboticness of speechified output produced by employing various modules developed using Likert Scale and made available at http://pypi.org. Python Package Index (PyPI) is a repository of software for the Python programming language[1]. This paper selectively considered to employ and evaluate python packages: sanskrit_tts, nltk, inltkgTTS, pyTTS, after thoroughtly surveying the available NLP, Text to Speech related python packages.

**Keywords:** TTS, Speechification, Sanskrit Text Corpus, NLTK, inltk, sanskrit_tts, pyTTSLikert Scale

## 1. Introduction

Rashtirya Sanskrit Vidyapeetha, Tirupatin now known as National Sanskrit University created a rich digitized rare Sanskrit text corpus in

* Associate Professor, Dept. of Computer Science, National Sanskrit University, Tirupati

[1] https://pypi.org/, a repository of software for the Python programming language.
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

ASCII format and made it available on internet at web link http://sansknet.ac.in/p[2]. This web resource maintained by National Sanskrit University provides access to more than six lakh electronic pages, which were created by data entry operators using traditional data entry methods on GIST terminals, covering many areas of Sanskrit Literature. An electronic page is considered to have 2000 key strokes. With the shift to online medium during the pandemic, and the gradual build-up to the digital world of the 21st century, the process of digitalization has transformed countries.Enabling institutions and transforming processes to the digital medium constitutes digitalization. Sanskrit University authorities felt a strong need for providing Sanskrit Digital Learning/Text Resources to its stake holders as part of extending reading material for curriculum needs of the students. The pandemic situation forced Teaching and learning activities to become Screen based. Being constrained by the situation experienced by Sanskrit learners during the pandemic, the author was motivated to work for speechifying the existing digitized Sanskrit text corpus[1].

Sanskrit Learner studying in traditional and online classroom settings must primarily rely on their listening and reading ability while attending live classes, specifically if the lecture is not available on video. Virtual courses enable learners to listen to the lecture online. Recording/ speechifying and providing digital text learning material enable learner to read and listen to the speechified Sanskrit text to better comprehend and revise the topic at their own speed. In either setting, educational institutions can collaborate with transcription services to help organize and present the information to students to promote better learning.

---

[1] http://sansknet.ac.in Unicoded Sanskrit text corpus developed at National Sanskrit University

Any traditional Text to Speech/ Speechification system consists of the 1) Natural Language Processing, and 2) Digital Signal Processing Module. Two primary objectives of digitization are to provide access and for purposes of preservation. For access, a priority is extending reach geographically. For preservation, fragile records can be stored for years without much maintenance in digital storage. Fig 1 shows the three Ds-digitization, digitalization, and digital transformation and how they are interlinked.





**Fig.1.Simple Block diagramSpeechification**

## 2. Python based Text to Speech Processing packages

**gTTS**:There are several APIs available to convert text to speech in Python. One of such APIs is the Google Text to Speech API commonly known as the gTTS API. gTTS (Google Text-to-Speech), a Python library





**Figure 2 Various stages in Speechfication Process**

and CLI tool to interface with Google Translate's text-to-speech API is a very easy to use tool which converts the text entered into audio which can be saved as a mp3 file. The gTTS python package available at

pypi.org website suppors several languages including English, Hindi, Telugu, Tamil, Kanada, French, German and many more. The package creates audio in two available audio speeds fast or slow. It does not directly support Sanskrit language.

**Sanskrit_tts:** A simple python library for converting Sanskrit text to speech. Currently, the only supported method is to use Google Cloud text to speech with a work around. A Google Cloud account with text-to-speech API enabled is required. It may be mentioned here that the TTS API will incur a cost if the free quota is exceeded (details). The library uses a wavenet voice by default, but this can be changed via the voice parameter to synthesize_text. This is an extended implementation of gTTS python Package.

**Features: 1.** Customizable speech-specific sentence tokenizer that allows for unlimited lengths of text to be read, all while keeping proper intonation, abbreviations, decimals and more; 2. Customizable text pre-processors which can, for example, provide pronunciation corrections;

```
pip install sanskrit_tts
import os
from IPython.display import Audio
from sanskrit_tts import gcloud_tts as tts
# Setup credentials
os.environ['GOOGLE_APPLICATION_CREDENTIALS'] = './credentials.json'
text =
""""कालिदासस्यजीवनवृत्तिविषयेअनेकाःलोकविश्रुतयःअनेकेवादाःचसन्ति।केचित्एनंविक्रमादित्यस्यसभायांकविःइतिमन्यन्ते।केचित्गुप्तकालीननरेशाणाम्आश्रयंप्रा
प्तवानितिकथयन्ति।धारानगरेभोजराजस्यसभायांकविरत्नपदभूषितःअभूत्इतिकथाकोविदाःकथयन्ति।जनश्रुत्यनुसारंबाल्यकालेसःअतीवमूर्खःआसीत्।विद्याधरयासहत
स्यविवाहःअभवत्। """
audio = tts.synthesize_text(text)
Audio(list(audio.get_array_of_samples()), rate=audio.frame_rate, embed=True)
```

**Figure 3 Sanskrit TTS installation instructions**

**Pyttx3package**: Python Text to Speech:pyttx module: this is a cross-platform text to speech library which is platform independent. The major advantage of using this library for text-to-speech conversion is that it works offline. The pyttx3 library is compatible with both Python 2

and 3. An application invokes the pyttsx3.init() factory function to get a reference to a pyttsx3.Engine instance. During construction, the engine initializes a pyttsx3.driver. Driver Proxy object responsible for loading a speech engine driver implementation from the pyttsx3.drivers module. After construction, an application uses the engine object to register and unregister event callbacks; produce and stop speech; get and set speech engine properties; and start and stop event loops.

```
import pyttsx3
engine = pyttsx3.init() # object creation
""" RATE"""
rate = engine.getProperty('rate')   # getting details of current speaking rate
engine.setProperty('rate', 125)     # setting up new voice rate
"""VOLUME"""
volume = engine.getProperty('volume')   #getting to know current volume level (min=0 and max=1)
engine.setProperty('volume',1.0)    # setting up volume level  between 0 and 1
"""VOICE"""
voices = engine.getProperty('voices')       #getting details of current voice
engine.setProperty('voice', voices[1].id)   #changing index, changes voices. 1 for female
engine.say("hari om")
engine.say('My current speaking rate is ' + str(rate))
engine.runAndWait()
engine.stop()
"""Saving Voice to a file"""
engine.save_to_file('hari om', 'test.mp3')
engine.runAndWait()
```

**Figure 4 Py-TTX3 Installation**

To install  and test pyttx3 pacakge  the following statements are used:

## 5. Issues identified while integrating and implementing python based modules:

The py_ttx3 package does not support  Devanagari script directly and hence wx_conv python package was used to  transliterate to roman script for inputting the py_ttx3 module.

Google Text-to-Speech does not support Sanskrit yet. As a work around, this library uses other languages for speech to text conversion. Kannada is used by default for this workaround. Any other language/voice supported by Google TTS API can be used by changing

the voice parameter to synthesize_text, and the results will vary. While experimenting the voice parameter was set to different values to identify best work around for Sanskrit language.

While implementing the python speech modules, the following aspects/features of python speech modules under implementation should be acceptable to Sanskrit Scholar community inorder to integrate with Sanskrit text corpus.

1) tangibility of speechified output obtained from implementation
2) nativity of speechified output obtained from implementation
3) Naturality/No roboticness of speechified output obtained from implementation.

## 6. Evaluation of output of the implemented Modules:

Speech quality is a complex psychoacoustic outcome of the human perception process. As such, it is necessarily subjective, and can be assessed through listening test involving human test subjects that listen to a speech sample and assign a rating to it[1]. Users of new speech processing applications are often unaware of the underlying technology. Their main criterion for assessing these application is based on overall speech quality. Therefore, this paper considers three subjective audio metric tests. As a part of these tests, the private web link is shared to scholarly group of Sanskrit listeners who are asked to rate the quality of output of the respective modules based on overall perception. In this paper Likert Psycho metric scale is employed to evaluate the output of implemented speechified module.

**Likert scale:** Psychometric scale known as Likert scale is used to evaluate the Speechification implementation. Likert Scale is the most

[1] Grncharov, W.B.Kleijn, Speech Quality Assessment, Benesty, Sondhi, Huang, Handbook of Speech Processing, Springer-Verlag Berlin Heidelberg-2008

widely used approach to scaling responses in survey research when compared to other types of rating scales[1]. As the quality of synthesized speech depends subjective perception of listener, Likert scale is chosen to evaluate the implementation.

To carryout evaluation, a five minute synthetic speech output generated by pyTTX3 and Sanskrit_TTs modules were presented to 100 Sanskrit Scholars for scaling the speech quality with respect to tangibility, nativity, roboticness on Likert Scale.The following table relates to subjective evaluation made by Sanskrit listeners

| | Sanskirts TTS | | PY TTS/py_ttx3 | | PYTTS/ py_ttx3 | Sanskirts TTS |
|---|---|---|---|---|---|---|
| | Tang-ibility | Nativity | Tang-ibility | Nativity | Robotic ness | Robotic ness |
| Satisfied/ Agreed | 88 | 83 | 65 | 45 | 82 | 87 |
| dissatisfied/ disagree | 1 | 7 | 16 | 35 | 2 | 1 |
| Netural | 2 | 2 | 5 | 2 | 5 | 3 |
| Stongly Satisfied | 7 | 2 | 0 | 0 | 8 | 8 |
| Strongly dissatisfied | 2 | 6 | 14 | 18 | 3 | 1 |

**Figure 5 Likert Scale rating -Subjective Tests for PyTTS and Sanskrit_TTS**

During the implementation phase itself several combinations with each module was implemented with several python virtual environments. Each virtual environment was implemented by setting different parametres like speed, voice, gender. Experiment was repeated by chaging NLP packages NLTK and inltk. The inltk Natural Language

---

[1] https://en.wikipedia.org/wiki/Likert_scale

Processing module resulted in lot of errors while integrating and hence was not implemented here.





**Figure 6 Likert scale- Nativity & Tangibility Evaluation**





**Figure 7 Likert scale- Roboticness**

**7. Conclusion:** An experiment was conducted by implementing Sanskrit_tts and pyttx3 modules for Sanskrit text speechification and to identify a best tts module from python packages repository. Both the packages were subjectively evaluated using Likert Psycho metrics as shown in above. From the evaluation Sanskrit_TTS package performed better for integration with Sanskrit Text Corpus for computer based speechification.

❑❑❑

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२०    **सम्पुटम् :** संयुक्तम् (१,२)

# अप्रकाशितनवमालिकानाटिकायाः मुख्यपात्राणां समीक्षणम्

**रागि वेङ्कटाचारी***

**शोधलेखसारांशः**

"अप्रकाशितनवमालिकानाटिकायाः मुख्यपात्राणां समीक्षणम्" इति शीर्षकाङ्कितेऽस्मिन् शोधपत्रे श्रीमता विश्वेश्वरपाण्डेयकविना विरचितायां नवमालिकानाटिकायां परिपोषितानां केषाञ्चित् मुख्यपात्राणां यथा – नायकः नायिका पट्टमहिषी इत्यादीनां समीक्षणं सोपपन्नं कृतमस्ति। इयं नाटिका सम्प्रति अप्रकाशिता मातृकावस्थागता वर्तते। सन्दर्भेऽस्मिन् कवेः विश्वेश्वरपाण्डेयस्य देशकालादिनिष्कर्षोऽपि प्रदत्तो वर्तते।

विदितचरमेवैतत्सुरभारतीसाहितीसमुपासकसमूहस्य तत्रभवतो विद्वन्मणिमण्डलस्य च यत् सहृदयहृदयावर्जकं काव्यं दृश्यं श्रव्यञ्चेति स्थूलतो द्विविधमिति। श्रव्यकाव्याद् विशेषतो विद्वांसः परिणतमतयः एवं शिक्षितव्यक्तय आनन्दमनुभवन्ति, न परे सामान्याः। परन्तु दृश्यकाव्यं सर्वजनाह्लादकं सत् बालानामपि सुखोत्पादकं बोभवीति। तदुक्तं नाट्यशास्त्रे -

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतन्मया कृतम्।।**[1]

इत्थम्भूतस्य दृश्यकाव्यस्य नाट्यमिति संज्ञितस्य नाटकप्रभृतीनि दश रूपकाणि लोकविख्यातिं गतानि परिलक्ष्यन्त एव विद्वज्जनैः। उपरूपकाण्यपि सन्त्यमीषां नाटिकादीनि अष्टदशसंख्याकानि । यथोक्तं साहित्यदर्पणकारेण विश्वनाथेन –

**नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।**
**प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥**

---

* अतिथ्यध्यापकः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[1] नाट्यशास्त्रम्, 1.114

**संलापकं श्रीगदितं शिल्पकं च विलासिका।**
**दुर्मल्लिका प्रकरणी हल्लीशो भणिकेति च॥**
**अष्टादश प्राहुरूपरूपकाणि मनीषिणः॥**[1]

अमीष्वाद्यः प्रभेदो नाटिकाख्यस्तथैव मूर्धन्यः सर्वाङ्गीणतया विलसितः सन् सहृदयहृदयाह्लादको वरीवर्ति यथैव रूपकेषु नाटकं वरीवर्ति। नाटिकाश्चेमाः संस्कृतसाहित्यजगति विलसन्ति हर्षवर्धनप्रणीतरत्नावलीप्रभृतयः अतिविरलाः अल्पसंख्याकाश्च। अस्यां पङ्क्तावेव काञ्चिदपरामप्रकाशितां मातृकावस्थास्थितां नाटिकां समानेतुं संयोजयितुं वा प्रयतमानो वर्तते प्रकृतशोधपत्रलेखकः स्वकीयशोधकर्मद्वारा । सेयं भवति श्रीमद्विश्वेश्वरपाण्डेयप्रणीता **नवमालिका** नाटिका ।

**नवमालिकानाटिकाकर्तुः कवेः देशकालादिनिर्णयः**

विदुषां साहित्येतिहासकाराणां च मतानि, नाटिकागतप्रस्तुतिं च समालोच्य विविच्य च निष्कर्षरूपेण कवेः देशकालादिविषये इत्थं निर्णयः कर्तुं शक्यो यत् श्रीमद्विश्वेश्वरपाण्डेयाभिधोऽयं कविः साम्प्रतिक-उत्तराखण्डराज्यस्य अल्मोराजनपदे कस्मिंश्चित्पाण्डेयवंशे जनिमलभत। भारद्वाजगोत्रोद्भवस्य अस्य पिता श्रीमान् लक्ष्मीधरः सुप्रसिद्धो महान् पण्डितः इति ज्ञायते। कालविषये त्वयमष्टादशशताब्द्याः आरम्भवर्तीति न कस्यापि विप्रतिपत्तिरिति सुस्पष्टमेव। बहुमुखप्रज्ञाशाली नितान्तप्रतिभासम्पन्नश्च अयं कविवरः नैकान् अलङ्कारशास्त्रग्रन्थान्, नानारूपकाणि च इत्येवं प्रायः उपविंशति कृतीः विरचय्य, 'पापी चिरायुः सुकृती गतायु'रिति लोकोक्तेः सत्यतामापादयन् नितरामल्पीयसि वयसि (34 वर्षाणि) अस्माल्लोकान्निर्गतः।

**नाटिकागतपात्राणां चित्रणम् –**

मानवानां तत्रापि विभिन्नवर्गीयाणां नैकविधपदवीरलङ्कृतवतां महाराजादीनां स्त्रीपुरुषाणां पृथग्व्यावहारिकी रीतिः तदानीन्तनसमाजगतवस्तुस्थितिं प्रतिबिम्बयति।

[1] साहित्यदर्पणः 6.4-6

प्रकृतनाटिकयाञ्च कविना प्रयुक्तानां परिपोषितानाञ्च नायकादिपात्रविशेषाणां समीक्षणेन समाजस्थितिरवगन्तुं शक्यते। तदिदं कविना नायकादिपात्राणां चित्रणं कथङ्कारं कृतमिति समीक्ष्यते। तत्रादौ-

**राज्ञो विजयसेनस्य (नायकस्य) पात्रचित्रणम् –**

आचार्यविश्वनाथेन साहित्यदर्पणे नाटिकायाः लक्षणं प्रतिपादयता इदं कथितं यत् - '**प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः।**[1] इति। अर्थान्नाटिकायां नायकः सुप्रसिद्धो राजा धीरललितश्च भवेदिति।

इत्थमुक्तलक्षणरीत्या नाटिकायामस्यां नायको विजयसेनः अवन्तिदेशस्य महाराजो वर्तते। स च पुनर्धीरललितो नाम नायकविशिष्टो विराजते। नायकस्य शृङ्गारे ललितकलासु च आसक्तिः, स्वभावे व्यवहारे च मृदुता, सचिवेषु राज्यभारं निक्षिप्तवतस्तस्य निश्चिन्तता च इतीमे अंशाः अस्यां नाटिकायां परिलक्षितुं शक्याः। अतोऽयं धीरललितो नाम विशिष्टो नायकः। उक्तं च धीरललिताख्यस्य नायकविशेषस्य लक्षणं विद्यानाथेन यथा – **निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः।**[2] इति।

प्रकृतनाटिकायां नायकपात्रस्य चित्रणं कविना सुविस्तृते परिधौ चित्रितं दृश्यते। अर्थात् प्रायः प्रत्येकं सन्दर्भेऽवश्यं राज्ञ उपस्थितिः संदृश्यते। नाटिकायां स प्रायः सर्वैरप्यन्यपात्रविशेषैः भाषमाणोऽवलोकितुं शक्यः।

राजाऽयं विदूषकेण रौहिणायनेन सार्धं विहारार्थमुपवनं गच्छन् ब्रूते –

**"राजा -** वयस्य रौहिणायन! निवेदितं सारिसकया [3]विस्रब्धविहारेच्छया देवी केलिकौतुकनामधेयमुपवनमवतीर्णेति। तथापि लोकव्यवहारतन्त्राणां दुरतिक्रमतया

---

[1] सा.द. 6.270

[2] प्र.रु. १/३२

[3] M2. विहारेच्छया

धर्मासनमध्यासीनैरियच्चिरायितमस्माभिः। इदानीन्त्वविदितप्रवेश एव देव्या वनविहारकौतूहलमनुभवितुमिच्छामि। यतः -

**उपरोधमयात्किलान्तरायात्**
**प्रभवन्त्युच्छ्वसितुं[1] तथा न तावत् ।**
**रहिता महिलाजनस्य तेन**
**व्यवहारा हि विलक्षणा भवन्ति ॥ १.१२ ॥"**

सन्दर्भादस्मात् ज्ञायते यत् विजयसेनोऽयं राजा लोकतन्त्रव्यवहारेषु अतीव श्रद्धावान् प्रजानां पालने च सदा निरतश्चेति। अपि च स वनविहारेष्वासक्त इति, पुंसामभावे नारीणां विलक्षणव्यावहारेषु स्वदिदृक्षां प्रकटयन् ललितकलाकुतूहलीति च व्यज्यते।

प्रथमाङ्के राजा विजयसेनः उपवने स्वपुरतः समुपस्थितायाः राज्ञ्याश्चन्द्रलेखायाः नासिकारत्ने स्वपृष्ठतः सखीगणेषु स्थितायाः नायिकायाः नवमालिकायाः प्रतिबिम्बं यावदवलोकते तावतैव राज्ञो दृष्टिपथादपसारयितुमिच्छन्ती राज्ञी नवमालिकां ततः प्रेषयति। तदारभ्य राजा अस्पष्टप्रतिबिम्बात्परमाकृष्टः सन् तस्याः सन्दर्शनाय महत्कौतुकं प्रदर्शयति। विदूषकेण समं नानाविधोपायांश्च विचिन्तयति। क्रमेऽस्मिन् कविना राज्ञो विरहवेदनातीव मनोहरतयोपवर्णिता।

अन्ततो महाराज्ञ्याः सख्योश्चन्द्रिकासारसिकयोः साहाय्येन कथञ्चिदपि नवमालिकामेकान्ते प्राप्य तया सह नानाविधसंल्लापान्विदधाति।

**राज्ञ्याश्चन्द्रलेखायाः (पट्टमहिष्याः) पात्रचित्रणम् –**

महाराजविजयसेनस्य पट्टमहिषी इयं चन्द्रलेखा नाटिकाया अस्या द्वितीया नायिकेति वक्तुं शक्या। यतो हि कविनास्मै पात्रविशेषाय नायकेन सह व्यवहारे समुचितं प्राधान्यं दत्तम्। इयमपि वनविहारादिष्वतीवासक्तिमतीति ज्ञायते। यथा प्रथमाङ्के राज्ञो मुखात् –

---

[1] M2. प्रभवन्त्युल्लसितुं

"**राजा** - वयस्य रौहिणायन! निवेदितं सारिसकया [1]विस्रब्धविहारेच्छया देवी केलिकौतुकनामधेयमुपवनमवतीर्णेति।"

नाटिकान्तं यावद् देव्याश्चन्द्रलेखायाः प्रधानं लक्ष्यं भवति राज्ञो विजयसेनस्य दृष्टिपथात् नवमालिकायाः गोपनम्। यदा मन्त्री नीतिनिधिर्दण्डकारण्येषु सखीद्वयसहितां नवमालिकां प्राप्नोति तदा तां नवमालिकां देव्यै चन्द्रलेखायै समर्पयति। सा च तां स्वान्तःपुरपरिचारिकास्वन्यतमात्वेन नियोजयति। तदारभ्य सावधाना चन्द्रलेखा राज्ञो दृष्टिपथे नवमालिका यथा न पतेत्तथानवरतं प्रयतमाना भवति। यथा प्रथमाङ्के कस्मिंश्चित् सन्निवेशे –

"**देवी** - (स्वगतम्) अयिचिराइदं क्खु अलेहिं इमिणा पसंगेण....." इत्यादि।

अत्र नवमालिकां प्रति राज्ञो दर्शनाद्भीताया देव्याश्चन्द्रलेखाया आतङ्कितमनस्त्वं व्यज्यते।

एवं प्रयतमानयापि देव्या, कस्मिंश्चिन्निर्जने उपवने नवमालिकया सह रहसि संलपन् राजा अवलोक्यते । तदा सा अतीव रुष्टा जायते। यथा तृतीयेऽङ्के –

"**देवी** - अज्जउत्त, उवक्कंत विरुद्धं क्खु एण्हिं प्पिएत्ति आमंतणं । ता अहं गमिस्सं। ता ण जुज्जइ तुम्हाणं अंतराई भविदुम्। [आर्यपुत्र, उपकान्तविरुद्धं खल्विदानीं प्रियेत्यामन्त्रणम्। तदहं गमिष्यामि। न युज्यते युष्माकमन्तरायो भवितुम्।]"

अन्ततस्तापसदत्तमणिप्रभावान्नवमालिकां क्षत्रियकन्यां विज्ञाय स्वयमेव तां राज्ञे अर्पयति। यथा चतुर्थेऽङ्के -

"**देवी** - (स्वगतम्) तक्किदं क्खु मए इमाए [2]उवरिकोणप्पसरति (प्रकाशम्) अज्जउत्त! परिणिज्जउ एसा किं विलंबेण [तर्कितमेव खलु मया अस्या उपरि को नानुरज्यते (प्रकाशम्) आर्यपुत्र ! परिणीयतामेषा किं विलम्बेन।"

---

[1] M2. विहारेच्छया

[2] M2. उवरिकोणाणुरज्जइ

इत्थं राज्ञो विजयसेनस्य पट्टमहिष्याश्चन्द्रलेखायाः पात्रं कविः नाटिकायामस्यां वैविध्यपूर्णमचित्रयत्।

**नायिकायाः नवमालिकायाः पात्रचित्रणम् –**

नाटिकाया अस्या नायिका इयं नवमालिका नितान्तनवयौवना लज्जावती मितवादिनी मृदुमञ्जुलभाषिणी च सती मुग्धा नायिका परिदृश्यते। आचार्यविश्वनाथोक्त-मुग्धानायिकालक्षणेषु प्रायः सर्वाण्यपि लक्षणान्यस्यां नवमालिकायामालोकितुं शक्यानि। मुग्धानायिकायाः लक्षणानि च यथा –

**प्रथमावतीर्णयौवनमदनबिकारा रतौ वामा ।**
**कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ।। इत्यादि।**[1]

वस्तुत इयं नवमालिका देव्याश्चन्द्रलेखायाः भ्रातुर्दुहिता। स चाङ्गराज्यस्य राजा अवन्तिवर्माभिधः। कदाचिदियं मन्दकिनीनदीतीरे सखीद्वयसहिता विहरन्ती केनचिद्राक्षसेणापहृता जायते। ततश्च कस्यचित्तापसस्य सविधे विद्यमानमणेः प्रभावेणापहृतशक्तिः स राक्षसस्तां मोचयति। सा च दण्डकारण्येषु पतिता मार्गप्रभ्रष्टा जायते। तदैव तन्मार्गे गच्छता अवन्तिराज्यमन्त्रिणा नीतिनिधिना दृष्टा सती देव्याश्चन्द्रलेखायाः हस्ते विषयमनाख्यायैव अर्प्यते। योऽस्याः पाणिं ग्रहीष्यति तस्य राज्यमध्याहृतं भविष्यतीति जातकफलम्। तदुच्यते राज्ञा विजयसेनेन चतुर्थेऽङ्के यथा –

"**सुमतिः -** देवेनैवं सम्भाव्यमानस्य सर्वत्र कुशलमङ्गराजस्य। तस्य[2] प्रथमं भगवत्याः सर्वमङ्गलायाः प्रसादादेकं कन्यारत्नमुत्पन्नम्।

**राजा -** श्रुतपूर्वं ह्येतदस्माभिर्यस्यां प्रसूतायां दिव्या सरस्वती प्रादुरभवत्। अस्याः [3]करग्रहीतुरध्याहृतं साम्राज्यं भविष्यतीति। ततस्ततः।"

---

[1] सा.द. ३/५८

[2] M2. पदलोपः

[3] M2. करगृह.......साम्राज्यं

किन्त्वियं नवमालिका किमर्थमात्मनः परिचयं न क्वापि न कस्यचिदपि पुरस्तात्प्रकटीकरोतीति आश्चर्यस्य विषयः।

राजा विजयसेनः अस्यामनुरक्तः सञ्जात इति ज्ञात्वा इयमपि नवयौवना राज्ञि गाढानुरक्ता जायते। एकान्ते राज्ञा सह मिथःसंल्लापावसरे मितमेव भाषमाणा लज्जमाना च संदृश्यते। यदा देवी चन्द्रलेखा रहसि संलपन्तौ तौ द्वौ वीक्षते, तदा तु नितरां दुःखिता सञ्जायते।

अवन्तिराजस्य मन्त्री सुमतिः राज्ञोऽवन्तिवर्मणः पुत्रोत्पत्तिवार्तां राज्ञे विजयसेनाय निवेदयति, तदा तां वार्तां सखीमुखेन श्रुत्वा परमामोदं प्रकटयति।

राजमन्दिरे मन्त्रिणं सुमतिं विलोकितवत्याः नवमालिकायाश्चिराद् पित्रोरदर्शनजनितं महद्दुःखं निजपरिवारीयस्य सुमतेः सकृद्विलोकनमात्रेणैव उपशान्तमिति कविः हृद्यमेकं श्लोकमरचयद्यथा –

"(सुमतिमवलोक्य)

**यत्पित्रोः सुचिराददर्शनभुवं दुःखं समासीदिदं[1]**
**व्यासङ्गान्तरजन्ममानिजसजातीयेन मन्दायितम्।**
**सम्प्रत्येकविलोकनेन सुमतेरेकप्रवाहीभवत्**
**प्रत्यग्रत्वमिवागतं [2]परिभवत्यन्यानि दुःखानि तत् ॥ 25 ॥"**

अन्यच्च राजमन्दिरे सुमतिः, नीतिनिधिः, तापसः इत्येतेषां परस्परसम्भाषणेभ्य एव सर्वैः ज्ञायते यदियं नवमालिका न काचिदपरा, अपि तु साक्षात् देव्याः भ्रातुरङ्गराजस्यावन्तिवर्मणो दुहितेति। ततो नितरां पश्चात्तापमनुभवन्ती देवी चन्द्रलेखा नवमालिकां क्षमां याचित्वा तां गाढं परिष्वज्य च राज्ञा परिणीतां विधत्ते।

---

[1] M2. समासादितं

[2] M2. परिभवन्त्यन्यानि

**उपसंहारः –**

इत्थमस्यां नाटिकायां नायकादीनि पात्राणि नितरां वैविध्यभरितानि चित्रयित्वा कविर्विश्वेश्वरपाण्डेयो नूनं साफल्यमवाप्नोदिति मे मतिः।

## अनुशीलितग्रन्थसूची


1. **दशरूपकम्** - धनञ्जयः, चौखम्भाविद्याभवन, वाराणसी, 2000
2. **नाट्यशास्त्रम्** - भरतः, भारतीय विद्या प्रकाशन, दिल्ली, 1983
3. **साहित्यदर्पणः** - विश्वनाथः, (सं) दुर्गाप्रसादद्विवेदी, मेहरछन्द लछमनदास, नई दिल्ली, 1982
4. **मालवमयूरः** - मासिकपत्रिका, विशेषाङ्कः, मन्दसौर, म.प्र. 1964 (M3)
5. **संस्कृत साहित्य का समग्र इतिहास** (हिन्दी) तृतीय खंड - प्रो. राधावल्लभत्रिपाठी, न्यू भारतीय बुक कार्पोरेशन, नई दिल्ली, 2018
6. Mss. No. MD-12531, GOML, Chennai (M1)
7. Mss. No. 6697, SVORI, Tirupati (M2)


❑❑❑